પો૦ નં૦ ૧૨૬૨
પુ૦ નં૦ ૨૪૨૨
પાનાં ૭૫

मलधारिश्रीराजशेखरसूरिविरचितो

# विनोदकथासंग्रहः।

जैनाचार्यश्रीविजयवीरसूरीश्वरेण संशोधितः।

स च मुम्बापुर्यां
स्तम्भनपुरवास्तव्यश्रीश्वेताम्बरजैनसंघस्वार्थिकसाहाय्येन "ककलभाई भूदरदास वकील" इत्येतेन
निर्णयसागरयन्त्रालये मुद्रयित्वा प्रकाशितः।

वीरसंवत् २४४४ विक्रमसंवत् १९७४ सन् १९१८

मूल्यमेको रूप्यकः।

Jain Guru Aaradhak Trust

Printed by Râmchandra Yesu Shedge, at the Nirnaya-sâgar Press, No 23, Kolbhat Lane, Bombay.

Published by Kakalbhâi Bhudardâs Vakil, Princess Street, Manhar Building, Bombay.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

# प्रस्तावना ।

इह खलु विविधशब्दार्थभङ्गितरङ्गिता नानाप्रसङ्गसंगतिसमाश्रिता सुललितकाव्यनिबद्धा विस्तृतशब्दशरीरा कथा यथा ददात्यनिर्वचनीयमानन्दम्, आदधाति च कान्तेव शिक्षां हृदये सहृदयानाम्, तथैकमेवाथ च चित्ताकर्षकं प्रसङ्गमुल्लिखन्ती, अप्रासङ्गिकवस्तुवर्णनपराङ्मुखी, अत एव शब्दसंक्षेपशालिनी लघुकथापि तावतांशेन पर्याप्नोत्येव सतामुपयुक्तशिक्षामाधातुं मनोविनोदं च संविधातुम्, इत्यनुभवसिद्धमिदं सुजनानाम् । श्रीराजशेखरसूरिभिरत्र ग्रन्थे तादृशीनामेव लघुकथानां संग्रहोऽकारि, इति ग्रन्थनाम्नैव प्रकटमेतत् ।

श्रीराजशेखरसूरीणां सत्तासमयादिकतिपयविषयावलम्बिनीं जिज्ञासां समुपशमयति तैरेव विरचितस्य चतुर्विंशतिप्रबन्धस्य निम्नोद्धृता प्रशस्तिः—

"श्रीप्रश्नवाहनकुले कोटिकनामनि गणे जगद्विदिते । श्रीमध्यमशाखायां हर्षपुरीयाभिधे गच्छे ॥ १ ॥
मलधारिबिरुदविदितश्रीअभयोपपदसूरिसन्ताने । श्रीतिलकसूरिशिष्यः सूरिः श्रीराजशेखरो जयति ॥ २ ॥
तेनायं मृदुगद्यैर्मुग्धो मुग्धावबोधकामेन । रचितः प्रबन्धकोशो जयताज्जिनपतिमतं यावत् ॥ ३ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तथा—

कट्टारवीरदुःसाधवंशमुकुटो नृपौघगीतगुणः । बब्बूलीपुरकारितजिनपतिसदनोच्छलत्कीर्त्तिः ॥ ४ ॥

बप्पकसाधोस्तनयो गणदेवोऽजनि सपादलक्षभुवि । तद्भूर्नूनकनामा तत्पुत्रः साढको दृढधीः ॥ ५ ॥

तत्सूनुः सामन्तस्तत्कुलतिलकोऽभवज्जगत्सिंहः । दुर्भिक्षदुःखदलनः श्रीमहम्मदसाहिगौरवितः ॥ ६ ॥

तज्जो जयति सिरिभवः षड्दर्शनपोषणो महणसिंहः । ढिल्ल्यां स्वदत्तवसतौ ग्रन्थमिमं कारयामास ॥ ७ ॥

शरगगनमनुमिताब्दे ज्येष्ठामूलीयधवलसप्तम्याम् । निष्पन्नमिदं शास्त्रं श्रोत्रध्येत्रोः सुखं तन्यात् ॥ ८ ॥"

**एभिरेतद्व्यतिरिक्ता अपरेऽपि स्याद्वादकलिका–स्याद्वादरत्नाकरावतारिकापञ्जिका–न्यायकन्दलीपञ्जिका–षड्दर्शनसमुच्चयादयो बहवो ग्रन्था विनिर्मिताः, यैः संप्रत्यपि प्रायः समुपलभ्यमानैरेतेषां बहुषु विषयेषु प्रवरं पाण्डित्यमवगम्यते, दर्शनशास्त्रेषु च विशेषतः ।**

**तात्कालिकेष्वन्यगच्छीयेष्वप्याचार्येषु, एतेषां ग्रन्थकर्तृणां विशदवैदुष्यविषया सौजन्यनिमित्ता च सुख्यातिरतिप्रसिद्धाऽऽसीत्, इत्यप्यनेके सूरयो निजग्रन्थान्तभागे प्रस्तुतग्रन्थकृत्कर्तृकं स्वग्रन्थसंशोधनमुल्लिखन्तो विनिर्दिशन्ति स्म; यथा शान्तिनाथमहाकाव्यकर्तारः श्रीमुनिभद्रसूरयः—** ॥ १ ॥

Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

"श्रीमान् हर्षपुरीयगच्छजलधिप्रोल्लासशीतद्युतिर्वाणीभूषणराजशेखरगुरुः सौजन्यसंवासभूः ।
श्रीशान्तेश्वरितं व्यशोधयदिदं दुष्कर्ममर्मापहं प्राज्ञैस्त्वैरपि शोध्यमेतदसमं कृत्वा प्रसादं मयि ॥ ११ ॥"

यथा च रत्नाकरावतारिकाटिप्पनकाराः पूर्णिमागच्छीयपं० ज्ञानचन्द्राः—

"रत्नाकरावतरिकावरटिप्पनं तज्ज्ञानेन्दुरल्पतरधीः स्वमतिप्रवृद्ध्यै ।
तच्छिष्यको रचितवान् मलधारिपूज्यश्रीराजशेखरगुरोश्च निदेशमाप्य ॥ ८ ॥
श्रीराजशेखरगुरुर्गरिमानिधानं तर्कागमाम्बुधिमहार्थजलाभिलाषी ।
मद्वाक्यजातमखिलं तदनल्पदोषं निर्दूषणं व्यधित सत्प्रतिभामितश्रीः ॥ ९ ॥"

ग्रन्थस्यास्य संशोधनं निम्नलिखितैश्चतुर्भिरादर्शपुस्तकैरकार्षम्;—

क. स्तम्भनपुरभाण्डागारसत्कं शुद्धप्रायम्, अन्तभागे चैतदुल्लेखसमन्वितम्,

"ग्रंथाग्रं २००० ॥ छ ॥ ॥ सं० १५४३ वर्षे मार्गसिरवदि ३ दिने श्रीतपागच्छे श्रीपं धर्ममंगलगणिना लिखापितं ॥ ले० सा० सोमापार्श्वैः ॥ शुभं भवतुः ॥ श्रीः ॥ शुभं भूयात् ॥ श्रीः ॥ श्री ॥"

ख. स्तम्भनपुरभाण्डागारसंबन्धि, नात्यशुद्धम् ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

म. मदीयपुस्तकसंग्रहसंस्थम्, नातिशुद्धम्।

घ. ,, शुद्धप्रायम्, किन्तु संक्षिप्तशब्दरचनात्मकं कतिपयकथाविरहितं च (दृश्यतामष्टमपत्रे पाठान्तरम्) अन्त्यभागे "लिखितं त्रिपुरपाटके नगरे ज्ये० व० ८ गुरौ ॥ शुभं भवतु श्रीश्रमणसंघस्य लेखकपाठकयोश्च" इत्युल्लेखमण्डितम्।

इत्येवं पुस्तकचतुष्काधारेण संशोधिते विहितपाठान्तरनिर्देशे चास्मिन् ग्रन्थे मनुष्यत्वसहकृताः स्खलना याः काश्चिद् भवेयुः, विशदस्वभावा सज्जनास्ताः कृपया शोधयिष्यन्तीति—

आशास्ते—

**विजयवीरसूरिः।**

---



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

# अनुक्रमणिका ।


| कथाङ्कः | विषयः | पत्रं | पृष्ठम् |
|---|---|---|---|
| १ | कमलश्रेष्ठिकथा.... .... .... .... | १ | १ |
| २ | बधिरकुटुम्बकथा .... .... .... | ४ | २ |
| ३ | लोभे मोदककथा .... .... .... | ५ | १ |
| ४ | व्यासकथा .... .... .... .... | ६ | १ |
| ५ | निन्दककथा .... .... .... .... | ६ | २ |
| ६ | अतिलोभे बुद्ध्यन्धत्वकथा .... .... | ७ | २ |
| ७ | बुद्धिप्रागल्भ्ये रोहककथा .... .... | ८ | १ |
| ८ | ,, क्षुल्लककथा .... .... | १३ | १ |
| ९ | ,, मन्त्रिकथा .... .... | ,, | ,, |
| १० | ,, सपत्नीकथा .... .... | १३ | २ |
| ११ | ,, निधिपतिकथा .... .... | ,, | ,, |
| १२ | बुद्धिप्रागल्भ्ये भिक्षुखौरेयकथा .... .... | १४ | २ |
| १३ | ,, नैमित्तिककथा .... .... | ,, | ,, |
| १४ | ,, अमात्यकथा .... .... | १६ | १ |
| १५ | दैवानिवार्यत्वे वणिक्कथा .... .... | १७ | १ |
| १६ | बुद्धौ कुन्तलकथा .... .... .... | १७ | २ |
| १७ | परद्रोहे श्वश्रूवधूकथा .... .... .... | १८ | १ |
| १८ | आत्मविगोपकजटाधरकथा .... .... | १९ | १ |
| १९ | स्त्रीमायाकथा .... .... .... .... | १९ | २ |
| २० | पण्डितकथा .... .... .... .... | २२ | १ |
| २१ | कलहकारिपत्नीकथा .... .... .... | २२ | २ |
| २२ | गृहभञ्जककथा.... .... .... .... | २३ | १ |


P.P. Ac. Gunratnasuri M.S.  Jun Gun Aaradhak Trust

| कथाङ्कः | विषयः | पत्रं | पृष्ठम् |
|---|---|---|---|
| २३ | लोभे मूढजरतीकथा .... .... .... | २४ | १ |
| २४ | मूर्खकथा .... .... .... .... | २४ | २ |
| २५ | वञ्चकश्रेष्ठिकथा .... .... .... | २६ | १ |
| २६ | मूर्खशिष्यकथा .... .... .... .... | २७ | १ |
| २७ | व्यवहाराज्ञबोधकथा .... .... .... | २७ | २ |
| २८ | अर्थस्यानर्थमूलत्वे कथा .... .... | २८ | १ |
| २९ | जडजटिकथा .... .... .... .... | २८ | २ |
| ३० | अव्यवहारज्ञविद्वत्कथा .... .... .... | २९ | १ |
| ३१ | अविचारराजकथा .... .... .... | ३० | २ |
| ३२ | पुण्याधीनहितप्राप्तिकथा .... .... | ३१ | २ |
| ३३ | उपायज्ञवणिक्कथा .... .... .... | ३२ | १ |
| ३४ | बटुकथा .... .... .... .... | ३२ | २ |
| ३५ | जटिलकथा .... .... .... .... | ३३ | १ |
| ३६ | सशङ्कनिःशङ्ककथा .... .... .... | ३३ | २ |
| ३७ | निःशूकद्यूतकृत्कथा .... .... .... | ३४ | १ |
| ३८ | छेकवणिक्कथा .... .... .... .... | ३५ | १ |
| ३९ | धूर्त्तेश्वरकथा .... .... .... .... | ३५ | १ |
| ४० | करीराढ्यश्रेष्ठिकथा .... .... .... | ३५ | २ |
| ४१ | स्वार्थमूढविप्रकथा .... .... .... | ३६ | २ |
| ४२ | स्त्रीमुखकुविन्दकथा .... .... .... | ३७ | १ |
| ४३ | कार्यतत्त्वज्ञश्रेष्ठिकथा .... .... .... | ३७ | २ |
| ४४ | सेवकशत्रुस्वामिकथा .... .... .... | ३८ | २ |
| ४५ | अलसकथा .... .... .... .... | ३९ | १ |
| ४६ | सूरिमैनिककथा .... .... .... | ३९ | २ |
| ४७ | कुम्भकारमिथ्यादुष्कृतकथा .... .... | ४० | १ |
| ४८ | वणिग्भिक्षाककथा .... .... .... | ४० | २ |




P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

| कथाङ्कः | विषयः | पत्रं | पृष्ठम् |
|---|---|---|---|
| ४९ | कृपणकथा .... .... .... .... | ४२ | १ |
| ५० | लुब्धशठकथा .... .... .... .... | ४३ | १ |
| ५१ | दानादानयोः संकलकथा .... .... | ४३ | २ |
| ५२ | गुर्वधीनबोधे जिनदत्तकथा .... .... | ४५ | १ |
| ५३ | निरङ्कुशगुरुदमनयजमानकथा .... .... | ४६ | २ |
| ५४ | वृद्धविज्ञत्वकथा .... .... .... .... | ४७ | २ |
| ५५ | निर्मर्यादनारीकथा .... .... .... | ४८ | २ |
| ५६ | निःश्रद्धदानकथा .... .... .... | ४९ | २ |
| ५७ | चाटुकारकथा .... .... .... .... | ५० | १ |
| ५८ | पराभिभवे शुककथा .... .... .... | ५० | २ |
| ५९ | कूटसाक्ष्ये काककथा .... .... .... | ५२ | १ |
| ६० | कर्मप्राबल्ये विप्रकथा .... .... .... | ५३ | २ |
| ६१ | भक्तौ जटाधरकथा .... .... .... | ५४ | १ |
| ६२ | अतृप्तयतिकथा .... .... .... .... | ५४ | २ |
| ६३ | शाठ्यधार्मिककथा .... .... .... | ५५ | १ |
| ६४ | अविमृश्यकारिकथा .... .... .... | ५५ | २ |
| ६५ | लोकाप्राधान्ये श्रेष्ठिकथा .... .... | ५६ | १ |
| ६६ | परवाक्प्रत्यये चौरकथा .... .... .... | ५६ | २ |
| ६७ | जडसङ्गत्यागे चैत्रकथा .... .... .... | ५७ | १ |
| ६८ | प्रथमडम्बरकथा .... .... .... | ५८ | १ |
| ६९ | चिरकारिस्नुषाकथा .... .... .... | ५८ | २ |
| ७० | सहसार्थलाभकथा .... .... .... | ५९ | १ |
| ७१ | मृषावादिधूर्तकथा .... .... .... | ६० | १ |
| ७२ | असारपुरुषकथा .... .... .... | ६१ | २ |
| ७३ | यत्तत्कारिभिक्षुकथा .... .... .... | ६२ | १ |


P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

| कथाङ्कः | विषयः | पत्रं | पृष्ठम् |
|---|---|---|---|
| ७४ | धूर्तवाग्वैचित्रीकथा .... .... .... | ६२ | २ |
| ७५ | वाक्प्रभावोद्भेदे कथा .... .... .... | ६३ | २ |
| ७६ | कुवक्तुर्हास्यत्वे कथा .... .... .... | ६४ | १ |
| ७७ | रहस्याप्रकाशने दम्पतिकथा .... .... | ६५ | १ |
| ७८ | कपालद्वयकथा .... .... .... .... | ६६ | २ |
| ७९ | आन्तरकथासहिता बल्लालदेवकथा .... | ६८ | २ |
| ८० | जिह्वादोषे म्लेच्छकथा .... .... | ७३ | १ |
| ८१ | पुण्यप्राबल्ये पथ्यावैद्यकथा .... .... | ७४ | १ |






P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

पो० नं० १२६२
४-७ २८२९

मलधारिश्रीराजशेखरसूरिविरचितो

# विनोदकथासंग्रहः ।

यन्नैकामपि कामिनीं परिणयस्यभ्यर्थ्यमानोऽप्यलं, तन्नूनं गृहभारकातरतया मुक्तोद्यमो देवर ! ।
मा शङ्कस्व हरिस्त्रिखण्डविजयी भ्राताऽस्ति ते सर्वदो, भामाद्याभिरितीरितः स्मितमुखो नेमिर्वशी पातु वः ॥ १ ॥
[1]जयन्ति गुरवोऽस्माकं विद्यावल्लिमहीरुहाः । मलधारिगणाधीशाः श्रीश्रीतिलकसूरयः ॥ २ ॥
मनोविनोदहेतूनां सभार्हाणां यथाश्रुतम् । मया कथानां ह्रस्वानां क्रियते संग्रहो बुधाः ! ॥ ३ ॥
तन्नास्ति किञ्चिज्जगति यद्वाच्यं न यथासभम् । अतो विनोदकथिकासंग्रहोऽयं न निष्फलः ॥ ४ ॥
[2]तत्त्वप्रियजनाकीर्णे षड्दर्शनसमाकुले । आस्थाने निर्विरोधास्तु कथनीयाः कथानिकाः ॥ ५ ॥
[3]सत्काव्यनादपक्षाभ्यां भुवनत्रयचारिणी । देवी सरस्वती हंसी रमतां मम मानसे ॥ ६ ॥

१ ग. घ. पुस्तकयोर्नास्त्ययं श्लोकः । २ घ. पुस्तकेऽयं श्लोको नास्ति । ३ ख. ग. घ. पुस्तकेष्विदं पद्यं नास्ति ।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

योऽपि सोऽपि ध्रुवं ग्राह्यो नियमः पुण्यकाङ्क्षिणा । सोऽल्पोऽप्यमल्पलाभाय कमलश्रेष्ठिनो यथा ॥ १ ॥

अस्ति श्रीभारभासुरं श्रीपुरं नाम नगरम् । तत्र द्वादशव्रतधरो न्यायार्जितधनो महाजनवल्लभः परमसम्यग्दृष्टिः षडावश्यकक्रियाशाली श्रीपतिः श्रेष्ठी । तस्य सुन्दरी भार्या । सा शीलादिभिर्गुणैः पत्युरनुरूपैव चकासामास । तयोस्तु कमलो नाम पुत्रः । स निर्लज्जो नास्तिको धृष्टः खादको वातूलः पुण्यस्य नामापि न जानाति । गुरुदर्शनं दुरितमिव मन्यते । साधर्मिकान् दर्वीकरानिव द्वेष्टि । देवाधिदेवस्य स्तुतिपाठं शोकाक्रन्दमिव गणयति । स च कदाचिज्जनकेनोत्पन्नकरुणापरिणामेन रह एवं सप्रसादमशिक्ष्यत, 'वत्स !

"बाहत्तरीकलापंडिआवि पुरिसा अपंडिया चेव । सव्वकलाणवि पवरं जे धम्मकलं न याणंति ॥ १ ॥

तुल्लेवि माणुसत्ते केइ सुही दुक्खिया य जं अन्ने । तं निउणं परिचिंतसु धम्माधम्मप्फलं चेव ॥ २ ॥" '

इत्यादि । स तु तेन हितेनाप्युपदेशेन कट्वौषधेनेव पीडितो मुखं पराङ्मुखं कृत्वा सतिरस्कारमभाषिष्ट, तात ! क जीवः ? क धर्मः ? काधर्मः ? क नाकलोकः ! क नरकः ? कापवर्गः ? सर्वमेतद् गगनालिङ्गनप्रायम्, अदृष्टत्वात्, तुरङ्गशृङ्गवत् ।

१ ग. भर । २ ग. °कशा° । ३ क. ख. °त्रः । नि° । ४ क. ख. धृष्टो नास्तिकः । ५ ग. घ. वेत्ति । ६ क. ख. °तमिति म° घ. °तं म° ।

७ द्वासप्ततिकलापण्डिता अपि पुरुषा अपण्डिता एव । सर्वकलानामपि प्रवरां ये धर्मकलां न जानन्ति ॥ १ ॥

तुल्येपि मनुष्यत्वे केचित् सुखिनो दुःखिताश्च यदन्ये । तन्निपुणं परिचिन्तय धर्माधर्मफलमेव ॥ २ ॥

८ क. ख. कलाकुसलावि पंडिअपु° । ९ ग. स्वर्लोकः ।



Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

"तपांसि यातना: सर्वाः[1] स्वेच्छाघातकसंयमः । दैन्यस्यायुष्यमस्तैन्यमभक्ष्यं कुक्षिवञ्चना ॥ १ ॥"

इत्यादि प्रलपन्नुदस्थात् । निरङ्कुशः करीवान्तर्नगरं चरन् रात्रिंदिवानि वाहयति । अन्येद्युस्तत्र द्रङ्गे[2] शङ्करनामा सूरिर्भूरि-गुणः[3] समवासार्षीत् । श्रीपतिः श्रेष्ठी तं वन्दितुं महर्द्धिकपरिच्छदै[4]र्परीतो जगाम । पञ्चविधाभिगमनपूर्वं वन्दित्वा[5] करुणासारं धर्मं श्रुत्वा योजिताञ्जलि[6]र्गुरुं व्यजिज्ञपत्, 'श्रीपूज्याः क्षीराश्रवलब्धिसंपन्नाः; मधुमधुरया[7] वाचा हृतहृदयमिदमखिलमास्थानम्; मम पुत्रस्तु दुर्विनीतो जिनधर्मबाह्यो प्रखरखलकुलतिलकः, तं बोधयितुं प्रसीदत; यदाहुः;—

"सम्यग् न्यायोपदेशेन यः सत्त्वानामनुग्रहम् । करोति न्यायबाह्यानां स प्राप्नोत्यचिराच्छिवम् ॥ १ ॥" '

श्रीसूरिभिर[8]भ्यधायि, 'बोधयिष्यामो यथाशक्ति, आगमिष्यति[9] यद्यसौ' । श्रेष्ठिराजः स्वागारमगात् । भुक्तो विलिप्तो गृहद्वारमण्डपिकायां विश्रान्तः । पुत्रो व्यसनोपहतो धनवदरकग्रहणाय तदा सदनमाजगन्वान्[10] गृहीत्वा निःसरन् जनकेन[11] जल्पेऽनल्पवत्सलिम्ना, 'वत्स ! श्रीशङ्कराचार्याननन्तरा[12]श्रवणं स्थितान्[13]भिनवागतान् वन्दितुमर्हसि । गुणाढ्यसेवा हि महते फलाय कल्पते । गुणाढ्यं हि प्रवहणं दुस्तरादपि सागरात् परं तारयति, स्वयं तरति च' । सोऽपि गाढतरीढावक्रितवदनो निष्क्रम्य यावद् दुरोदरिकनर्तक्यादिशालां[14] परिसर्पति, तावत् तत्रानवसरः । अतो दध्यौ, 'तातेन योऽसौ सूरिर्वन्दनीयतया जगदे, तं

१ क. ख. संयमः स्वाच्छन्द्याघातः । दै° । २ ग. पुरे । ३ ग. गणः समागतः । श्री° । ४ ग. °दान्वितो । ५ ग. °त्वा स्तुत्वा दयासा° । ६ क. ख. °ताञ्जलि° । ७ ग. मधुरवचोवीचिभिर्हृ° । ८ ग. घ. सूरिराह बो° । ९ ग. घ. स यद्यायास्यति । श्रेष्ठी गृहं गतः । १० ग. घ. °मागतः । गृहीत्वा च नि° । ११ पित्रा वात्सल्याद् वादितः । व° । १२ °नाम्रवणस्थि° । १३ ग. °तान् वन्दि° । १४ ग. शालाः स° ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

[1]प्रलापयामि तावत्' । इति वक्राशयः सूरीन् गत्वा कृतकप्रश्रयेणाभिवन्द्य, नट इव मायी, पुरस्तस्थौ । श्रीसूरिभिरपि पूर्वपृष्टव-र्णकर्णनयनाद्यनुसारेणोपल[2]क्ष्याभाषयामाहे, 'त्वं किं कमलः ?' इति । सोऽप्यवक्[3], 'अहं कमलः' इति । सूरिभिरादिष्टम्, 'अस्मन्मुखे दत्तदृष्टिः सिद्धान्तरहस्यानि सप्रणिधानं शृणु' । ओमित्युक्त्वा सोऽपि किल विनयमसृणोऽशृणोत् । याममेकं गुरुस्तस्मै धर्मतत्त्वान्युपदिश्य पप्रच्छ, 'किं त्वया बुबुधानम्?' इति । [4]सोऽप्यूचे, 'भगवन् ! किञ्चिद् बुद्धम्, किञ्चिद् न' । 'किं कारणम् ?' । 'मया [5]भवतां कथादि कथयतां चलन्ती घण्टिकाऽष्टोत्तरशतवारं गणिता, ततश्च पूज्यैश्चमराऽमरभ्रमरतोमरादिशब्दा[6]ः केऽपि गलबलायमानाः शीघ्रशीघ्रमभिदधिरे, तत्रान्तरे घण्टिकाचलनसंख्यानं नोपलब्धवान्' इति । सू[7]रिभिः परामृष्टम्, 'अहो ! कुपुरुषत्वमस्य, यदेवमस्मानपि हितार्थिन एवमुपहसति । अस्थाने हि नाट्यपरिश्रमः श्रमफल एव ।

"[8]अणवट्ठियस्स धम्मं मा हु कहिज्जाहि सुट्ठुवि पियस्स । विच्छायं होइ मुहं विज्झायग्गिं धमंतस्स ॥ १ ॥" '

इति सवैलक्ष्यं महासभाजनह्रीतास्तूष्णीकास्तस्थुर्गुरवः । कमलोऽपि यथागतमयासीत् । 'सुष्ठु हसितो जरद्गवः' इति[9] लोके जगर्ज । पितापि तं सुतस्य वृत्तान्तं जनपरम्परया जज्ञौ, लज्जया जग्लौ च । 'अयोग्यः' इति निश्चित्य सुतं नोपालेभे । कालान्तरे पुनः शीलसागराख्यान् सूरीन् नगरपरिसरमु[10]पागतान् कर्णाकर्णिकयाऽऽकर्ण्य भूयोऽप्युपहासार्थी महता वृन्देनोपतस्थे । सूरिभिरपि ज्ञातपूर्वसूरिविगोपनवृत्तान्तैः स समागच्छन् पूर्वोपविष्टसभास्तारवदनाद् निश्चिक्ये, 'अयं कमलः' इति । सविनयं विहि- ॥ २ ॥

१ ग. गच्छामि । २ ग. °लक्ष्य वादितः किं त्वं क° । ३ क. ख. प्याह स्म अ° । ४ क. ख. सोऽपि जगाद भ° । ५ क. ख. भगव° । ६ ग. °ब्दा ग° । ७ क. ख. आचार्यैः । ८ अव्यवस्थितस्य धर्मं मा खलु कथयेः सुष्ठ्वपि प्रियस्य । विच्छायं भवति मुखं विध्यातामिं धमतः ॥ १ ॥ ९ ग. °ति ज° । १० °रं प्राप्तान् ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तवन्दनविधिश्चायं दाण्डाजनिकोऽत्यन्तऋजुत्वाद् बोधार्होऽयमिति मन्यमानैर्भारतीचरणमणीनूपुरसिञ्जितमञ्जुना स्वरेणाललापे, 'अयि ! कमल ! श्रमणोपासक ! धर्मवर्ष्मणि कुशलं ते ?' । कमलोऽपि सान्तर्भक्तिरिव नम्रकन्धरो मधुरमवादीत्, 'देवगुरुप्रसादेन' इति । [1]आचार्यैरादिष्टम्, 'त्वयाऽधः पश्यताऽसद्व्याख्यानं सम्यक् चिन्तनीयम्' इति । पूर्वसूरिवृत्तान्तं विदित्वा त्विदमूचे तैः । कमलोऽपि तथाऽधोदृष्टि[2]स्तस्थिवान् । महतो गलतालुशोषादनु गच्छनायकैः कमलः पर्यनुयोजि, 'किमबोधि ?' इति । कम[3]लोऽपि प्रालापीत्, 'इत एवासन्ने नगरके कीटिकाः परिपाट्या दशोत्तरं शतं निरसार्षुः । अजगणं चाहम् । तदनु समुदायेन निःसरन्तीनां तासां परिगणनाय भग्नमनोरथोऽहं दुःस्थोऽस्थाम्' इत्येतदबोधि । श्रुत्वेदं सूरयो मुषितसर्वस्वा इव वीक्षापन्नाः पराङ्मुखीभू[4]र्याचिचिन्तन्, 'अपात्रमसौ वराक इत्येतावद् बु[5]द्धम्, परं वयमप्यबुद्धा एव, यदस्मिन्नेवंविधेऽधर्मरसिके प्रयस्यामः' इति । गतः कमलः । तदनु च केनापि सूरिणाऽनालप्यमानः पण्डितमानी नितरां प्रमत्तः परिबभ्राम । अपरेद्युश्च विपश्चिज्जनमनोवनवसन्तास्तत्र केऽप्याचार्याः समैयरुः । तैरपि सकर्णैराकर्णितः स कमलकथाताण्डवः । 'अस्माभिरवश्यं स बोधयितव्यः' इत्यन्तर्मनसं प्रतिश्रुतं च । वन्दनार्थमुपेयिवांश्च श्रीपतिः श्रेष्ठी समाला[6]पितः, 'पुत्रं ते बोधयिष्यामो वयम्' इति । इदं च श्रुत्वा सदैन्यं गद्गदमगादीत्, 'अलं भगवन् !, अलं पन्नगकरण्डकान्तः करप्रक्षेपेण, दुरात्मा हि स मे सूनुर्नोपदेशमर्हति ।

"अप्रशान्तमतौ शास्त्रसद्भावप्रतिपादनम् । दोषायाभिनवोदीर्णे शमनीयमिव ज्वरे ॥ १ ॥" '

---

१ ग. सूरिणादि° । २ ग. °स्तस्थौ । ३ ग. °लोऽप्यवक् । इ° । ४ ग. °याचिन्तयन् । ५ ख. ध्रुवं प° । ६ ग. °लापि पु° ।

P.P. Ac. Gunratnasuri M.S.  Jun Gun Aaradhak Trust

गुरवोऽप्यभिदधिरे, 'पूर्वगुरुद्वयाशातनाचकितो भवानेवं जागदीति, मा भैषीत्, ध्रुवं धर्मे स्थापयिष्यामो यदि भवितव्यता साहाय्यदा भवित्री ।' गुरूणामादरं दृष्ट्वा गृहं गतेन श्रेष्ठिना प्रहितः कमलः । उपसूरि समागत्य प्रणत्य निषण्णः । आचार्यैरपि गीतार्थैः 'कमलोऽयम्' इति प्रश्नाज्ञनाच्चावगत्य बभाषे, 'भद्र ! कमल ! जानासि किमपि कामरहस्यम् ?' । कमलः प्राह, 'किमहं वेद्मि, श्रीआराध्याः प्रसद्यादिशन्तु सारं किञ्चित्' । आचार्यैः प्रोक्तम्, 'प्रथमं कामरसार्थिना स्त्रीणां गुणा अवगन्तव्याः । गुणेष्वपि भावानुविद्धता प्रधानम् । यदाह;—

"आकारैः कतिचिद् गिरा कुटिलया काश्चित् कियन्त्यः स्मितैः, स्वैरिण्यः प्रथयन्ति मन्मथशरव्यापारवश्यं मनः ।
कासांचित्पुनरङ्ककेषु मसृणच्छायेषु गर्भे स्थितो, भावः काचपुटेषु पुष्करमिव प्रत्यक्षमुत्प्रेक्ष्यते ॥ १ ॥"

स्वाधीनपतिका, प्रोषितभर्तृका, खण्डिता, कलहान्तरिता, वासकशय्या, विरहोत्कण्ठिता, विप्रलब्धा, अभिसारिका चेति स्त्रीणामष्टावस्थाः । अन्यत्र्यवस्थापरस्त्री' इत्यादिकामकथाभिराक्षिप्तहृदयो जगाद कमलः, 'भगवन् ! क एवमन्यो वेत्ति वक्तुम् ? नीरसपूर्वसूरिवाग्विदग्धः पुनरुल्ललास मम मनस्तरुर्भवद्वचनामृतसारण्या' । 'ध्रुवं नित्यं वन्दक एष्यामि' इति प्रतिशुश्रुवे, यथागतं जगाम च । एवं कदाचिदर्थकथया, कदाचिदिन्द्रजालविनोदेन, कदाचित् प्रहेलिकाभिर्मासोऽत्यगात् । मासान्ते विहारावसरे प्रत्यासन्ने नियमग्रहणार्थमुपढौकमानेषु श्राद्धेषु कमलोऽपि सविनयमुपेत्य गुरूनापप्रच्छे । गुरवोऽप्यभाषिषत, 'भद्र ! विजिहीर्षवो वयम्, नियमं कमपि गृहाण । धर्मो हि पुरुषार्थेषु प्रकृष्टः । स च संयमसाध्यः । संयमश्च न नियमग्रहणम- ॥ ३ ॥



१ ग. प्रणिपत्य ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

न्तरेण' इति । कमलो विकटतापटुराख्यत्, 'भूयांसोऽपि नियमाः प्रागप्यासते, तद्यथा, उप[1]विश्य शयितव्यं नोर्ध्वैः १ निजवाञ्छया न मर्तव्यम् २ पक्वान्नेषु काचेल्लुकेष्टादि न भक्ष्यम् ३ क्षीरेषु मिहिरस्नुह्यादिक्षीराणि न पेयानि ४ अक्षतं नालिकेरं सर्वतो न मुखे क्षेप्यम् ५ गृहीत्वा परधनं महाकलहमन्तरेण न प्रत्यर्पणीयम् ६ ।' सूरिणोक्तम्, 'नायं हास्यावसरः, किमपि नियमरत्नं गृहाण ।' कमलोऽपि प्रत्यूचे, 'स्वामिन् ! प्रातिवेश्मिकस्य जरतः सदोद्द्योतितबिल्वपत्रसदृशीं कुलालस्यान्तिकाभिधस्य खलतिं दृष्ट्वा मया भोक्तव्यं, नान्यथा ।' सूरिभिः सर्वसाक्षिकं तस्य तं नियमं द्रढयित्वा विजह्रे । [2]कमलस्तन्नियमं किञ्चिल्लोकह्रिया, किञ्चिद्वाग्भङ्गपातकभयात्, किञ्चिदाचार्यसंपर्कजधर्मश्रद्धयाऽपीपलत् । एकदा राजकुलेऽपराह्णं यावद् रुद्धः । त्रुटितो निकेतनमेतो ग्रासग्रहणक्षणे तन्नियममस्मार्षीत् । उदस्थात् । [3]उदवसिताग्रमारुह्य यावन्नालोकते तावत् कुलालीमप्राक्षीत्, 'क्व अन्तिकः ?' इति । सापि तं मृदे खानिगतमजिज्ञपत् । अन्वगाच्च ज्ञातस्थानः कमलः । तावदेव निखनतस्तस्य हेमरत्ननिधिः प्रकटीबभूव । यावत् कटाहिकामाकृषति तावच्चन्द्रिकां दृष्ट्वा तुष्टः कमलोऽवदत्, 'दृष्टा दृष्टा' इति । [4]कुलालेन स्वभिया समेत्यायं गृहाभिमुखमियन् पादपातपूर्वं न्यगादि, 'स्वामिन् ! जीवय जीवय, मा गाढं वोचः, निधिकटाहिकाया अर्धं सर्वं वा तवास्तु ।' सोऽपि धूर्तशीर्षमणिर्लब्धकार्यपरमार्थस्तं तथा तथा [5]भीषयित्वा निधिं प्रायेण जग्राह । अनुकम्पामात्रेण तु तस्यापि ददौ । न खलु चौरिकाभागेन महार्थाः । निकेतनमागतो भुक्तः शयितः प्रातरुत्थितः सुस्थितसुधियाऽध्यासीत्, 'हास्यमात्रेण

---

१ क. ग. °विष्टस्य श° घ. °विष्टेन शयनीयं नो° । २ घ. स तं नि° । ३ उदवसितं=गृहम् । ४ ख. चक्रजीविना स्व° । ५ ग. भापयि° ।

Shri Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गृहीतो नियमो ममैवं पफाल । अवश्यं ज्ञानिभिर्गुरुभिरहमत्रापि नियमे निश्चलीकृतः । इहलोकेऽपि सुकृतं फलदम् । तस्मात् त एव गुरवः । तद्वदनाब्जकिञ्जल्कधर्मो मम शरणम् । अलं मिथ्यादृक्त्वेन ।' इत्यवबुध्य हृद्बुद्ध्या कमलेन ते गुरवो विज्ञप्तिपूर्वं निमन्त्रिताः । धर्मो द्वादशव्रतमूलो लले, सिषेवे । कमलो नाकमगात् । ततश्च्युतः सेत्स्यति ।

॥ इति कमलश्रेष्ठिकथा ॥ १ ॥

---

**सुष्ठूक्तमपि वैधेयमध्ये स्यादसमञ्जसम् । बधिरस्य कुटुम्बस्य कथाऽत्रार्थे निशम्यताम् ॥ १ ॥**

सुग्रामे ग्रामे बधिरकुटुम्बं वसति । वृद्धौ श्वश्रूश्वशुरौ, युवानौ वधूवरौ । सर्वेऽपि बधिराः । श्वश्रूः सूत्रं कर्तयति, राध्नाति च । श्वशुरः कणादिकं रक्षति । वधूः क्षेत्रे भक्तं नयति । वधूपतिस्तु हलं कर्षति । एकदा हलं कृषन् स युवा मार्गासन्नायातैः पान्थैः पृष्टः, 'अयमध्वाऽमुकं ग्राममुपतिष्ठते नवा ? ।' स तु हालिकः प्रत्यवोचत्, 'रे परधनग्रहणग्रहिलाः ! मे स्वगृहजातपोषिताविमौ वृषभौ, किं ब्रूत २ 'मदीयाविमौ' इति ।' तदाकर्ण्य 'वातकी पिशाचकी वाऽयम्' इत्यवगणय्य स्वच्छन्दमगच्छन्नेते । मध्याह्नोद्देशे तत्पत्नी भक्तमानिन्ये । भोक्तुं निषण्णः । स पत्न्याः पुरः श्मश्रुस्पर्शपूर्वं 'मयैवं ते दुष्टाः प्रगल्भतया निरस्ताः' इति स्वात्मानं स्फोरयन्नवोचत् । पत्न्योक्तम्, 'भक्तं बहुलवणमलवणं वा, रूक्षं वा सस्नेहं वा, अल्पं वा बहुलं

---

१ क. ग. अये अमुकः ग्रा° । २ ख. सधर्मचारिण्याऽवाचि भ° ।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वा, कालप्राप्तं वाऽकालप्राप्तं वा; मम का चर्चा, तवैव जननी[1] जानाति, तामेव तर्जय ।' गता साऽधिश्वश्रु साक्षेपं स्वोत्प्रेक्षितं तत्तादृशमूचुषी । सापि प्रेत्यवक्[2], 'त्रुटितकपोला सूक्ष्मं वा बादरं वा सूत्रं कर्तयामीत्यत्र का चर्चा ? स्थूलेनापि जरतः कुटुम्बपतेः शाटको भावी, ननु धिग् युष्मान् ।' जरती च जरन्तं साश्रुमुखी चित्तकल्पितं जल्पितवती । जरन्नपि सभ्रूक्षेपं मङ्क्षु प्रलपति[3] स, 'यदि मम रक्षत एकोऽपि कणो विनश्यति तदा फालां गृह्णामि, तप्तकपर्दिकामाकृषामि । वृद्धास्तु यथा तथा विगोपनीया इति वः कुटुम्बाचारः ।' एवं चैकोऽन्यत्, एवमितर इतरद् यत्र बुद्ध्यसमञ्जसं वक्ति तत् प्राज्ञेन नो वाच्यम् ॥

॥ इति बधिरकुटुम्बकथा ॥ २ ॥

---

सर्वेऽपि लोभिनो यत्र मन्दबुद्धिजनाश्रिताः । तत्र नैवानुगैर्भाव्यं तां[4] श्रुत्वा मौदिकीं कथाम् ॥ १ ॥

सुघोषग्रामे सर्वपशुस्तापस एकोऽस्ति । तस्य च वालुङ्की–वार्ताकी–वृन्ताकी–हारहूरादिवल्लीवनाकुला वाटिकाऽस्ति । तां स दत्तावधानो रक्षति । एकदा धेनोः पदानि विश्वद्र्यञ्चि[5] प्रैक्षिष्ट । 'केयं[6] गौर्मद्वाटीं चरति' इति सरोषं दध्यौ । निशि जाग्रत्सावधानो यष्टिहस्तस्तस्थौ । तावत् तत्र गौरेका दिवोऽवतीर्य वल्लीः सलीलं ग्रसते । तापसस्तत्पुच्छेऽलागीत् । तावदेषापि गगने पक्षिणीवोड्डीयोड्डीय यान्ती प्राकारवेष्टितं सौधमेकं स्वःस्थं ययौ सतापसा । अन्तःसौधं तस्थुषी तापसमाकार्यागदत्,

---

१ क. ग. माता । २ ख. प्रतिबभाण । ३ क. ग. अवदत् । ४ ख. श्रुत्वा तां मौ° । ५ पृथक् पृथग् यान्ति । ६ क. ग. कथं गौ° ।

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

'भोस्तापस ! कामधेनुरहम् । मे गृहमिदम् । सर्वपुष्पपत्रफलधान्यपयःप्राप्तिसुस्थाऽपि गोस्वभावसुलभया क्षेत्रान्तरचारेच्छया नुन्ना तव शाड्वलवनाञ्चितां वाटीं प्रतिनिशं गच्छामि । खादे च तस्याः पत्रफलादीनि । त्वं नित्यं मल्लाङ्गूललग्नो मम सदने मोदकानद्याः । अहं तु ते वाटीमेष्यामि ।' इत्युक्त्वा तेन मोदकानचखादत् । तुष्टस्तं दिनं तत्रैव स्थित्वा निशि गोपुच्छलग्न उत्तीर्य स्वमठीमाटीत् । यदा यदा मोदकेच्छा, पूर्वोक्तयुक्त्या मनोरथं पिपर्ति । एकदा सुरभीं जगौ, 'यद्याज्ञा ते भवेत् तदा निजपरिवारं तव लड्डुकातिथीकरोमि । तव प्रसादपात्रतां मम प्रतियन्तु ते । तच्च मिष्टं यद् बहुभिर्दष्टम् । न च दातुमसमर्थाऽसि ।' अमरधेन्वापि प्रतिपेदे, ऊचे च, 'त्वं ममाधिपुच्छं विलगेः , त्वच्छिष्यस्त्वत्पदयोः, अन्यस्त्वन्यतरपदयोः, इत्येवं परम्परया लग्नाः स्वच्छन्दमेयृत, को दोषः ? ।' तुष्टस्तापसः । प्राप्तः परिजनं, यजमानान्, अन्यानपीष्टानादिक्षत्, 'सर्वैरपि प्रगुणैः स्थेयम्, कामगवीसिंहकेसरा[1] भोक्तव्याः सन्ति ।' ततस्तेऽपि पशवो लुब्धा अमोदिषत, अस्थुश्च तथास्थाः । वेलायां गौरागात् । पुच्छे ससञ्ज भरटः । भरटांह्रिद्वये शिष्यकः । परम्परया तद्वृन्दं च । एवं नभोगमने प्रस्तुते केनापि पृष्टः, 'गुरो ! ये मोदकाः स्वामिभिराददिरे ते कियत्स्थूलाः ? ।' भरटस्तत्त्वाज्ञः करौ प्रसार्यादीदृशत्, 'एतावन्मात्राः' इति । परित्यक्ते पुच्छे सर्वे पेतुः । चन्द्रिकाङ्किताङ्गा विजुगुपुर्मम्रुश्च ॥

॥ इति लोभे मोदककथा ॥ ३ ॥

---

1 मोदकनामैतत् ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अगुणज्ञेषु गुणवान् दर्शयन्नात्मनो गुणान्। कुग्रामपामरैर्व्यासः परितुष्टैः कदर्थितः ॥ १ ॥

गूर्जरदेशे उत्तमनगरे कश्चिद् व्यासः श्रुतिवेदपुराणसूक्तावलीविदुरः सुस्वरो वक्ता प्रौढवयाः कविर्वादी वैयाकरणः स्फुरति। तेनानेके राजानो रञ्जिताः। एकदा विपुलविज्ञत्वमदादेवं चिन्तितम्, 'मरुषु लोकाः स्थूलबुद्धयः श्रूयन्ते। ते दुर्बोधाः, तानप्यहं बोधयिष्यामि।' इत्याशयात् तद्देशगमनसामग्रीं सूत्रयन् मित्रैरवादि, 'व्यासपादाः कं देशं यियासवः?।' स आह, 'मरून् यियासामः।' मित्रैरवादि, 'व्यास! ते लोकाः पशवः, त्वद्बुद्ध्या न गृह्यन्ते। उक्तं च;—

"व्युत्पत्तिरावर्जितकोविदापि, न रञ्जनाय क्रमते जडानाम्। न मौक्तिकच्छिद्रकरी शलाका, प्रगल्भते कर्मणि टङ्किकायाः ॥१॥"

इति वार्यमाणोऽपि वातकीव जगाम। तत्र देशे कंचिद् महान्तं ग्रामं ददर्श। तत्र प्रविवेश। क्वचिदपि गृहे वृद्धामेकां कृषीवलजातीयामाशीर्वादयामास, उच्चैरुच्चैस्तास्ताः कथा अकथयच्च। उत्थाय गतः। किंकरेणैकेन सह निजद्रव्यव्ययेन बुभुजे। दिनान् पञ्चसप्तानुपजल्पति गत्वा गत्वा जगर्ज। यदा यदा व्यासो गाढस्वरेण वक्ति तदा तदा जरत्यश्रूणि मुञ्चति। व्यासो जहर्ष 'तुष्टेयं दास्यति स्वम्' इति। एकदा वृद्धा सा चतुरो निजपुत्रान् स्थूलस्कन्धान् मूर्खानूचे, 'वत्साः! एको विप्रोऽन्यदेशीयो रोगार्तः समागात्। रोगश्च तस्य सोऽस्ति योऽस्मद्वत्सतर्या आसीत्, येन तारं तारं पूत्करोति। तं च दृष्ट्वा भृशमहं दूये, रोगार्तोऽयमाश्रितश्च।' तेऽप्याहुः, 'अस्माभिरपि सोऽत्यारटन् शुश्रुवे, चिकित्स्योऽयं वराको दम्भ्यमाने उदरे' इति। वृद्धाऽऽह,

---

१. क. ग. °न्तो दु°॥

'सुष्ठु मन्त्रितम् ।' द्वितीयदिने कथार्थं निषण्णं व्यासं चत्वारः संभूय तत्सुताः प्रबद्धपरिकराः पातयित्वोपरि उपविश्य सग्रहं कृत्वा डम्भयन्ति । व्यासो बुंबूयति । तैरुचानं, 'मर्मणि डम्भो न लगति । लग्ने हि सुखेन नेत्रे निमील्य तिष्ठेत् ।' व्यासोऽपि दक्षतया मीलितनेत्रोऽस्थात् । पुनस्तैरुक्तम्, 'अत्र बाढं चम्प्यताम्, तप्तलोहो मर्मणि लगन्नस्ति ।' एवं स्वच्छन्दं कदर्थयित्वा मुक्तः । डम्भव्रणे रूढे सति गृहमगात्[1] । लोकैरुक्तं, 'किं तत्र गत्वाऽर्जितम् ?'। तेनापि साट्टहासं दर्शितो डम्भः 'इदं पदकम्' इति । कथां सर्वां कथयित्वेष्टानेवमशिषत्;—

"गुणा गुणज्ञेषु गुणीभवन्ति, ते निर्गुणं प्राप्य भवन्ति दोषाः । सुस्वादुसुस्वच्छजला हि नद्यः, पयोनिधिं प्राप्य भवन्त्यपेयाः ॥१॥"

अस्थाने गुणो न प्रकाश्यः ॥

॥ इति व्यासकथा ॥ ४ ॥

---

परनिन्दा महापापं परपापान्यहो ! यतः । अकृतान्यपि लिम्पन्ति तत्कालं जरतीं यथा ॥ १ ॥

शालिग्रामे सुन्दरश्रेष्ठी दाता कारुणिकः ।

"अतिथिर्यत्र भग्नाशो गृहात् प्रतिनिवर्तते । स तस्य पातकं दत्त्वा पुण्यमादाय गच्छति ॥ १ ॥"



---

१ ख. स्वागारम्° ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

इत्यादिशास्त्रविद् दीनानाथदरिद्ररोगिपथिकानामागतानां तक्रदधिघोलान्नवसनाश्रयतैलघृताभ्यङ्गदानेनोपकाराय यतते । ततश्च कीर्तिर्ननर्त दूरादपि ।

"प्रियः प्रजानां दातैव न पुनर्द्रविणेश्वरः । आगच्छन् वाञ्छयते लोकैर्वारिदो न तु वारिधिः" ॥ १ ॥

एका तु तत्प्रातिवेश्मिकी वृद्धा स्त्री निन्दति, 'अयं वैदेश्यान् भोजयति । भोजयित्वा कांश्चिच्चाधिगर्ते क्षिपति, धनलोभात् । केषांचन न्यासान् न प्रतीच्छति, ते तु विदेशे म्रियन्ते; अस्योत्सवः । पराचीं गृह्णाति, सूचीं ददाति । ज्ञातोऽयं धर्मी ।' एकदा निशि क्षुधार्तः कार्पटिकस्तृष्णातुरश्च तस्य गृहमागात् । तदा किंचिद् भोज्यं पेयं च नाभूदेव । स तु दानव्रती, एकाकी आभीरीगृहात् तक्रमानिनाय, तं चापीप्यत् । स ममार । तद्धि तक्रमुद्घाटितमुखायामाभीरीशिरःस्थाल्यां शकुनिकाऽधोमुखधृतमहाहिमुखगलितगरलमिलितमासीत् । प्रातः कार्पटिकं मृतं दृष्ट्वा वृद्धा जहर्ष 'दृष्टं दातुश्चरितम्, विषदोऽयं ग्रन्थिकालोभात् ।' अत्रान्तरे सा कार्पटिकहत्या भ्रमति, विचारयति च 'कस्याहं लगामि तावत्? विशुद्धात्मा दाता, सर्पोऽप्यज्ञः परवशश्च, शकुनिका तु सर्पाशनधर्मा, आभीरी तु सर्वथाऽज्ञा; तस्मात् को मया ग्राह्यः?' इत्येवं विमृश्य तां निन्दापरां डोकरिकां जग्राह हत्या । सद्यः सा श्यामा कुब्जा कुष्ठिनी कुस्वरा बर्बराऽऽसीत् । हत्यया खस्थया जगदे सा कथा । सूक्तं चेदमाचख्ये लोकस्य शृण्वतः;—

---

१ ख. किंचन । २ ग. °धोधृतमुखम° ।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

"कुम्भभिन्नशकलेन किल्बिषं, बालकस्य जननी व्यपोहति । कण्ठतालुरसनाभिरस्यता, तत् खलेन विजिता हितार्थिनः ॥ १ ॥" इति ।
'इयं वृद्धा पातकिनी, निन्दकत्वात् । दाता तु शुद्धः' । इति श्रुत्वा लोकस्तत्त्वं बुद्ध्वाऽनिन्दकः प्रायोऽभूत् ॥

॥ इति निन्दककथा पुराणोक्ता[1] ॥ ५ ॥

---

अतिलोभो न कर्तव्यो लोभं नैव परित्यजेत् । अतिलोभाभिभूतात्मा[2] बुद्धिरन्धलतां गता ॥ १ ॥

एकस्मिन् ग्रामे जरत्यौ परस्परं सख्यौ बुद्धिसिद्धिनाम्न्यौ सर्वदा दुःस्थिते अभूताम् । तस्माच्च ग्रामाद् बहिः साधिष्ठानोऽभीप्सितधनदाता प्रथितो लोके यक्षोऽस्ति । एकदा बुद्धिनामा स्थविरा तं यक्षं सम्यगाराराध, तद्यथा, त्रिसन्ध्यमपि देवकुलं प्रममार्ज, नित्यमपूर्वं नैवेद्यं ढौकयामास । यक्षस्तुतोष जजल्प च, 'तुष्टोऽस्मि ते वृद्धे! याचस्व किञ्चित् ।' वृद्धाप्युवाच 'यदि तुष्टस्तदा तद् देहि येन मे निश्चिन्ता वृत्तिर्भवति ।' यक्षोऽवोचत् 'हे वृद्धे! निश्चिन्ता भव, एकैकं दीनारं त्वं मदंह्रिस्थं[3] दिने दिने प्राप्स्यसि' । तदादि सा दिने दिने दीनारमेकैकं लभते[4] । अधिकाधिकामृद्धिं बभजे[5] । पूर्वं दण्डीखण्डनिवसना, तदा दुकूलानि पर्यधात् । पूर्वमलब्धकाञ्जिकलवाक्वथितानि, तदा स्निग्धानि दुग्धानि भुङ्क्ते स्म । पूर्वं तृणकुटीरकगृहा, तदा गवाक्षशालाभासुरे सौधेऽवात्सीत् । पूर्वं खण्डनदलनजलवहनादिभिः परगृहे कार्यकरा, तदानीं दासीभिः सुरूपाभिरसेवि । सिद्धिस्तादृशीं बुद्धेः

---

१ ख. पुराणशास्त्रख्याता कथा, घ. पौराणी कथा । २ ख. °भिपूता हि बु° । ३ ख. °ह्रिमूले दि° । ४ ख. लेभे । ५ ख. बभाज ।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

संपदं दृष्ट्वा द्वेषिणी व्यचिन्तयत् 'कुतोऽस्या ईदृग् विभूतिः? भवतु, अस्यास्तावदहं सखी, विश्वास्य प्रक्ष्यामि।' इति विचिन्त्य सिद्धिरुपबुद्धि ययौ। 'कुतस्तवेयं समृद्धिः?' इति पृष्टवती। बुद्धिरप्यार्यहृदया यक्षतोषोद्भवं विभवमचकथत्। सिद्धिः स्वस्थानं गता। यक्षं सविशेषमाराधयामास देवकुले सोपानमण्डलसमारचनाङ्गणस्वस्तिकस्नपनविविधपुष्पपूजनधूपोत्क्षेपणनैवेद्यदानतपश्चरणादिभिः क्रियाभिः। एवमहर्निशं सेव्यमानः स यक्षः सिद्धिमुवाच, 'तुष्टोऽस्मि ते पुण्यवति! याचस्व यथेच्छम्।' अथ सा यक्षमुवाच 'यन्मे सख्यै त्वया दत्तं तन्मे द्विगुणं देहि।' 'एवमस्तु' इत्यभिधाय यक्षोऽलक्ष्योऽभूत्। सिद्धिरपि बुद्धेः सकाशादधिकविभूतिभरेण बभ्राजे। बुद्धिस्तामधिकां दृष्ट्वा पुनर्यक्षं सिषेवे। यक्षोऽपि तस्यै तद्द्विगुणं धनं ददिवान्। सिद्धिः पुनर्यक्षमाराधयत्। स तुष्ट ऊचे च 'याच याच।' एवं यक्षवचः श्रुत्वा सिद्धिरत्यन्तद्वेषान्धा दध्यौ 'यत् किञ्चिदहं प्रार्थयिष्ये, बुद्धिर्यक्षमाराध्य तद्द्विगुणं प्रार्थयिष्यते; स्पर्धं च महान्तं वहति मया सह; तस्मात् तत् किमपि याचे यस्माद् द्विगुणं याचितं ध्रुवमस्यै महतेऽनर्थाय स्यात्।' इति धिया साऽयाचीत्, 'यक्ष! मे चक्षुः काणं कुरु'। यक्ष आख्यत् 'एवमस्तु'। काणा सिद्धिरासीत्। सातिशयर्द्धिः सिद्धिरभ्रमत्। बुद्धिस्तां समृद्धिं पश्यन्ती पुनर्यक्षमाराध्य सिद्धेर्द्विगुणं ययाचुषी। यक्षः 'ओम्' इत्याह च। सा चान्धाऽभूद् बुद्धिः॥

॥ इत्यतिलोभे बुद्ध्यन्धत्वकथा ॥ ६ ॥

---

१ ख. °ऽमुष्या ईदृशी वि°। २ ख. °क्षं विज्ञापयामास य°। ३ ग. °बुद्धिक°।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

आराधयेद् महाभक्त्या बुद्धिमन्तं न कोपयेत् । बुद्धिमान् सर्वकार्येषु सहः स्याद्रोहकादिवत् ॥ १ ॥

मालवदेशे उज्जयिनी नाम पुरी । तस्याः समीपवर्ती कश्चिद् नटानामेको ग्रामः । तत्र भरतो नाम नटः । तस्य भार्या मृताऽभूत् । तनयश्चास्य रोहकाभिधोऽद्यापि बाल्यवयाः । ततः सत्वरमेव स्वस्य स्वतनयस्य च शुश्रूषाकरणायान्यां स्त्रीमानिन्ये । सा च रोहकस्य सम्यगन्नपानादिभक्तिं न करोति । ततो रोहकेण सा प्रत्यपादि 'मातः ! न मे त्वं सम्यग् वर्तसे, ततो ज्ञास्यति' इति । ततः सा सेर्ष्यमाह, 'रे रोहक ! किं करिष्यसि ?' । रोहकोऽप्याह 'तत् करिष्यामि येन त्वं मम पादयोरागत्य लगिष्यसि' इति । ततः सा तमवज्ञाय तूष्णीमासीत् । रोहकोऽपि तत्कालादारभ्य गाढसंजाताभिनिवेशोऽन्यदा निशि सहसा पितरमेवमभाणीत्, 'भो भोः पितः ! एष पलायमानः पुरुषो याति' । तत एवं बालकवचः श्रुत्वा पिताऽशङ्किष्ट 'नूनं विनष्टा मम भार्या' इति । तत एवमाशङ्कावशात् तस्यामनुरागः शिथिलीबभूव । ततो न तां सम्यक् संभाषते, नापि विशेषतस्तस्यै पुष्पताम्बूलादि प्रयच्छति, दूरे विश्वासकथादि । ततस्तया चिन्तितम्, 'नूनमिदं बालकचेष्टितम्, अन्यथा कथमकाण्ड एव दोषाभावे पराङ्मुखो जातः पतिः ?' । ततो बालकमवादीत् 'वत्स ! किमिदं त्वया चेष्टितम्, तव पिता मे संप्रति पराङ्मुखी-भूतः' । रोहक आह 'किमिति तर्हि सम्यग् न वर्तसे ?' । तयोक्तम् 'इत ऊर्ध्वं सम्यग् वर्तिष्ये' । ततो बालक आह 'भव्यं

१ घ. एते रोहकादिबुद्ध्यधिकारा अष्टौ नन्द्यध्ययनवृत्तौ श्रीमलयगिरिकृतायां सन्तः पूज्यपं॰ लक्ष्मीभद्रगणिपादलिखितप्रभावकचरित्रोद्धारादिपत्रेषु लिखितत्वाद् न लिखिताः ।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तर्हि, खेदं मा कृथाः, तथा करिष्ये यथा मे पिता तथैव त्वयि वर्तते'। ततः सा तत्कालादारभ्य सम्यग् वर्तितुं प्रवृत्ता। रोहकोऽप्यन्यदा निशि निशाकरप्रकाशितायां प्राक्तनशङ्कापनोदाय बालभावं प्रकटयन् निजच्छायामङ्गुल्यग्रेण दर्शयन् पितरमेवमाह 'भोः पितः! एष पुरुषो याति २'। तत एवमुक्ते स पिता परपुरुषप्रवेशाभिमानतो निष्प्रत्याकारं कृपाणमुद्गीर्य प्राधावत्, 'रे कथय क्व याति' इति। ततः स रोहको बालक्रीडां कुर्वन्नङ्गुल्यग्रेण निजच्छायां दर्शयति, 'पितः! एष नरो याति'। ततः स पिता व्रीडित्वा प्रत्यावृत्तश्चिन्तयति स्म स्वचेतसि, 'प्राच्योऽपि नर एवंविध एवासीत् इति धिग् बालवचनादप्रियं मया भार्यायां चिन्तितम्'। ततः पश्चात्तापाद् गाढतरमस्यामनुरक्तो बभूव। रोहकोऽपि 'मयाऽस्या विप्रियं कृतमास्त इति कदाचिदेषा विषादिना मारयिष्यति' इति विचिन्त्य पित्रैव सह सदा भुङ्क्ते, नैकाकी।

अन्यदोज्जयिनीं पित्रा सह गतः। स्वःपुरमिवोज्जयिनीं दृष्ट्वा विस्मितमना यथावत् तां पर्यभावयत्। ततः पित्रैव सह पुरीतो निर्यातुमारेभे। पिता च 'मे किमपि विस्मृतम्' इति रोहकं सिप्रानदीतटेऽवस्थाप्य तदानयनार्थं शीघ्रं पुरीं प्रविष्टः। रोहकोऽपि तत्र सिप्राभिधसिन्धुसैकते बालचापलवशात् सप्राकारां परिपूर्णां पुरीं सिकताभिरालिखत्। इतश्च राजाऽश्ववाहनिकायामश्वं वाहयन्नैकाकी तत्रैवागतः। तं च स्वालिखितनगरीमध्येन समागच्छन्तं रोहकोऽवादीत्, 'भो राजपुत्र! माऽनेन पथा गमः'। तेनोक्तम्, 'किमिति?'। रोहक आह, 'किं त्वं राजकुलमिदं न पश्यसि?'। ततो राजा कौतुकवशात् सकलामपि नगरीं

---

१ क. ग. भृशमासक्तोऽभूत्।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तदालिखितामैक्षिष्ट । पप्रच्छ च तं बालम्, ‘रे एकदा त्वया पुरी पूर्वं दृष्टा नवा?’ । रोहक आह, ‘नैव कदाचित्, केवलमहमद्यैव ग्रामादिहागतः’ । ततश्चिन्तयामास राजा, ‘अहो बालकस्य प्रज्ञातिशयः’ । ततः पृष्टो रोहकः ‘वत्स! किं ते नाम, को वा ग्रामः?’ इति । तेनोक्तम्, ‘रोहको मे नाम इति, प्रत्यासन्ने पुरोग्रामे वसामि’ इति । अत्रान्तरे समागतो रोहकस्य पिता । स्वग्रामं प्रति चलितौ द्वावपि । राजापि स्वस्थानमगात्, चिन्तितं च ‘ममैकोनानि मन्त्रिणां पञ्च शतानि सन्ति, यदि सर्वमन्त्रिमण्डलमूर्धाभिषिक्तो महाप्रज्ञातिशायी परमो मन्त्री स्यात्, ततो मे राज्यं सुखेनैवैधते । बुद्धिबलोपेतो हि राजा [1]प्रायः शेषबलैरल्पबलोऽपि न परा[2]जीयते, परांश्च [3]सुखेन विजयते ।’ इति विमृश्य कियद्दिनानन्तरं रोहकबुद्धिपरीक्षणार्थं सामान्यतो ग्रामप्रधानपुरुषानुद्दिश्यैवमादिष्टवान्, यथा,–‘युष्मद्ग्रामस्य बहिः शिला महती वर्तते, तामनुत्पाट्य राजयोग्यमण्डपाच्छादनं कुरुत’ । तत एवमादिष्टे सकलोऽपि ग्रामो राजादेशमशक्यं परिभावयन्नाकुलीभूतमानसो बहिः सभायामेकत्र मिलितवान् पृच्छति स्म परस्परं ‘किमिदानीं कर्तव्यम्? दुष्करो राजादेशोऽस्माकमापतितः, तदकरणे महानर्थो भावी’ । एवं च चिन्तया व्याकुलानां तेषां मध्यंदिनमागतम् । रोहकश्च पितरमन्तरेण न भुङ्क्ते । पिता च ग्राममेलापके मिलितोऽस्ति । ततः स क्षुधार्त्त उपपितृ गत्वा रोदितुं प्रावर्तत, ‘पीडितोऽहमतीव क्षुधया, ततः समागच्छ गृहं भोजनाय’ इति । भरतः प्राह, ‘वत्स! सुखितोऽसि त्वम्, न किमपि ग्रामकष्टं वेत्सि’ । स प्राह ‘किं तत्?’ इति । ततो भरतो राजादेशं सविस्तरमचकथत् । ततो

---

१ क. ग. प्रायोऽनन्यबलो° । २ ख. °जयस्थानं भवति प° । ३ ख. राज्ञो लीलया वि° ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

निजबुद्धिप्रागल्भ्यवशाच्छीघ्रं कार्यसिद्धिं ज्ञात्वा तेनोक्तम्, 'माऽऽकुलीभवत यूयम्, खनत शिलाया राजार्हमण्डपनिष्पादनायाधस्तात्, स्तम्भांश्च यथास्थानं निवेशयत, भित्तीश्चोपलेपनादिना प्रकारेण प्रगुणीकुरुध्वमतिरमणीयाः' । तत एवमुक्ते सर्वैरपि नरैः 'भव्यम्' इति प्रतिपन्नम् । गतः सर्वोऽपि लोकः स्वगृहं भोक्तुम् । भुक्त्वा च समागतः शिलोद्देशे । प्रारब्धं तत्र । कियद्दिनैश्च निष्पादितः पूर्णो मण्डपः । कृता च शिला तस्याच्छादनम् । निवेदितं च राज्ञे नियुक्तैः पुरुषैः, 'देव ! निष्पादितो ग्रामेण देवादेशः' । राजाह 'कथम्' इति । ततस्तैः सर्वोऽपि मण्डपविधानप्रकारः प्रोक्तः । राजा पप्रच्छ, 'कस्येयं बुद्धिः ?' । तैरुक्तम्, 'भरतसुतस्य रोहकस्य' ।

ततः पुनरपि राजा रोहकबुद्धिपरीक्षार्थं मेण्ढकमेकं प्रेषितवान्, 'एष यावत्पलप्रमाणः संप्रत्यस्ति, पक्षातिक्रमेऽपि तावत्पलप्रमाण एव समर्प्यः, न न्यूनो नाप्यधिकः' इति । तत एवं राजादेशे समागते लोकः सर्वोऽपि तथैवार्तीभूयैकत्र मिलितवान्, सगौरवमाकारितो रोहकः । आभाषितश्च ग्रामप्रधानैः पुरुषैः, 'वत्स ! प्राच्यमपि दुष्टराजादेशसिन्धुं त्वयैव निजबुद्धिसेतुबन्धेन समुत्तारितः सर्वोऽपि ग्रामः, संप्रत्यपि प्रगुणीकुरु स्वबुद्धिसेतुम्, येनास्यापि राजादेशसिन्धोः पारं गच्छामः' । तत उवाच रोहकः 'वृकमासन्नं कृत्वा मेण्ढकमेनं यवसदानेन पुष्टीकुरुत, यवसं हि भक्षयन्नेष दुर्बलो न भविष्यति, वृकं च दृष्ट्वा न वृद्धिमाप्स्यति' इति । ततस्ते तथैव चक्रुः । पक्षातिक्रमे च राज्ञस्तं समर्पयामासुः । तोलने तावत्पलप्रमाण एव जातः ॥

१ क. ग. °ना प्रगु° । २ ख. °लाप्रदे° । ३ तस्य= मण्डपस्य । ४ क. ग. तैः व्र° । ५ क. ग. लोकः ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ततः पुनरपि कियद्दिनानन्तरं राज्ञा कुर्कुटः प्रेषितः । 'एष द्वितीयकुर्कुटं विना योधयितव्यः' इत्येवमायाते राजादेशे तथैव मिलितः सर्वो लोकः । आकारितश्च रोहकः । कथितश्च तस्य राजादेशः । ततो रोहकेणादर्शो महाप्रमाण आनायितः, विमृष्टश्च भूल्या । ततो धृतः पुरो राजकुर्कुटस्य । ततः स राजकुर्कुटः प्रतिबिम्बमात्मीयमादर्शे दृष्ट्वा 'मत्प्रतिपक्षोऽयमपरः कुर्कुटोऽढौकत' इति मत्वा साहंकारं योद्धुं प्रवृत्तः । जडचेतसो हि प्रायस्तिर्यञ्चो भवन्ति । एवं चापरकुर्कुटमन्तरेण योधिते राजकुर्कुटे विस्मितः सर्वोऽपि लोकः । ततोऽभिनिवेदितं राज्ञः ॥

ततः पुनरपि कियद्दिनानन्तरं राजाऽऽदेशं प्रेषितवान् 'भवद्ग्रामस्य सर्वतोऽतीव रमणीया वालुका विद्यते, ततः स्थूलवालुकामयाः कतिपयदवरकाः कृत्वा प्रेष्याः' इति । एवं राजादेशे समागते सर्वोऽपि लोकस्तथैव मिलितः । पृष्टश्च रोहकः । तेन प्रत्युत्तरमदायि 'नटा वयं नृत्यमेव विद्मो न दवरकादि, राजादेशश्चावश्यं कर्तव्यः, ततो 'बृहद् राजकुलम्' इति चिरन्तना अपि कतिचिद् वालुकामया दवरिका भविष्यन्ति, इति तन्मध्यादेकः कश्चित् प्रतिच्छन्दभूतः प्रेषणीयः, येन तदनुसारेण वयमपि वालुकामयान् दवरकान् कुर्मः' । ततो निवेदितमेवं राज्ञो नियुक्तैः । राजा च निरुत्तरीकृतस्तूष्णीमास्ते ।

ततः पुनरपि कतिचिद्दिनानन्तरं जीर्णहस्ती रोगग्रस्तो मुमूर्षुर्ग्रामे प्रेषितो यथा–'अयं हस्ती 'मृतः' इति न निवेदनीयः, अथ च प्रतिदिनमस्य वार्ता कथनीया, अकथने ग्रामस्य महान् दण्डः' । इत्यादेशे समागते मिलितः सर्वलोकः । पृष्टश्च रोहकः ।

१ ख. °वं संप्राप्ते रा° । २ ख. ततो भूयोऽपि दिनकतिपयातिक्रमे रा° । ३ क. ग. कियन्त्यो द° । ४ क. ग. °शे सर्वो° ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ततस्तेनोक्तम्, 'दीयतामस्मै यवसः, पश्चाद् यद् भविष्यति तत् करिष्यामि'। ततो रोहकादेशाद् दत्तो यवसस्तस्मै। रात्रौ हस्ती च पञ्चत्वमुपागतः। ततो रोहकवचनेन ग्रामेण गत्वा राज्ञे निवेदितम्, 'देव! अद्य हस्ती न निषीदति, नोत्तिष्ठति, न कवलं गृह्णाति, नापि नीहारं करोति, नाप्युच्छ्वासनिःश्वासौ करोति, किं बहुना, कामपि सचेतनचेष्टां न तनोति'। ततो राज्ञोक्तम्, 'किं मृतः करी?'। ततो ग्राम आह 'देव! देवपादा एवं ब्रुवते, न वयम्' इति। तत एवमुक्ते राजा मौनमाधाय स्थितः। आगाद् ग्रामलोकः स्वगृहम्॥

पुनरपि 'युष्मद्ग्रामे स्वच्छस्वादुजलपूर्णः कूप इह प्रेष्यः शीघ्रम्' इत्यादिष्टो ग्रामो रोहकं पृष्टवान्। स उवाच 'एष ग्राम्यः कूपः, ग्राम्यस्वभावाद् भीरुः स्यात्, न च स्वजातीयमन्तरेण विश्वासमुपगच्छति, ततो नागरिकः कश्चिदेकः कूपोऽत्र प्रेष्यः, येन तत्रैष विश्वस्य तेन सहागच्छति'। इति निरुत्तरीकृत्य प्रेषिता राजनियुक्ताः। तैर्निवेदितं च राज्ञः। ततः स्वचित्ते रोहकबुद्ध्यतिशयं मत्वा तूष्णीं स्थितः॥

पुनरपि कियद्दिनानन्तरं 'ग्रामस्य पूर्वदिग्वनखण्डः पश्चिमायां कर्तव्यः' इति राज्ञाऽऽदिष्टे ग्रामो रोहकबुद्धिं प्राप्य वनखण्डस्य पूर्वस्यां दिशि स्थितः, ततोऽभूद् ग्रामस्य पश्चिमदिशि वनखण्डः। ततो विज्ञप्तं राज्ञे॥

पुनरपि कालान्तरे 'वह्निं विना पायसं पक्तव्यम्' इत्यादिष्टे ग्राम एकत्र मिलित्वा रोहकमपृच्छत्। तेनोक्तम्, 'तन्दुलानतीव

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

जलभिन्नान् कृत्वा रविकरसंतप्तकरीषपलालादीनामूष्मणि तन्दुलपयोभृता स्थाली स्थाप्या । तैस्तथैव कृतम् । जातं परमान्नम् । विज्ञप्तं राज्ञे । विस्मितं च तच्चेतः ॥

ततो राज्ञा रोहकस्य बुद्ध्यतिशयं मत्वा तदाकारणायादिष्टम् 'येन बालकेन मदादेशाः सर्वे प्रायः स्वबुद्धिवशात् संपादिताः, तेनावश्यमत्रागम्यम् ; परं न शुक्लपक्षे नापि कृष्णपक्षे; न रात्रौ न दिवा; न [1]च्छायया नाप्यातपेन; नाकाशेन न पादाभ्याम्, नापि पथा नाप्युत्पथेन, न स्नातेन नाप्यस्नातेन ।' इत्यादिष्टे स रोहकः कण्ठस्नानं कृत्वा गन्त्रीचक्रस्य मध्यभूमिभागेन ऊरणमारूढो धृतचालनीरूपातपत्रः सन्ध्यासमयेऽमावास्याः प्रतिपत्संगमे नरेन्द्रपार्श्वेऽगमत् । स च 'रिक्तहस्तो न पश्येद् नृपं देवं गुरुम्' इति विमृश्य पृथिवीपिण्डं लात्वा गतः । प्रणतो राजा । मुक्तश्च तत्पुरः पृथिवीपिण्डः । ततः पृष्टो राज्ञा रोहकः, 'रे रोहक ! किमेतत् ?' तेनोक्तम्, 'देव ! देवपादाः पृथिवीपतयः, ततो मया पृथ्वी समानीता' । श्रुत्वा चेदं प्रथमदर्शने मङ्गलं वचस्तुतोष राजा । मुत्कलितः शेषग्रामलोकः ॥

रोहकः पुनरात्मपार्श्वे शायितः । गते च यामिन्याः प्रथमे प्रहरे रोहकः शब्दितो राज्ञा, 'रे जागर्षि, किंवा स्वपिषि ?' । 'देव ! जागर्मि' । 'तर्हि किं चिन्तयसि ?' । स प्राह 'अश्वत्थपत्राणां किं दण्डो महान्, किंवा शिखा ?' इति । तत एवमुक्तो राजा संशयमापन्नो वदति 'साधु चिन्तितम्, परमत्र को निर्णयः ?' । तेनोक्तम्, 'यावदद्यापि शिखाग्रभा[2]गो न शोषमुपयाति ॥ ११ ॥

१ क. ग. च्छायायाम् । २ क. ग. °गोऽशो° ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तावद् द्वे अपि समे'। ततो नृपेण[1] पुलकाञ्चितेन पार्श्ववर्ती लोकः पृष्टः। तेन[2] सर्वेणाविगानतः प्रतिपन्नम्। ततो भूयोऽपि रोहकः सुप्तवान्। पुनरपि द्वितीये यामे राज्ञा पृष्टः[3], 'किं रे जागर्षि नवा?'। स प्राह, 'जागर्मि'। 'रे किं चिन्तयसि?'। 'देव! छागिकाया उदरे भ्रम्युत्तीर्णा इव कथं वर्तुलगुलिका जायन्ते?।' तत एवमुक्ते[4] संशयापन्नो राजा तमेव पृष्टवान्, 'कथमेतत्?'। 'देव! संवर्तकाभिधवातविशेषात्'। ततः पुनरपि सुप्तः। तृतीये यामिनीयामे पुनरपि पृष्टोऽवादीत् 'जागर्मि'इति। 'रे किं चिन्तयसि?'। 'देव! खडेलिका[5]जीवस्य यावन्मात्रं शरीरं तावन्मात्रं पुच्छम्, उत हीनाधिकम्?' इति। तत एवमुक्ते राजा निर्णयं कर्तुमशक्तस्तमेवापृच्छत्, 'कोऽत्र निर्णयः?'। सोऽवादीत् 'देव! समम्' इति। ततः सुप्तः। प्रभाते[6] च मङ्गलपटहनिस्वने सर्वत्र प्रसरमधिरोहति राजा प्रबोधमुपाजगाम। शब्दितवांश्च रोहकम्। स च निद्राभरमुपारूढो न प्रतिवाचं दत्तवान्। ततो लीलाकम्बिकया[7] मनाक् स्पृष्टवान्। ततः सोऽपनिद्रो जातः। पृष्टश्च, 'किं रे सुप्तः?'। 'देव! जागर्मि' 'तर्हि किं चिन्तयसि?'। 'देव! एतच्चिन्तयामि, 'कतिभिर्जातो[8] देवः?' इति'। तत एवमुक्ते सव्रीडं मनाक् तूष्णीमतिष्ठत्। ततः क्षणानन्तरं पृष्टवान् 'कथय, रे कतिभिरहं जातोऽस्मि?'। स प्राह 'पञ्चभिः'। पुनरपि पृष्टः, 'केन केन?' इति। स प्राह 'एकेन तावद् वैश्रवणेन, तस्येव भवतो दानशक्तिदर्शनात्; द्वितीयेन चाण्डालेन, वैरिसमूहं प्रति चाण्डालस्येव कोपदर्शनात्, तृतीयेन रजकेन, यतो रजक इव वस्त्रं परिपील्य जनस्य सर्वस्वमपहरन् दृश्यसे; तुर्येण वृश्चिकेण, यद् मामपि बालकं निद्राभरसुप्तं लीलाकम्बिकाग्रेण वृश्चिक इव

---

१ ख. राज्ञा पा°। २ क. ग. °न प्र°। ३ ख. शब्दितः। ४ क. ग. इत्युक्ते। ५ क. ग. खिल्होडिका। ६ क. ग. तुर्यप्रहरे पुनरपि पृष्टः। स च निद्रारूढो न प्रतिवचो द°। ७ क. ग. कम्बया। ८ क. ग. कियद्भिर°।

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

निर्दयं तुदसि; पञ्चमेन निजपित्रा, येन यथावस्थितं न्यायं सम्यक् परिपालयसि। एवमुक्ते राजा तूष्णीमास्थाय प्रातःकृत्यमकरोत्। जननीं च नमस्कृत्यैकान्ते पृष्टवान्, 'कथय मातः! कतिभिरहं जातः?'। साह, 'वत्स! किमेतत् प्रष्टव्यम्? निजपित्रा त्वं जातः'। ततो राजा रोहकोक्तं कथितवान्। वदति च 'मातः स रोहकः प्रायोऽलीकबुद्धिर्न भवति, ततः कथय सम्यक् तत्त्वम्' इति। तत एवमतिनिर्बन्धे कृते सति मात्रोक्तम् 'यदा त्वद्गर्भाधानमासीत् तदाऽहं बहिरुद्याने वैश्रवणपूजायै गता, तं च यक्षमतिशयरूपं दृष्ट्वा हस्तसंस्पर्शेन च संजातमन्मथोन्मादा भोगाय तं स्पृहितवती; अपान्तराले च समागच्छन्ती चाण्डालयुवानं सुरूपमेकमपश्यम्, ततस्तमपि भोगाय स्पृहयामि स्म; ततोऽर्वाक्तने भागे आयान्ती तथैव रजकं दृष्ट्वाऽभिलषितवती; ततो गृहमागता सती तथाविधोत्सववशाद् वृश्चिकं कणिकामयं भक्षणाय हस्ते न्यस्तवती; ततस्तत्संस्पर्शतो जातकामोद्रेका तमपि भोगाय शंसितवती। तत एवं यदि स्पृहामात्रेण पितरः संभवन्ति तन्न जाने, परमार्थतः पुनरेक एव ते पिता सकलजगत्प्रसिद्धः।' तत एवमुक्ते राजा जननीं प्रणम्य रोहकबुद्धिविस्मितमनाः स्वावासमगात्। रोहकं सर्वेषां मन्त्रिणां मूर्धाभिषिक्तमन्त्रिणमकार्षीत्॥ 'रोहकादिवत्' इत्यत्रादिशब्दादन्येऽपि बुद्धौ दृष्टान्ता वाच्याः॥

॥ इति बुद्धिप्रागल्भ्ये रोहककथा॥ ७॥

---

१ ख. शब्दग्रहणाद°। २ ग. बुद्धौ रो°।



Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

के ते ? । क्षुल्लक १ गजतोलन २ सपत्नी ३ निधिपति ४ भिक्षुखौरेय ५ नैमित्तिक ६ अमात्याः ७ । सप्त क्रमेणोदाहरणानि;—

बेन्नातटे नगरे केनापि सौगतेन श्वेताम्बरः क्षुल्लकः पृष्टः, 'भोः क्षुल्लक ! सर्वज्ञाः किल तवार्हन्तः, तत्पुत्राश्च यूयम्, ततोऽत्र पुरे कति वसन्ति वायसाः ?' । ततस्तेन चिन्तितं 'शठोऽयं प्रतिशठाचरणेन निर्लोठनीयः'। ततः स्वबुद्धिवशादिदं पठितवान्;—

"सट्ठि[1] कागसहस्सा, इहयं बिन्नायडे परिवसंति । जइ ऊणा चुणणगया, अह अहिया पाहुणा आया ॥ १ ॥"

ततः स भिक्षुः प्रत्युत्तरं दातुमशक्तो लकुटाहतशिरस्क इव शिरः कण्डूयन् मौनमाधाय गत इति ॥ ८ ॥

---

वसन्तपुरे नगरे कोऽपि राजा बुद्ध्यतिशयसंपन्नं मन्त्रिणमन्वेषमाणश्चतुष्पथे गजमालानबद्धं कारयित्वोद्घोषणामचीकरत्, 'योऽमुं हस्तिनं तोलयति तस्मै राजा महतीं वृत्तिं ददाति' । इमां च घोषणां श्रुत्वा कश्चिदेकः पुमांस्तं हस्तिनं महासरसि नावमारोपयामास । तस्मिंश्चारूढे यावत्प्रमाणा नौर्जले मग्ना तावति प्रमाणे रेखामदात् । तत उत्तारितो हस्ती । प्रक्षिप्ता गण्डशैलकल्पा ग्रावाणस्तावद् नावि, यावद् रेखां मर्यादीकृत्य जले निमग्ना नौः । ततस्तोलितास्ते सर्वेऽपि पाषाणाः । कृतमेकत्र पलपरिमाणम् । विज्ञप्तं राज्ञे, 'देव ! एतावत्पलप्रमाणो हस्त्यस्ति' । ततस्तुष्टो[2] राजा । कृतो मन्त्रिमण्डलमूर्धाभिषिक्तः परमो[3] मन्त्री ॥ ९ ॥

---

१ षष्टिः काकसहस्राणि, इह बेन्नातटे परिवसन्ति । यद्यूना भक्षणगताः, अथाधिकाः प्राघूर्णका आगताः ॥ १ ॥

२ ख. °स्तुतोष । ३ क. °मोऽमात्यः, ग. °मोऽमात्यः ॥ इति ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कोऽपि वणिक्। तस्य द्वे पत्न्यौ। एकस्याः पुत्रोऽस्ति, अपरस्या नास्ति। परं सापि तं पुत्रं सम्यक् पालयति। पुत्रस्तु 'इयं मे माता, इयं न' इति विशेषं न वेत्ति। सोऽपि वणिक् सभार्यापुत्रोऽन्यदा विदेशं गतः। गतमात्र एव मृतः[1]। ततो द्वयोरपि तयोः कलहोऽभूत्। एका वदति 'ममैष पुत्रः'। द्वितीयापि तथैव। एका भणति 'गृहस्वामिन्यहम्', द्वितीया 'अहम्' इति। एवं तयोर्मिथः कलहे जाते राजकुले व्यवहारो बभूव। ततोऽमात्यः प्रतिपादयामास निजपुरुषान्, 'भोः! पूर्वं द्रव्यं विभजत निखिलम्, विभज्य दारकं[2] द्वौ भागौ करपत्रेण कुरुत, कृत्वा चैकं खण्डमेकस्यै समर्पयत, द्वितीयं द्वितीयस्यै'। तत एतदमात्यवाक्यं शिरसि ज्वालासहस्रावलीढवज्रोपनिपातकल्पं श्रुत्वा पुत्रमाता सोत्कम्पहृदयाऽन्तःप्रविष्टतिर्यक्शल्येव दुःखं वक्तुं प्रवृत्ता, 'हा स्वामिन् महामात्य! न ममैष पुत्रः, न मे किञ्चिदर्थेन प्रयोजनम्; एतस्या एव पुत्रोऽस्तु, गृहस्वामिनी चेयमास्ताम्; अहं पुनरमुं पुत्रं दूरस्थितापि परगृहेषु दारिद्र्यमपि कुर्वती जीवन्तं द्रक्ष्यामि; तावता च कृतकृत्यमात्मानं प्रपत्स्ये, पुत्रेण विना पुनरधुनापि समस्तो जीवलोको मेऽस्तमुपयातु'। इतरा च न वक्ति किमपि। ततोऽमात्येन तां दुःखार्तां विभाव्योक्तम् 'एतस्याः पुत्रः, नास्याः' इति। सैव सर्वस्वस्वामिनी कृता, द्वितीया तु निर्धाटिता॥ १०॥

---

द्वौ नरावन्योन्यमत्यन्तसखायौ। अन्यदा ताभ्यां क्वापि प्रदेशे निधानमुपलेभे। तत एको मायावी ब्रूते 'श्वस्तनदिने शुभे नक्षत्रे ग्रहीष्यामः[3]। द्वितीयेन सरलमनस्कतया तथैव प्रतिपन्नम्। ततस्तेन मायाविना तस्मिन् प्रदेशे रात्रावागत्य, आदाय च



१ ख. पराङ्मुरभूत्। २ ततो दा°। ३ क. ग. लास्यामः।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

निधिं तत्राङ्गारकाः क्षिप्ताः। ततो द्वितीये दिने द्वावप्यागतौ, दृष्टवन्तौ तत्राङ्गारकान्। ततो मायावी मायया गाढमाक्रन्दितुं लग्नः, 'हा हीनपुण्या वयम्, दैवेन चक्षुषी दत्त्वाऽस्माकमुत्पाटिते, यद् निधानमुपदर्श्याङ्गारका दर्शिताः'। पुनः पुनश्च द्वितीयमुखमवेक्षते। ततो द्वितीयेन ज्ञातम् 'नूनमनेन धनं हृतम्' इति। ततस्तेनाप्याकारसंवरणं कृत्वा तस्यानुशासनार्थमूचे, 'वयस्य! मा खेदं कार्षीः, न खलु खेदः पुनर्निधानप्रत्यागमनहेतुः'। ततो गतौ द्वावपि स्वस्वगृहम्। ततो द्वितीयेन तस्य मायिनो लेप्यमयी सजीवेव प्रतिमा कारिता। द्वौ च गृहीतौ मर्कटौ। प्रतिमायाश्चोत्सङ्गे हस्ते स्कन्धे शिरसि चान्यत्र च यथायोगं तयोर्मर्कटयोर्योग्यं भक्ष्यं मुक्तवान्। तौ च मर्कटौ क्षुधातुरौ तत्रागत्य प्रतिमोत्सङ्गादौ भक्ष्यं भक्षितवन्तौ। एवं प्रतिदिनं करणे तयोस्तादृगेव स्वभावो जातः। ततोऽन्यदा किमपि पर्वाधिकृत्य मायिनो द्वावपि पुत्रौ भोजनाय निमन्त्रितौ। आगतौ च भोजनवेलायां तद्गृहे। भोजितौ च तेन महागौरवेण। भोजनानन्तरं च तौ महता सुखेनान्यत्र संगोपितौ। ततः स्तोकदिनावसाने स्वपुत्रसाराकरणाय तद्गृहमागतः। द्वितीयस्तं प्रति ब्रूते, 'मित्र! तौ तव पुत्रौ मर्कटावभूताम्'। ततः सखेदविस्मितमना गृहमध्यं प्राविशत्। ततो लेप्यमयीं प्रतिमामुत्सार्य तत्स्थाने समुपवेशितौ मुक्तौ स्वस्थानाद् मर्कटौ। तौ च किलकिलायमानौ तस्योत्सङ्गे शिरसि स्कन्धे चागत्य विलग्नौ। ततो मित्रमवादीत्, 'भो मित्र! तावेतौ तव पुत्रौ, तथा च पश्य तव स्नेहमात्मीयं दर्शयतः'। ततः स मायावी प्राह 'मित्र! किं नरावस्माकं पुत्रौ मर्कटौ भवतः?'। वयस्य आह, 'भवतः, कर्मप्रातिकूल्यवशात्, तथाहि, किं सुवर्णमङ्गारीभवति? परमावयोः कर्मप्रातिकूल्यादेतदपि जातम्, तथा तव पुत्रावपि मर्कटावभूताम्'

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

इति । ततो मायावी चिन्तयामास 'नूनमहं ज्ञातोऽनेन, ततो यद्युच्चैः शब्दं करिष्ये ततोऽहं राजगृह्यो भविष्यामि, पुत्रौ चान्यथा मे न भवतः' । ततस्तेन सर्वं यथावस्थितं तस्मै निवेदितम् । दत्तश्च भागः । इतरेण समर्पितौ पुत्रौ ॥ इति ॥ ११ ॥

---

कोऽपि परिव्राजकः । तस्य रूप्यमयं महाप्रमाणं खोरेयसंज्ञं भाजनम् । स च यदेकवारं शृणोति तत् सर्वं तथैवावधारयति । ततः स प्रज्ञागर्वमुद्वहन् सर्वत्र प्रतिज्ञां कृतवान् 'यो नाम ममापूर्वं श्रावयति तस्मै ददामीदं भाजनम्' इति । न च कोऽप्यपूर्वं श्रावयितुं शक्नोति । स हि यत् किमपि शृणोति तत् सर्वमस्खलितं तथैवानुवदति । वदति च 'अग्रेऽपीदं मया श्रुतम्, कथमस्खलितमन्यथा भणामि ?' इति । एतत् सर्वत्र ख्यातिमगमत् । ततः केनापि सिद्धपुत्रेण ज्ञातप्रतिज्ञेन तं प्रत्युक्तम्, 'अहमपूर्वं श्रावयिष्यामि' । ततो मिलितो भूयान् लोकः । राजसमक्षं व्यवहारो बभूव । ततः सिद्धपुत्रोऽपाठीत् ;—

"तुज्झ[१] पिया मह पिउणो, धारेइ अणूणगं सयसहस्सं । जइ सुयपुव्वं दिज्जउ, अह न सुयं खोरयं देसु[२] ॥ १ ॥"

जितस्तेन परिव्राजकः ॥ १२ ॥

---

क्वचित् पुरे कोऽपि सिद्धपुत्रः । तस्य द्वौ शिष्यौ निमित्तशास्त्रमधीतवन्तौ । एको बहुमानपुरस्सरं गुरोर्विनयपरायणो यत्किमपि गुरुरुपदिशति, तत् सर्वं 'तथा' इति प्रतिपद्य स्वचेतसि नितान्तं विमृशति । विमृशतश्च यत्र क्वापि संदेह उपजायते, तत्र

१ तव पिता मम पितुर्धारयत्यनूनकं शतसहस्रम् । यदि श्रुतपूर्वं दीयतामथ न श्रुतं खोरेयं देहि ॥ १ ॥

२ ख. दिज्ज ।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भूयोऽपि विनयेन गुरुपादमूलमागत्य पृच्छति । एवं निरन्तरं विमर्शपूर्वं शास्त्रार्थं तस्य चिन्तयतः प्रज्ञा प्रकर्षमुपजगाम । द्वितीयस्त्वेतद्गुणविकलः । तौ चान्यदा गुरुनिदेशात् क्वचित् प्रत्यासन्ने ग्रामे गन्तुं प्रवृत्तौ । पथि च कानिचिद् महान्ति पदानि तावदर्शताम् । तत्र विमृश्यकारिणोक्तम्, 'भोः! कस्यामूनि पदानि ?' । द्वितीयेनोक्तम् 'किमत्र प्रष्टव्यम्, हस्तिनोऽमूनि पदानि' । विमर्शकेनोक्तम् 'हस्तिन्याः पदानि; सा च हस्तिनी वामेन चक्षुषा काणा; तां चाधिरूढा गच्छति काचिद् राज्ञी; सा च सभर्तृका, गुर्वी, प्रजने योग्या, अद्य श्वो वा प्रसविष्यते, पुत्रश्च तस्या भविष्यति' इति । तत एवमुक्ते सोऽविमृश्यकारी प्राह, 'कथमेतदवसीयते ?' । विमृश्यकारी ब्रूते, 'ज्ञानं प्रत्ययसारम्, इत्यग्रे प्रत्ययतो व्यक्तं भविष्यति' । ततः प्राप्तौ तौ विवक्षितं ग्रामम् । दृष्टा चावासिता तस्य ग्रामस्य बहिःप्रदेशे महासरस्तटे राज्ञी । परिभाविता हस्तिनी वामेन चक्षुषा काणा च । अत्रान्तरे काचिद् दासचेटी महत्तमं प्रत्याह 'वर्धाप्यसे राज्ञः पुत्रलाभेन' । ततः शब्दितो विमृश्यकारिणा द्वितीयः 'परिभावय दासचेटीवचनम्' इति । तेनोक्तम् 'परिभावितं मया सर्वं, नान्यथा तव ज्ञानम्' इति । ततस्तौ हस्तपादौ प्रक्षाल्य तस्मिन् महासरस्तटे न्यग्रोधतरोरधो विश्रामाय स्थितौ । दृष्टौ च कयाचिच्छिरोन्यस्तजलभृतघटया वृद्धस्त्रिया । परिभाविता च तयोराकृतिः । ततश्चिन्तितं 'नूनमेतौ विद्वांसौ, ततः पृच्छामि देशान्तरगतस्वपुत्रागमनम्' इति । पृष्टं तया । प्रश्नसमकालमेव शिरसो निपत्य भूमौ घटः शतशो भग्नः । ततो झटित्येवाविमृश्यकारिणा प्रोचे 'गतस्ते पुत्रो विपत्तिम्' इति । विमृश्यकारी ब्रूते

१ क. ग. नितांतं वि° । २ क. ग. दासीचे° ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स 'वयस्य ! एवं मा वादीः, पुत्रोऽस्या गृहमागतोऽस्ति । 'याहि मातर्वृद्धे !, स्वपुत्रमुखमवलोकय' । तत एवमुक्ता सा प्रत्युज्जीवितेवाशीर्वादशतानि विमृश्यकारिणः प्रयुञ्जाना स्वगृहं गता । दृष्टश्चोद्धूलितजङ्घः पुत्रो गृहमागतः । ततः प्रणता पुत्रेण । सा चाशीर्वादं निजपुत्राय प्रायुंक्त । कथयामास च नैमित्तिकवृत्तान्तम् । ततः पुत्रमापृच्छ्य वस्त्रयुगं रूपकांश्च कतिपयानादाय विमृश्यकारिणेऽर्पयामास । द्वितीयः खेदमावहन् स्वचेतस्यचिन्तयत्, 'नूनमहं गुरुणा सम्यग् न पाठितः, कथमन्यथा न जानामि, एष जानाति ?' । इति गुरुप्रयोजनं कृत्वा गतौ तौ गुरोः पार्श्वे । तत्र विमृश्यकारी दर्शनमात्र एव शिरो नमयित्वा कृताञ्जलिपुटः सबहुमानमानन्दाश्रुप्लावितनेत्रो गुरोः पादावन्तःशिरः प्रक्षिप्य प्रणिपपात । द्वितीयोऽपि शैलस्तम्भ इव मनागप्यनमितगात्रो मात्सर्यवह्निसंयोगाद् धूमायमानोऽवतिष्ठते । ततो गुरुस्तं प्राह, 'रे ! किं न पादयोः पतसि ?' । स प्राह 'य एव सम्यक् पाठितः स एव पतिष्यति नाहम्' इति । गुरुराह 'कथं त्वं सम्यग् न पाठितः ?' । ततः प्राचीनं वृत्तान्तं सकलमचकथद् यावदेतस्य ज्ञानं सम्यग् न ममेति । ततो विमृश्यकारी गुरुणा पृष्टः 'कथय, वत्स ! कथं त्वयेदं ज्ञातम् ?' इति । ततः स प्राह, 'युष्मत्पादादेशेन विमृष्टम्, यथा—एतानि हस्तिरूपस्य पदानि सुप्रतीतान्येव, विशेषचिन्तायां तु 'हस्तिन उत हस्तिन्याः' तत्र कायिकीं दृष्ट्वा निश्चितं च; दक्षिणे च पार्श्वे वृत्तिसमारूढो वल्लीवितान आलूनविशीर्णो हस्तिनीकृतो दृष्टो न वामपार्श्वे, ततो निश्चिक्ये 'नूनं वामेन चक्षुषा काणा' इति; न चान्य एवंविधपरिकरोपेतो हस्तिन्यामधिरूढो गन्तुमर्हति,

---

१ क. ग. सर्वम° । २ ख. विमर्श्यं कर्तुमारब्धः । य° ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ततः 'अवश्यं राजकीयं किमपि मानुषं याति' इति निश्चितम्; तच्च मानुषं कचित् प्रदेशे हस्तिन्या उत्तीर्य शरीरचिन्तां कृतवान्, कायिकीं दृष्ट्वा 'राज्ञी' इति निश्चितम्; वृक्षावलग्नरक्तवस्त्रदशादलदेशदर्शनात् 'सभर्तृका'; भूमौ हस्तं विन्यस्योत्थानाकाराद् 'गुर्वी'; दक्षिणपादनिस्सहमोचननिवेशदर्शनात् प्रजनकाल्या' इति । वृद्धस्त्रियाः प्रश्नानन्तरं घटनिपाते चैवं विमर्शः कृतो यथा—'एष घटो यत उत्पन्नस्तत्रैव मिलितः, तथा पुत्रोऽपि' इति । तत एवमुक्ते गुरुणा स विमृश्यकारी चक्षुषा सानन्दमीक्षितः प्रशंसितश्च । द्वितीयं प्रत्युवाच 'भोः! तव दोषो यद् न विमर्शं करोषि, न मम; वयं शास्त्रोपदेशेऽधिकृताः, विमर्शस्तु युष्माकम्' इति ॥ १३ ॥

---

कोऽप्यकृतपुण्यो यत्करोति तत्[1] सर्वमापदे भवति । ततोऽन्यदा मित्रं बलीवर्दौ याचित्वा हलं वाहयति । अन्यदा तावानीय कालवेलायां वाटके क्षिप्तौ । स च वयस्यो [2]भोजनं कुर्वन्नास्ते । ततः स तस्य पार्श्वे न°गतः । केवलं 'तेनापि तौ दृष्ट्वा विलोकितौ' इति स्वगृहं गतः । तौ च बलीवर्दौ वाटकान्निःसृत्यान्यत्र गतौ । ततोऽपहृतौ तस्करैः । स च बलीवर्दस्वामी अकृतपुण्यं तं वराकं बलीवर्दौ याचते । स च दातुं न शक्नोति । ततो नीयते तेन राजकुलम् । पथि च गच्छतस्तस्य कोऽप्यश्वारूढो नरः संमुखमागच्छति । स चाश्वेन पातितः । अश्वः पलायमानो वर्तते । ततस्तेनोक्तम् 'आहन्यतामेष दण्डेनाश्वः' इति । तेन चाकृतपुण्येन सोऽश्वो मर्मण्याहतः । ततो मृतः । ततस्तेनापि पुरुषेण स वराको गृहीतः । ते च नगरमायाताः । तावद्

१ क. ग. तदापदे स्यात् त° । २ ग. वैकालिकं कु° ।

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

दिनमस्तमितम्, इति कृत्वा ते नगरबहिःप्रदेश एवोषिताः । तत्र च बहवो नटाः सुप्ता वर्तन्ते । स चाकृतपुण्योऽचिन्तयद् यथा–'नास्मादापत्समुद्राद् मे निस्तारोऽस्ति' इति 'वृक्षे गलपाशेनात्मानं बद्ध्वा म्रिये' इति । तेन तथैव कर्तुमारब्धम् । परं जीर्णवस्त्रखण्डेन गलपाशो बद्धः । तच्च दण्डिवस्त्रखण्डमतिदुर्बलमिति त्रुटितम् । ततः स वराकोऽधस्तात्सुप्तनटमहत्तरस्योपरि पपात । सोऽपि च नटमहत्तरस्तद्भाराक्रान्तगलप्रदेशः पञ्चत्वमुपागतः । ततो नटैरपि स प्रतिगृहीतः । गताः सर्वे प्रभाते राजकुलम् । कथितः सर्वैरपि स्वस्वव्यतिकरः । ततः कुमारामात्येनैव स वराकः पृष्टः । सोऽपि वराको दीनमुखोऽवादीत् 'देव ! यदेते ब्रुवते तत् सर्वं सत्यम्' इति । ततस्तस्योपरि संजातात्यन्तकृपः कुमारामात्योऽवादीत् 'एष बलीवर्दौ तुभ्यं दास्यति, तव पुनरक्षिणी उत्पाटयिष्यति; एष हि तदैवानृणीबभूव यदा त्वया चक्षुर्भ्यां बलीवर्दौ विलोकिताविति । यदि पुनस्त्वया चक्षुर्भ्यां नावलोकितौ स्यातां तदैषोऽपि स्वगृहं न यायात् । न हि यो यस्मै समर्पणाय गतः स तस्यानिवेदने समर्पणीयमेवमेव मुक्त्वा याति स्वसदनम्' । तथा द्वितीयोऽश्वस्वामी शब्दितः, 'एषोऽश्वं तुभ्यं दास्यति, तव पुनरेष जिह्वां छेत्स्यति । यदा त्वज्जिह्वयोक्तम् 'एनमश्वं दण्डेन ताडय' इति, तदा तेन दण्डेनाहतोऽश्वो नान्यथा । तत एष दण्डेनाहन्ता दण्ड्यते तव पुनर्न जिह्वेति कोऽयं नीतिपथः ?' । तथा नटं प्रत्याह, 'अस्य पार्श्वे न किमप्यास्ते ततः किं दापयामः ? एतावत् पुनः कारयामः, एषोऽधस्तात् स्थाप्यते, त्वदीयः पुनः कोऽपि प्रधानपुरुषो यथैष वृक्षे गलपाशेनात्मानं बद्ध्वा मुक्तवान्, तथाऽऽत्मानं मुञ्चतु' इति । ततः सर्वैरपि स मुक्तः । कुमारामात्यस्य बुद्धिकथा समाप्ता[1] ॥ ॥ १६ ॥

१ क. ग. बुद्धिः ।

Gunratnasuri M.S. Jun Gun Aaradhak Trust

एताश्च बुद्ध्यधिकारप्रतिबद्धा रोहकादिकथाः श्रीमलयगिरिकृतनन्द्यध्ययनटीकातस्तद्वचनबहुमानात् तैरेव गद्यैरुद्धृताः, शेषं तु शास्त्रं स्वगद्यैः ॥ इति ॥ १४ ॥

---

**यदा येन यथा मृत्युः प्राप्तव्यः सोऽन्यथा नहि। आराधिते यमे तुष्टे दैवयोगाद् वणिग् मृतः ॥ १ ॥**

लक्ष्मीनिवासे नगरे श्रीणां क्रीडागारं विनयी नयी सद्वाक्यमाणिक्याकरः शङ्करो नाम श्रेष्ठी। स च पुत्रचतुष्टये कुटुम्बभारमारोप्य न्यायार्जितां बह्वीं श्रियं पात्रसात् कृत्वा, एकदा परामम‌र्श, 'गलितं तावद् यौवनम्, आयाति जरा, जरानन्तरं च ध्रुवं भावी मृत्युः। मृत्योः परं भीषणं नास्ति, उक्तं च;—

"मनोरथतरूल्लासास्तावद् दधति हृद्यताम्। यावन्न स्मर्यते मृत्युमतङ्गजविजृम्भितम् ॥ १ ॥
वैभवादिमहोन्मादो मृत्युरित्यक्षरश्रुतौ। नापैति यस्य सोऽवश्यं मद्यपादपि दुर्मदी ॥ २ ॥"

ततश्च तत्किमपि मया कर्तव्यं येन यमः प्रसन्नो मम नाम वहिकायाष्टालयति'। इति विमृश्य गिरिपरिसरे कृष्णवर्णदेवकुलिकायां श्यामाकारं श्यामपरिकरं यमं ग्रावमयं श्यामवस्त्रैः स पूजयति। नैवेद्यादिभिश्च तथा प्रीणाति। एवं जितेन्द्रियतया मितपरिच्छदस्य यमं सेवमानस्य कियत्यपि गते काले तत्र यमकिङ्कराः स्वैरं भ्रमन्तः समेयरुः। तस्य तां कीनाशसेवां दृष्ट्वा विस्मिताः कीनाशमेत्य व्यजिज्ञपन्, 'देव! त्वामेवमेवं श्रेष्ठ्येकः समाराध्नाति'। तदाकर्ण्य तुष्टः श्राद्धदेवस्तमाजूहवत्, उवाच च 'साधु भोः साधु, कोऽप्यस्मान् नैवमाराध्नाति यथा त्वम्; त्वयि प्रसेदिवांसः स्मः, याचस्व यद् रोचते'। ततः श्रेष्ठी जगाद 'मम नाम

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

निजपत्रेभ्यो वालय यथाऽहं न म्रिये' इति । यमोऽपि 'ओम्' इति गदित्वा चित्रविचित्रौ कायस्थावाकार्य तं बहिः पट्टशालाया-मुपावीविशत्, यावत् तयोरादेशं ददाति यमस्तावत् ताभ्यां पत्रेऽवाचि, 'यदा शङ्करश्रेष्ठी यमं निजामरत्वायाऽर्थयिष्यते तदाऽकस्मात्पतितजर्जरभारपट्टाक्रान्तो बहिः पट्टशालायां मर्ता' इति । एवं वाच्यमाने बहिर्भारपट्टोऽपतत् । तेन स मृतः । यमः 'हहा! असत्सेवाफलं किमप्यस्य नासीत्' इति शोकार्तः स्वगृहं गतः । इति परसमयकथेयम् ॥ १५ ॥

---

लघवोऽपि प्रबोधाय महतां स्युर्धिया क्वचित् । पितृरीढापरस्तातो यथा पुत्रेण बोधितः ॥ १ ॥

हरिपुरे जलस्थलव्यवहारसहस्रबाहुर्नरवरपरिषन्नलिनीमरालः शङ्खो नाम श्रेष्ठी । तस्य चत्वारो नन्दनाः, कुमुदः १ तिलकः २ अशोकः ३ वीरश्च४ । कुमुदस्य सूनुः कुन्तलः । क्रमेण जातविश्वासः शङ्खः पुत्रेभ्यो निधिस्थानान्यदीदृशत् । राजान्तिके न्यवीविशत् । व्यवहार[1]धुरामारूरुहत् पौत्रपुत्रस्कन्धेषु । स्वयं तु निर्व्यापारो निर्द्रव्यस्तस्थौ । पुत्रविश्वासादापदार्थे धनं पृथग् न [2]संचिकाय । जरसाऽऽक्रान्तः । पत्नी दिवं गता । पुत्रास्तस्य शुश्रूषां न कुर्वन्ति । [3]वध्वोऽपि नाम न गृह्णन्ति । केवलं स्फारशृङ्गारास्ताम्बूलतुन्दिलकपोला विष्वग् भ्रमन्ति । वृद्धस्तु जरापिशाचीग्रस्तो गृहस्य पाश्चात्यदेशे पतितः । क्षुत्क्षामोऽर्त्तिशतानि ध्यायन्[4] झषन् निद्रालवलुलिताक्षो मुखभङ्गशतानि कुर्वन् रङ्कवद् [5]रलति । एकदा शीतर्तुभरे वात्सु प्राणाकर्षाङ्कुटेष्विव वातेषु, दीर्घासु निशासु मध्ये बहिश्च शीतार्तो जरन् प्रातः कुमुदं ज्यायांसं पुत्रं शीतत्राणसहां द्विपटीं ययाचे ।

---

१ क. ग. °रमा° । २ ग. स चं° । ३ ख. वध्वाद्या नामापि न । ४ ख. °न् नि° । ५ ख. रुल° ।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

"वृद्धस्य मृतभार्यस्य पुत्राधीनधनस्य च । स्नुषावचनदग्धस्य जीविताद् मरणं वरम् ॥ १ ॥"[1]

इति सूक्तम् । कुमुदः कुन्तलमादिक्षत् 'अमुकां यवनीं ददीथाः' । कुन्तलो जरते तज्जीर्णयवनिकार्धमदात् । जरंस्तद्वस्त्रखण्डं कुमुदायादर्शयत् । कुमुदः कुन्तलं सरोषमभाषिष्ट, 'अरे ! एकं तावज्जीर्णा यवनिका, तस्या अपि खण्डं त्वया दत्तमस्मै, इति किमेतत् ? किमस्मै संपूर्णेयं न व्यतारि ?' । कुन्तलोऽपि कृताञ्जलिराह, 'तात ! बृहत्तातवद् भवतामपि जरागमस्तावदासन्नः,[2] इति यवनिकार्धं भवद्योग्यं स्थापितमास्ते' । एवं वचः श्रुत्वा लज्जितः कुमुदः प्रोवाच, 'वत्स ! सुष्ठु बोधिताः, प्रभुत्वविभवमदिरामदपूर्णमानसानां पततामस्माकं हस्तावलम्बनं जातोऽसि' । एवं प्रश्लाघ्य कुमुदः पितृभक्तिं प्रारभत विधातुम् । तदनुव्रजनेन कुटुम्बलोकोऽपि तथैव ॥

॥ इति कुन्तलाख्यश्रेष्ठिपुत्रबुद्धिसौष्ठवकथा ॥ १६ ॥

---

**आत्मनः कुशलाकाङ्क्षी परद्रोहं न चिन्तयेत् । स्थविरायै कृतो द्रोहो वध्वा एवापतद् यतः ॥ १ ॥**

चन्द्रपुरे वीरः श्रेष्ठी । तस्य भार्या वीरमती । माता तु जया स्थविरा विपन्नभर्तृका पुत्रस्य रीढापात्रं बभूव । उक्तं च;—

"आस्तन्यपानाज्जननी पशूनामाहारलोभाच्च नराधमानाम् । आगेहकर्मैव तु मध्यमानामाजीवितं तीर्थमिवोत्तमानाम् ॥ १ ॥

जातापत्या पतिं द्वेष्टि कृतदारस्तु मातरम् । कृतार्थः स्वामिनं द्वेष्टि जितरोगश्चिकित्सकम् ॥ २ ॥"

---

१ ख. वरं कु° । २ क. °सन्न एव । य° ग. °सन्न एव तेन य° ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

इत्यादि । विशेषतो वधूः स्वाच्छन्द्येच्छुतया श्वश्रूं जिघांसति । अन्यदा क्वापि पर्वण्यागते श्वश्वा वधूरभाणि 'वत्से ! हट्टं गत्वा पुत्रं काष्ठगोधूमान् याचस्व पक्वान्नकृते । सा तत्र यात्वा पतिमाह 'तव माता जरारोगातुरा काष्ठानि याचते' । सोऽपि तत् श्रुत्वा गृहे समेत्य मातरमवदत्, 'मातः किं काष्ठानि याचसे ?' । सापि दध्यौ, 'मद्वधूकृतवाग्विज्ञानादयमेवमाचष्टे तावद् यथा मां हन्तुकामौ द्वावपि स्तः, तस्मादेतदुक्तमेव समर्थये' इति धिया 'वत्स ! काष्ठानि देहि' इति बभाषे । कृता पुत्रवधूभ्यां नगराद् बहिः काष्ठसामग्री । स्वजनलोकं मिलितं नगरगोपुरादेव विसृज्य बहिर्गतौ जरन्तीं काष्ठान्तराले चिक्षिपतुः । अग्निस्तु विस्मृतः । ततो भर्ता भार्यामूचे, 'भद्रे ! अग्निमानेतुमन्तर्नगरं यामि, त्वमत्रैव तिष्ठेः' । सा प्राह, 'विकालवेलायां निर्जनेऽहमेकाकिनी बिभेमि, संभूय गन्तव्यम्' । मिलित्वा[1] गतौ । वृद्धया चिन्तितम्, 'इमौ दुष्टौ गतौ; मृतैस्तु[2] शीतोदकं मिष्टान्नं निजेष्टसंगतिः, अन्यदपि न किञ्चिल्लभ्यते' । विमृश्य निर्गता । आसन्नन्यग्रोधतरुशिखरमारुह्याऽस्थात् । अग्निमानीय काष्ठानि दग्ध्वा तौ गृहं गत्वा सुप्तौ । तस्यामेव निशि श्रीमच्छ्रेष्ठिगृहं लुण्टयित्वा चौरास्तत्रागुः, विभक्तुमुपाविक्षुररणीपातिताग्निप्रकाशेन[3] । अत्रान्तरे सा प्रत्युत्पन्नमतिर्वृद्धा स्नानमुत्कलकेशा 'खादामि खादामि' वदन्ती उपरि झम्पयाऽपप्तत् । 'कापि राक्षसी' इति धिया चौरा नेशुः । तां तदीयां समृद्धिं प्राप्य सा ज्यायसी तुष्टा । वस्त्राभरणैरात्मानं भूषयित्वा याममात्रेऽह्नि स्वगृहं गता । अभ्युत्थितौ शठौ । चमत्कृतौ चाकथयताम्, 'कुतः पूज्या मृताऽप्यागात् ?' । साह 'वत्सौ ! सत्त्वेन मृताऽहं स्वर्गता,

१ ख. °लितौ ग° । २ क. ग. °स्तु किमपि न ल° । ३ क. ग. °मुपविष्टा अ° ।

P. P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्वःपतिना सत्कृता हेमादिदानैः; तथा च सत्यहमात्मानं युवयोर्दर्शयितुमागाम्; यदि तरुणी काष्ठान्यत्ति तदा महेन्द्रस्तां पूजयति' इति। श्रुत्वेदं लुब्धा वधूराग्रहात् काष्ठानि ससाध। द्वितीयेऽह्नि भर्ता पन्थानमीक्षते 'कदा समेष्यति?'। मात्रोक्तम्, 'वत्स! नैवं गतैः पुनरागम्यते, वैरं तु निर्यातितं मया'। स्वकथां तां तथाऽऽख्यत्। पुत्रस्तूष्णीकोऽभूत्। क्षणान्तरे चाभाणीत्, 'मातः! सत्यं, यच्चिन्त्यते परस्य तदेति गृहस्य'।

॥ इति श्वश्रूवधूकथा ॥ १७ ॥

---

अपृच्छ्यमानः स्वं दोषं कश्चिदाख्याति मन्दधीः। अन्नं कारुगृहे भुक्तं स्वयमेव जगौ जटी ॥ १ ॥

कश्चित् तपस्वी देशान्तराणि पर्यटन् महाराष्ट्रान् गतः। क्वचिद् ग्रामटिकायां भिक्षामलभमानो मध्याह्ने क्षुत्पीडित इतस्ततोऽवलोक्य छिंपकगृहं प्रविष्टः। तत्र मकरणे प्रारब्धे प्रचुराज्यं भोज्यं भुञ्जाना भूयांसो जनाः सन्ति। कृपापात्रतया तत्र भरटकः करम्भभिक्षामलभत। तत्रैव च बुभुजे। कालान्तरे स जटाधरो गूर्जरदेशमवाप। क्वचिन्नगरे मठपतिना दत्तपदः कर्मयोगाद् महामठपतिरभूत्। ग्रासपदे लक्षाणामायः, महान् परिजनः। एकदा राजकीयगायकनर्तक्यादयस्तस्य पार्श्वे कलाप्रकाशेन धनेच्छया गताः। सोऽपि तटस्थैरभ्यर्थ्य श्रोतुं द्रष्टुमुपवेशितः। कलाविद्भिरपि ध्रुवकप्रतिमण्ठकादिभिश्चिरं गीतम्। स न दत्ते किञ्चित्। ततस्तैः शठैर्विमृष्टम् 'ग्राम्यच्छन्दोविशेषोऽस्य पुरः प्रस्तूयते' इति। ततो



P.P.Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हुंम्बडकाः[1] प्रारब्धाः, अत्राश्वली[2] "कहउं जि भरडइं जं जं किउं"। एतत् श्रुत्वा चमत्कृतो भरडकः, 'मम छिंपनकभोजनं ज्ञातमेभिः, कथञ्चित्[3] कथयिष्यते च'। ततो बहुदुकूलहेमशृङ्खलकादिकमर्पितवान्। तेऽपि लब्धास्वादाः पुनरपि "कहउं जि भरडइं जं जं किउं"। इदं तु वाक्यं रुद्रचरित्रप्रस्तावनपरतयोचे। स तु जटाभृदात्मन एवाशङ्कते। पुनर्दत्ते। पुनस्तैस्तदेवोक्तम्। अतः कुपितोऽसौ जटी आहूय तानालपत्, 'रे दुष्टाः! किं कथयिष्यथ, भरटकेन छिंपनकगृहे करम्बको भक्षितो भक्षितो भक्षितः; किं कस्य गृहीतम्?'॥

॥ इत्यात्मविगोपकजटाधरकथा ॥ १८ ॥

---

**वञ्चनाबहुला नार्यो विश्वासस्तासु नोचितः। कैतवेन विना मृत्या वेश्यया रञ्जितो वणिक् ॥ १ ॥**

कुङ्कुमपुरे हीरकः श्रेष्ठी। तस्य प्राज्ञो मकरन्दाह्वः पुत्रः। स सर्वविद्यः सन् वेश्यानां गृहे नियुक्तः। कपटविद्याः पठति। सर्वं कैतवजालं विवेद। अधीतवेश्याचरितश्च तया कुट्टिन्या श्रेष्ठिनेऽर्पितो मकरन्दः। पाठनमूल्यं द्रम्मलक्षं लेभे, ऊचे चेमां प्रतिज्ञाम्, 'यद्यसौ मदध्यापितः कयापि मायाविन्या वञ्च्यते देशान्तरगतोऽपि, तदाऽहं दण्डनीया हे श्रेष्ठिन्!' इति। अन्येद्युः श्रेष्ठ्यादेशादमरपुरं मकरन्दो गतः। तत्र रञ्जितनृपप्रदत्तप्रसादः पण्यक्रयविक्रयपरः सुखेन तिष्ठति। तत्र च तरुणहरिणवागुरा

१ ख. हुंबटिकाः। २ ख. तत्रा°। ३ ख. °द् वदिष्यन्ति च।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

चतुःषष्टिकलाविदुरा मदिरा नाम गणिकाऽस्ति । तस्या वृद्धा निगदति 'यथा तथैनं श्रेष्ठिनं युवानं रञ्जय' इति । सापि सगर्वमाचष्टे, 'कोऽयं मृदुमना गृही, अतिजठरवैराग्यकठिनमनसां योगिनामपि क्षणादेव समाधिभङ्गाय प्रगल्भेऽहम्' । इति गलगर्जि वितत्य सोपायनां स्वां दूतीं प्रजिघाय । सा च तत्र प्रणम्य सविनयं श्रेष्ठ्यनुज्ञया नीचासने निषद्य जगाद 'अवधारय स्वामिन् ! अत्र पुरे मदिरा नाम गणिका मम स्वामिनी गुणज्ञा; त्वामेषा संचरमाणं दृष्ट्वा कामशरप्रहारजर्जराऽभूत्; ततश्च

"बिभ्राणा हृदये त्वया विनिहितं प्रेमाभिधानं नवं शल्यं यद् विदधाति सा विधुरिता साधो ! तदाकर्ण्यताम् ।
शेते शुष्यति ताम्यति प्रलपति प्रम्लायति प्रेङ्खति भ्राम्यत्युल्लुठति प्रणश्यति दलत्युन्मूर्च्छति क्रुध्यति ॥ १ ॥"

इत्यादि सविस्तरमभिधाय घनसारसारफालिशालि वीटकमदात् । प्रतिवचनं च ययाचे । मकरन्देन निर्दाक्षिण्यमभाणि, 'एवंविधविदग्धभणितीनां नानभिज्ञा वयम्, अन्यत्र प्रयुज्यतामीदृशी वाचोयुक्तिः' । सा दूती श्यामानना गत्वा तां नत्वाऽचीकथत् । सा फालच्युता द्वीपिनीव नितम्बिनी विलक्षाऽऽसीत् । तथाप्यनिर्विण्णा भूयो भूयश्चाटूक्तिगर्भानऽनङ्गलेखान् प्रैषीत् । मकरन्दश्च मेरुवद् निश्चलो न चलितः । अन्यदा सा मदिरा मकरन्दाय निजाप्तचेट्याऽबीभणत्, 'त्वं तावदुपलकठिनः, अहं प्रेम्णाऽत्यन्तमृदुस्वभावा, त्वां विना जीवितुं नोत्सहे । ज्ञापितोऽसि । स्वस्त्यस्तु तुभ्यम् । पुनर्भवान्तरे दर्शनं भूयात् । अहं काष्ठानि भक्षयामि' इति । मकरन्दः श्रुत्वापीदं समुत्थाय यातः । चेट्या तत् सर्वं स्वामिन्यै विज्ञप्तम् । ततः सा दक्षैराप्तपुरुषै-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

नगरदूरस्थैः सुरङ्गां स्वगृहगामिनीं मृदङ्गपुटमात्र[1]प्रवेशतलिनभूपीठामचीखनत् । काष्ठानि चोपरि निवेशयांचकुषी विपुलापवरिकाकाराणि प्रवेशद्वाराणि च तानि विधापयामासुषी । निष्पन्नेऽस्मिंस्तन्त्रे स्नात्वा कृतदाना समहाजनाऽश्वारूढा चित्यायै चचाल । आकर्ण्य चेदं कर्णाकर्णिकया मकरन्दः सत्यमसत्यं वा स्वदृग्भ्यां निर्णिनीषुर्वेषान्तरितस्तत्र मेलापके मिलितो [2]बहिरगात् । चितासन्नस्तस्थौ । सापि चकोराक्षी तुरगादवतीर्योर्ध्वीभूय जगादैवम्, 'परमेश्वरा लोकपालाः ! अहं मकरन्दाख्यस्य निष्ठुरस्य श्रेष्ठिसूनोर्मदनविजयिरूपस्य गुणैराकृष्टा तं प्रार्थितवती; तेन तु सुभगशिरोमणिनाऽपहस्तिता 'गणिकामात्रं मायाविनी' इति दृष्टा; ततो निराशाविषादनिषादस्पर्शमलिनान् प्राणांस्तृणवत् त्यजामि, पश्यन्तु महाजनाः' इति निगद्य सद्यः काष्ठेषु विवेश । क्षणान्तरे तदासन्नैर्दत्तोऽग्निः । भित्त्वा च पदप्रहारेण भूमिपुटं सुखेन गृहमेत्य गुप्तवृत्त्या [3]तस्थुषी कैतवविदुषी । मकरन्दस्तु तत् तथाविधं दृष्ट्वा सत्यमेव मन्यमानो 'हा हा निष्ठुरोऽहं, पापिष्ठोऽहं, जडग्रहोऽहम्' इति स्वं निन्दन् स्वगृहमियाय । महाजनस्तु विचित्रवार्तामुखरः स्वं स्वं [4]स्थानं गतः । श्रेष्ठिसूनुर्न भुङ्क्ते, न शेते, न पठति, न विलिम्पति, न स्नाति; केवलं तद्दुःखदुःखितो मृत इवास्ते । गच्छति चान्तराऽन्तरा मदिरागृहम् । तत्र च मदिरायास्तानि तान्यौर्ध्वदेहिकानि क्रियमाणानि, दानानि दीयमानानि, प्रलपन्तं परिजनम्, हृदयमाघ्रानामकां पश्यति, तथा तथा बाढं पीड्यते शोकेन । गतेषु कियद्दिनेषु मकरन्दो विरहासहोऽक्कामाह, 'अहं मदिराविरहासहोऽग्निनाऽऽत्मानं मारयिष्यामि । वृद्धया ज्ञातं, प्रत्यायितोऽयम् । भाषितश्चायम्,

१ ख. प्रदेश । २ क. ग. °हिरागा° । ३ क. ग. स्थिता । ४ ख. स्थानमगमत् । ५ क. ग. °नि प्र° ।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

'कथं म्रियते ?' । स प्राह;—

"[1]ससिणेहदेहदहणे किं भणिमो तस्स विरहदहणस्स । जस्स पडियारकरणे चियानलो चंदनरसुव्व ॥ १ ॥"

ततोऽकया प्रोक्तम्, 'अस्माकमिष्टो ज्योतिर्विदेकश्छेकोऽस्ति, तं पृष्ट्वा यद् रोचते तत् कुर्वीथाः' । आहूतोऽयमकया ग्राहितमर्मा निषण्ण उपश्रेष्ठि श्रेष्ठिना जगदे 'गणक ! गणय यदि मदिराया योगं प्रेत्य मे पश्यसि तदा दिश, यथाऽग्नौ पतामि म्रिये च । अथ शठराजो गणक[2]ः स प्राह, 'मा दुःखं कृथा वृथा, इहापि सा ते पक्षान्तर्मिलिष्यति' । इति मधुरवाचं श्रुत्वा तुष्टः श्रेष्ठी गणकाय धनमदत्त । मकरन्दो दिनानि नवदशानि मदिराप्रीत्या तन्मन्दिर एव तिष्ठति । एकदोत्तन्द्रचन्द्रायां निशि वात्सु प्रोन्मीलन्नवमल्लिकासुरभिषु पवनेषु विजृम्भमाणेषु कुसुमचापचापलेषु श्रेष्ठिनन्दनो मदिरायाः प्रेमाणं स्मृत्वा 'हा ! प्रिये ! पद्मगौराङ्गि ! हा ! सुकेशि ! कृशोद[3]रि ! हा क्व गता ?' इत्यादि यावत् प्रलपति, तावदवसरज्ञा वृद्धमाता मदिरां ताम्बूलपरिपूर्णमुखीं मुक्तताडङ्कभूषितकर्णां स्फारमुक्ताकलापकिरणद्विगुणितरोहिणीरमणकिरणां शेषनिर्मोकधवलवसनावृतां गजपतिगमनां पुष्पस्रजालङ्कृतकरकमलां प्रेष्य मकरन्दस्य पुरोऽतिष्ठिपत् । यावत् पुरः पश्यति तावत् प्रलापवाचोऽपि सत्यतामवापुः । सैव पुरो वर्तते मदिराक्षी । अभाषत च 'किं सैव युवजनोन्मादमदिरा मदिरा ?' । सापि माकन्दमकरन्दभरोपभो-

---

१ सस्नेहदेहदहने किं भणामस्तस्य विरहदहनस्य । यस्य प्रतिकारकरणे चितानलश्चन्दनरस इव ॥ १ ॥

२ क. ग. °कः प्रा° । ३ ख. °दरीहागच्छेत्या° ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गमाद्यत्कोकिलाकुलकलकलकोमलया वाचोवाच 'हुं' इति। श्रेष्ठी आह, 'कुतस्त्वं जीविता जगज्जीवातुदर्शने ! ?'। सा प्राह, 'भृङ्गाररसभृङ्गार ! त्वद्ध्यानमग्नाऽहमग्निसाहसं साधयित्वा दिवमगाम् । तत्र शक्रो मां सगौरवमद्राक्षीत्; उवाच च, 'याचस्व सात्त्विकि ! किञ्चित्' । मया तु विज्ञप्तम् 'यदि तुष्टोऽसि तदा मर्त्यदेहेन मामनेन सह योजय, यदनादृतया मया सत्त्वमिदमाचेरे'। तेनापि भगवताऽहमिह नाकलोकादानीय मुक्ताऽस्मि' । एवं श्रुतेऽमृतमयमिव, मदनमयमिव, महोत्सवमयमिव तं क्षणं मेने । स्थितश्च तया सह । रक्तचित्तश्च सर्वस्वं शनैः शनैर्गृहीतः ।

"गणयन्ति नापशब्दं न वृत्तभङ्गं क्षयं न चार्थस्य । रसिकत्वेनाकुलिता वेश्यापतयश्च कवयश्च ॥ १ ॥"

निर्द्रव्यो जातः । वेश्यया तादृग् बहु मन्यते न । बहुमानमलभमानेन मकरन्देनाप्तपुरुषपार्श्वाद् हीरकः श्रेष्ठी ज्ञापितः सर्वां[1] कथाम् । विषण्णः कुपितश्च श्रेष्ठी गत्वा कुट्टिन्यै कथयामास, 'त्वं मम लक्षं देहि पुत्रपाठपदप्रदत्तम्, त्वया पाठितोऽपि देशान्तरगत एवमेवं जग्धः स साधारणस्त्रिया' । सापि तद्वचनमाकर्ण्य सकर्णाऽभ्यधात्, 'श्रेष्ठिन् ! जीवदवस्थाप्रपञ्चान् गणिकासत्कास्तमध्यजीगपम्, न तु मृत्यावस्थासत्कान्, तथापि विषादं मा [2]कृथाः, सर्वं सकलान्तरं व्यावर्तयिष्यामि, चल मया सार्धं तत्र' । मन्त्रयित्वा गतौ तौ तत्र नगरं प्राविशताम्। श्रेष्ठिनो डुम्बवेषं [3]स्वस्य च डुम्बीवेषमचीकृपत् । एकदा तं मकरन्दं मंदिरया सह गृहद्वारमण्डपिकायां दन्तिदन्तमये पट्टे निषण्णं दासीभिश्चन्दनरसेन संवाह्यमानचरणं दृष्ट्वा तौ डुम्बौ गतौ तत्र ।

१ ख. °रश्रे° । २ क. ग. कुरु । ३ क. ग. तस्याश्च ।

Shri Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ततः साह, 'ही वत्स ! कास्मान् विहाय गतोऽसि ? पुनर्विज्ञप्तिकामात्रमपि न दत्तवानसि; अधुनाप्येह्येहि, सर्वाङ्गमालिङ्गनसुधासारेण सिञ्च सर्वाङ्गानि; क तावन्मात्रं धनं त्वया गमितम् ?' इत्यरुदताम् । अथ मिलितो वेश्यापरिजनः । वृद्धा खेदमेदुराह,[1] 'क गन्तव्यम्, किं दत्त्वा छुटितव्यम्, कः शरणं प्रतिपत्तव्यः ?' इत्यादि । गुप्तमुक्तौ 'युवाभ्यां स्वस्य ग्रहिलत्वं प्रकाश्य सर्वमपि लात्वा गन्तव्यम्, मालिन्ये गते पुनर्मदिरेन्दिरया मन्दिरं पूरयेत्' इति । ततः सर्वद्रव्यं गृहीत्वा वेश्याकुलक्रमायातं पुत्रदत्तं च, निजपुत्रं गृहीत्वा श्रेष्ठी सकुट्टिनीकः सद्रव्यो निजनगरमागात् । पुत्रं स्वपदे निवेश्यानुशिष्य स्वयं दीक्षामादाय जन्मजराविरहितं पदमवाप ॥

॥ इति स्त्रीमायाकथा ॥ १९ ॥

---

यद् यदेको बुधो वेत्ति तत् तदेवापरे बुधाः । पयःस्थाने पयः क्षिप्तं सर्वैर्नृपतिपण्डितैः ॥ १ ॥

कचित् पुरे श्रीपुञ्जाख्यस्य राज्ञोऽधीतसकलविद्यानां कवीनां पण्डितानां पञ्च शतानि ग्रामाग्रहारादिग्रासवाससुस्थितानि विद्यन्ते । एकदा राज्ञा पुत्रिकापाणिग्रहणे भोजनवेलाप्रक्रमे पञ्चापि पण्डितशतान्यादिदेश, 'रे घोलगृहे नान्दीपात्रेष्वेकैकं दुग्धकुम्भं क्षिपध्वम्' । पण्डिताः सर्वेऽप्युत्थायागुः । एकेन विमृष्टम्, 'ममैकं जलकुम्भं बहुदुग्धकुम्भेषु को ज्ञास्यति ?' । इति

---

१ क. ग. खेदार्ता क्व° ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

धिया जलकुम्भमेव न्यक्षिपत् । एवं शेषा अपि सर्वे । यावत् कर्मकराः क्षीरं निभालयन्ति तावज्जलमेव । राजा विज्ञप्तः कौतुकात् स्वयं द्रष्टुमागात् । तत् तथैव । जगाद च सहासं 'सर्वेषां पण्डितानामेकैव मतिः' ॥

॥ इति पण्डितकथा ॥ २० ॥

---

कलहिन्या गृहिण्या भोः ! के के नोद्विजिता जनाः ? । साऽत्रागतेति श्रुत्वैव त्यक्त्वा पात्रं गतोऽमरः ॥१॥

केतकपुरे[1] कोकशिवो नाम ब्राह्मणः, आजन्मदरिद्रोऽपठितश्च । तस्य भार्या कलहशीला, काणा, कुरूपा, कुटिला, कृपणा, कलङ्किनी, वाचाला, निर्दया, सक्रोधा, अशौचा, मर्मभाषिणी, भर्तुः स्नानान्नपानादिचिन्तां न करोति, उदरम्भरिरेव केवलम्; भिक्षूनाक्षिपति; बालांस्ताडयति; देवगुरूणां नामापि न जानाति[2] । तद्गृहासन्नद्रुमे च झोटीङ्गव्यन्तर एकः कृतावतारोऽस्ति । तस्य द्रुमस्य मूले सा महिला फेलामुत्सृजति, कोकूयते च कलहेषु । अतो निर्विण्णो व्यन्तरस्त्यक्त्वा तं तरुं देशान्तरं गतः । कोकशिवोऽपि भार्यादुर्विनय-दारिद्र्ययोर्ग्रीष्मसमयदावाग्न्योरिव योगमसहिष्णुर्निशि नंष्ट्वा देशान्तरमधावत् । ग्रामाद् ग्रामान्तराणि पर्यटन् महानगरस्यैकस्य सविधे वाटिकायामुपविवेश सान्द्रद्रुमतले । स तु व्यन्तरस्तत्रास्ते । तेन सम्यग् निरूप्योपलक्ष्य भाषितश्छायारूपेण वपुषा, 'भद्र ! कोकशिव ! त्वं मां व्यन्तरं जानीहि' । कोकशिवः प्राह, 'को व्यन्तरः, कुतस्त्यो वा ?' । व्यन्त-

---

१ घ. कैतवपु° । २ क. ग. वेत्ति ।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रोऽवदत्, 'त्वद्गृहासन्नद्रुमव्यन्तरोऽहम्, त्वद्भार्याक्रूरकलिकेल्युच्छिष्टिभ्यां खिन्नोऽस्य पुरस्येहारामे स्थितः कालं क्षिपामि यदा, ग्रासेच्छा स्यात् तदा यमपि तमपि नरं वा नारीं वा गृह्णामि, भुक्तिं लभे; त्वं कथमायातोऽसि, कथय प्रवृत्तिम्?' । स प्राह 'यथा त्वं तथाऽहं तत एव पातकिन्या भीतो भ्रमामि' । व्यन्तरः सकृपः स्माह, 'कथं भोक्ष्यसे?' । विप्रः प्राह, 'यथा त्वं भोजयिष्यसि तथा भोक्ष्ये' । व्यन्तरोऽवदत्, 'उत्तिष्ठ, अन्तर्नगरं श्रेष्ठिशालिभद्रस्य सुतं ग्रहीष्यामि, तत्र त्वं मन्त्रवादायोपतिष्ठेथाः, द्रम्मपञ्चशतीं याचेथाः, पुनर्मा लुभः, त्वन्मन्त्रवादे मिथ्याडम्बरात् तमहं त्यक्ष्यामि' । एवं प्रतिज्ञाय कृतं तत् तथैव । लब्धा पञ्चशती । लब्धास्वादो ब्राह्मणश्चिन्तयति, 'पुनरपि द्रविणं लभे चेत्, तदा सुष्ठु स्यात्' । एकदा तेनैव व्यन्तरेणान्यः कोऽपि प्रधानबालको जगृहे । द्विजो दध्यौ, 'ध्रुवं स एव व्यन्तरोऽत्रापि विलग्नो भविष्यति' । एवं च संभाव्य गतस्तत्र । प्रारब्धो मन्त्रवादः । जवनिकान्तरितो व्यन्तरः स्फुटं जगाद, 'एकदाऽऽतिथ्याद् दत्तं ते, पुनर्लुब्धो मामुच्चाटयितुमागतोऽसि, हनिष्यामि त्वाम्'[1] । इति मुष्टिमुद्यम्योत्तस्थौ[2] । द्विजः शठः प्राह, 'नाहं लोभादागाम्, किन्तु ज्ञापयितुं 'सा द्विजी दुष्टाऽऽगता' इति । श्रुत्वेदं 'किमागतैव सा हा हा' इति भयाद् नंष्ट्वा देशान्तरं गतः । द्विजः पात्रीजीवनद्रविणं प्राप ॥

॥ इति कलहकारिपत्नीकथा ॥ २१ ॥

---

१ ख. °ऽगादीत् । २ ख. °मुत्पाट्य तस्थौ ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

असमञ्जसवाग्लोके न भाव्यं कर्णदुर्बलैः । गृहभञ्जकेन चक्रे कलिः पतिकलत्रयोः ॥ १ ॥

शान्तिपुरे तिलकः श्रेष्ठी । विजया भार्या । तौ द्वौ मिथः स्नेहलौ । अपत्यानि तयोर्न जीवन्ति । अतः पृच्छतो ज्योतिषिकान्, गृह्णीत उपश्रुती, [1]स्नानतीर्थेषु ददाते दानानि । एकदा तद्गृहे शठो वैदेशिक एक आयासीत् । स भोजनमयाचत् । न पुनः प्रापत्, अतोऽकुपत् । 'अस्मिन् गृहे पुत्रा न जीवन्ति' जनमुखादिति पर्यज्ञासीत् । ततो द्वादशतिलकभृच्छुचिवेषो द्विजो ज्यौतिषिको भूत्वा पुनर्गृहमागात् । श्रेष्ठिन्या पप्रच्छे, 'के यूयं, किं वित्थ ?' । स [2]प्राह, 'महामौहूर्तिकोऽहं त्रिकालज्ञः' । तयाऽभाषि, 'तर्हि किमिति ममापत्यानि न जीवन्ति ?' । शठो बभाषे, 'तव भर्ता राक्षसः, तान्येष भक्षयति दुर्धरमन्त्रशक्त्या' । सा प्राह, 'कः प्रत्ययः ?' । सोऽप्याचष्ट दुष्टः, 'तस्य शरीरं क्षारमस्ति, लीढ्वा गवेषयेः' । इत्येकान्ते तया सह मन्त्रयित्वा गतो हट्टम् । आलापितः श्रेष्ठिना, 'दैवज्ञ ! वेत्सि किञ्चित् ?' । स प्रललाप 'सर्वम्' इति । ततः प्रमुदितः स पप्रच्छ, 'किं मे पुत्रा जाता जाता विपद्यन्ते ?' । स उत्तरयति, 'तव भार्या शाकिनी, सा तानि जातमात्राणि [3]जक्षिति' । 'कः प्रत्ययः ?' । स ऊचे, 'सा तव सुखसुप्तस्य विश्रब्धस्य जिघांसया जिह्वयाऽङ्गं लेक्ष्यति, इति लिङ्गम्' । विसृष्टो गणकः । श्रेष्ठी मन्दिरे सुप्तो मध्याह्ने पल्यङ्कतल्पे । श्रेष्ठिन्यासन्ना । यावत् तिलकश्रेष्ठी छद्मना निद्राति तावत् सा ज्यौतिषिकवाक्प्रत्ययाय पृष्ठं लेढुं ढुढौके । श्रेष्ठी तद्वाक्प्रत्ययापन्नः 'शाकिनि ! ज्ञाताऽसि' इति चुक्रोश । सापि 'रे राक्षस ! बुद्धोऽसि' इति निष्ठुरं

१ ख. स्नातः । ती° । २ ख. स्नाह । ३ क. ग. भर्क्षयति ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ललाप । कलिर्मुहूर्तमेकं यावद् बभूव, तावन्मिलिते लोके वार्तामूले गृहीते 'गृहभञ्जकस्य कस्यापि विलसितमिदम्' इति जज्ञे । तावत् सोऽपि कलिनारदः कलिं समालोकयन् गृहोद्देशमागतोऽस्ति । लोके मिलिते समेत्यात्मानं कलिकारापकं जगौ ॥

॥ इति गृहभञ्जककथा ॥ २२ ॥

---

**तारुण्ये द्रविणं दद्याद् विद्यमाने पराक्रमे । आसन्ने मरणे वृद्धा वधुकाभिर्विडम्बिता ॥ १ ॥**

कुन्तलपुरे[1] देवधरश्रेष्ठी[2] । तस्य भार्या शोभिनी । तयोश्चत्वारः पुत्राः, चतस्रो वध्वः । देवधरो दिवमगमत् । शोभिनीशिक्षया कुटुम्बनिर्वाहः । शोभिन्या चतसृभ्यो वधूभ्यश्चत्वारि वस्तूनि–निक्षेपे प्रथमायै हेमशृङ्खलिका[3], द्वितीयस्यै अङ्गुथलकः, तृतीयस्यै हेमशृङ्खलकम् , चतुर्थ्यै त्रीणि शतानि–इति यथासंख्यमर्पितं शेषकुटुम्बाद् गुप्तवृत्त्या । एकदा क्षयरुजा बाधिता[4] वृद्धा । क्षीणो जठराग्निः । पदात् परं चलितुं न शक्नोति । महता कष्टेन भाषते । यदा तु वैद्यैरुपेक्षिता तदा भूमौ निक्षिप्ता । मुद्राद्युत्तारणाय सुताः[5] सज्जीभूताः । निष्पद्यते बहिर्याप्ययानम् । मिलितः स्वजनलोकः 'अनशनमुच्चारयतोच्चारयत' इति । पर्यन्ते सूरयः । भण्यन्ते परमेष्ठिपदानि । तावन्निभृतान्तश्चैतन्याडोलोत्कलिका 'मद्धनस्य वध्वायत्तीकृतस्यायमेवावसरः' इति विभाव्य प्रथमां वधूमव्यक्तमभाषत, 'वत्से ! सांकली' । स्वजनैः पृष्टम्, 'वत्से ! किमाह श्वश्रूः ?' । स्नुषा शठतानिधिरभिदधे, 'श्वश्रूराचष्टे' 'सांगरी' 'सांगरी' इति; पूर्वमप्यभिरुपितं ह्येतच्छाकमस्यै । द्वितीया तु 'अंगूथल' इति 'अङ्गमुच्छाल्यताम्'

---

१ क. ग. °पुरनगरे । २ ख. °ष्ठी । भा° । ३ घ. °ङ्खलं । अंगूथलकौ द्वयोः । तुर्यायास्त्रीणि । ४ घ. पीडिता । ५ ख. प्रगुणीबभूवुः सुताः ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

 

इत्यार्या भाषते' । तृतीया तु 'सांकलुं' 'सांकडउं' इति समर्थयते स्म । तुर्या तु 'तिन्नि सय' इत्येतत् 'टीडसां' इति लोकेऽजिज्ञपत् । जरती क्षणान्तरे मृता[1]ऽकृतप्रेयःपाथेया ॥

॥ इति लोभे मूढ[2]जरतीकथा ॥

---

**तत्त्वातत्त्वविचाराय स्वैव बुद्धिः क्षमा नृणाम् । परोपदेशो विफलो दुर्बुद्धेः, कुलपुत्रवत् ॥ १ ॥**

सुधान्यग्रामे स्थविरैका निवसति । तस्याः पतिर्यौवनावस्थायां परासुरासीत् । पुत्रस्त्वेको वर्तते । तं च स्वं च परगृहकर्मकरण–कर्तन–लोष्टनादिभिश्चिरमजीजिवत् । सुतस्तु पशुप्रायोऽन्ननिष्ठापनशूरो निरक्षरः स्थूलबहुलोऽरण्यजीववदव्यवहारज्ञः । तमेकदा वृद्धा स्निग्धाक्षरमवदत्, 'वत्स ! त्वं पालं पालं श्मश्रुधरः कृतोऽसि, संप्रति कामपि निर्वाहचिन्तां विभृष्व' । सुतः प्राह, 'मातः ! कमुपायं सूत्रयामि[3] ?' । मातापि[4] समाचचक्षे, 'आसन्ननगरे त्वत्पितुः स्वामी प्रौढराजपुत्र एकश्छेकः[5] सुसेवोऽस्ति, तं सेवितुं प्रयाहि' । इत्युक्त्वा जीर्णकोशस्थं मलपङ्किलं खड्गं समर्प्याशीर्वादयित्वा विससर्ज । स गच्छन् पप्रच्छ तुच्छमतिः, 'मातः ! लोकरञ्जने क उपायः ? शाधि, कदापि न शिक्षितोऽहम्' । माताऽभाषत, 'वत्स ! दृष्टे मनुष्यमेलापके तारस्वरमभिधातव्यं 'नमस्कारः' इति । चचाल बालिशो ग्रामात् । अरण्यं गतः । तत्र मृगयुषु मृगग्रहणाय धृतपाशेषु, मृगेषु



---

१ क. ग. °ता । यथाऽऽयाता तथा याता, निष्फलं जन्म धिक् तस्य । ख. °ता यथाऽऽयाता तथा याता निरर्थकं जन्म तस्या धिक् । २ ख. °ढकूपणिकाक° । ३ क. ग. करोमि । ४ क. ग. °ताप्याह । आ° । ५ क. ख. °श्छेकसुसेवितोऽस्ति ।

Gunratnasuri M.S. Jun Gun Aaradhak Trust

गीताकृष्टेषु तदासन्नमागतेषु ग्रामेयकस्तारं तारं 'नमस्कारः, नमस्कारः' इति जल्पति स्म । ततो मृगास्त्रस्ताः । मृगव्यनरास्तं रुरुषुः । मुष्टियष्टिलोष्टादिभिर्जघ्नुः । स तु बभाषे, 'अहं मात्रैवं शिक्षितः, मा मां घातयत'। 'स्थानान्तरं गतः' कथं व्यवहरेयम् ?, इति पृष्टांस्ते दुष्टाः प्रोचुः, 'दृष्टेषु मानवेषु नीचकैर्भूयत इति परममावर्जनारहस्यम्' । पुरः प्रतस्थे तैर्मुक्तः । स विशङ्कः पशुर्नगरपरिसरमाप । तत्र पूर्वं चौरहृतानि रजकानां वस्त्राणि गतानि सन्ति । तैर्गूढपुरुषाः प्रयुक्ताश्चौरप्रचारमालोकयन्ति । तत्रान्तरे स मूर्खः कुलपुत्रोऽपि तत्रोपसर्पन् नूनं द्वित्रान् वस्त्रासन्न आपतन् ननाम । नमन् नमन्नागच्छन् 'अयमेव चौरः' इति बद्धो हतश्च रजकैर्मेलितः कुम्भकृन्मृत्तिकायाः । तत्रापि सद्भावे कथिते [1]तैर्मुच्यमानस्तान् पृष्टवान्, 'मां तथा शिक्षय यथा नाहं पराभूये परैः' । इत्युक्तौ 'नूनं व्यवहारबाह्योऽयम्' इति निश्चित्य शठा अशिक्षयन् 'दृष्टे [2]जने घने 'भवतां शिरस्यूषः पततु' इति वाच्यम्' । पुरः संचरन्नुद्यानिकायात्रार्थं गच्छतो नूनं दृष्ट्वा 'भवतां शिरस्यूषः पततु' इति न्यगादीत् । तैरपि कपोलपूजा चक्रे । सत्ये प्रोक्ते मुक्तः पाठितश्च, जनेषु दृष्टेषु 'सर्वदैवं वो भूयात्' इति ब्रूयाः । पुरस्तान्मृतकमागच्छति । स उवाच 'सर्वदैवं वो भूयात्' इति । तैरपि वृन्दस्थैः क्षते क्षारनिक्षेपपरः स पिट्टयांचक्रे । सत्ये कथिते प्रैषि, शिक्षितस्त्वेवम्, 'कदापि मैवं भूयात्' इति । अग्रे वैवाहिकवृन्दं दृष्ट्वा 'कदापि मैवं भूयात्' इति लपन् कणमूढकवत् पिट्टितः । एतावद्भिर्महोत्सवैः स्वगुणलब्धैः पुरं प्रविशन् राजपुत्रगृहं गतः । तं दृष्ट्वा ननाम । तेनापि स्वपार्श्वे स्थापितः । 'द्रम्मं भञ्जयित्वा समेहि' इत्यादिष्टे

---

१ क. ख. ग. मुक्तः शिक्षितश्च तैर्बाह्य इति । दृष्टे । २ ख. घने जने, ग. जने भ° ।



P.P. Ac. Gunratnasuri M.S.	Jun Gun Aaradhak Trust

द्रम्ममेव भनक्ति लोष्टैः । 'पशुं बधान' इत्युक्ते पशुमेव रज्जुभिर्वेष्टयति । अन्यदा शीर्षस्थगोमयपिटकया दास्या सह शिरःस्थ-जलघटः स प्रैषि बहिः क्षेत्रखलकलेपनाय । गच्छता पृष्टम् 'मया किं कार्य ?' । स्वामिनोक्तम् 'यदियं करोति' । क्षेत्रे गतया तयोर्ध्वया गोमयपिटकं क्षिप्तम् । तेनाप्यूर्ध्वेन घटः क्षिप्तो भग्नश्चायम् । जलमगलत् । ततश्चपेटया हतोऽसौ दास्या कोपात् । सोऽपि 'यदियं करोति तत् त्वया कार्यम्' इति स्मरणात् तां जघान दृढचपेटया । नष्टा सा गृहं गता । सोऽपि गृहं गतः । गृहस्वामिना पृष्टम्, 'किमिदम् ?' । ताभ्यामपि स तादृग् वृत्तान्तो निवेदितः । जहसे कुटुम्बेन । परमार्थानभिज्ञः स एवं स्वामिनं दुनोति । अन्येद्युर्ग्रामपरिषदि स्थितं स्वामिनं गत्वा गाढस्वरं प्रोवाच, 'राजपुत्र ! रब्बा निष्पन्नास्ति, उत्तिष्ठोत्तिष्ठ' । विगुप्तः प्रभुरुत्थाय लज्जमानो ययौ । शिक्षयामास च, 'यथावसरं रहो वक्तव्यं कर्णे लगित्वा' । कालान्तरे तु राजपुत्रस्य गृहे प्रदीपनं लग्नम् । राजपुत्रो राजकीयकार्ये निषण्णोऽस्ति । गृहमानवैस्तत्र प्रहितो जाल्मः 'कथय रे गत्वा यथा वृन्देनागत्य शमयति वह्निं गृहपतिः' इति । गतोऽसौ तत्र यावत्, पश्यति तावज्जनाकुलम्, 'नाद्याप्यवसरः' इति पुरस्थश्चिरं तस्थौ । क्षणान्तरे कर्णे भूत्वा 'ते गृहे लग्नोऽग्निः' इत्युक्तम् । सोऽपि सभ्रूभङ्गमुवाच, 'रे किं तदैव न ज्ञापिता वयम् ?' । सोऽप्याह, 'समयो नाभूत्, भवद्भिरेवोपदिष्टं 'समये विमृश्य रहो वक्तव्यम्' इति । स्वाम्यपि सविषादं सहासं सदैन्यं सचिन्तं च परामर्श, 'जड एवायम्' ।

१ ख. कृशानु° ।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

"यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम् । लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति ? ॥ १ ॥"

क्षणार्धेन यावत् समुत्थाय गृहमेति तावद् भस्मीभूतं गृहम् । बाहौ धृत्वा बालिशमुवाच स्वामी, 'पश्य, तव चिरविलम्बनकथनेन विनष्टमिदमीदृक् । तस्मादतः परं यत्राग्नेर्लेशं धूमशिखामात्रमपि पश्यसि, तत्र यत्तज्जलमारनालं मूत्रं वा क्षेप्यमेव' इति न्यदिक्षत् । स्थितश्चायं तन्निष्ठः । अन्यदा कृतस्नानो राजपुत्रः केशपाशधूपायनाय जालिकाकुलं धूपदहनं पुरतः स्थापयित्वा न्यषीदत् । धूपमदहत् । कुलपुत्रकस्तु तमुपदेशं स्मृत्वा सहसानीयोपरि मलिनं जलं पात्रे कुत्सिते स्थितं, शिरसि चिक्षेप । क्रुद्धः प्रभुः शिरसि हत्वा तं निरवासयत् । स्वप्रज्ञाहीनतया सोऽपि पशुदेश्यो रुलित्वा ममार ॥

॥ इति मूर्खकथा ॥ २४ ॥

---

**त्रिदशा अपि वञ्चयन्ते दाम्भिकैः, किं पुनर्नराः । देवी यक्षश्च वणिजा लीलया वञ्चितावुभौ ॥ १ ॥**

'देवपुरे कुलानन्दः श्रेष्ठी । मदनकलिका पत्नी । पुत्रो नास्ति । अतस्तन्नगरकृताधिष्ठानायाः सप्रभावाया देव्याश्चामुण्डायाः कृतमुपयाचितं श्रेष्ठिन्या, 'यदि मे त्वत्प्रसादात् पुत्रो भावी तदा लक्षत्रयमयीं पूजां करिष्यामि' इति । जातः क्रमेण पुत्रः ।

---

१ क. ग. दिव° । २ ख. श्रेष्ठिनी ।

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

भर्त्रे कथितं तदुपयाचितम् । तेनापि 'युक्तम्' इति भणता लक्षेण लक्षेण निष्पन्नं पुष्पत्रयं हैमं सरत्नं घटितम् । सपरिजनेन गत्वा पूजापूर्वं तत् पुष्पत्रयं देव्या भाले भुजयोश्च किल पूजायै न्यस्तम् । श्रेष्ठिना स्वस्य पत्न्याः शिशोश्च शेषापदे गृहीतम्, यथास्थानं च जग्मे शठमौलिमौलिना । देवी विलक्षा सती सहियडनाम्नो मित्रदेवस्याग्रे मनोदुःखं निवेदयितुं गता । न्यवेदयच्च यथा—'देव ! कुलानन्दवणिजाऽहमेवं पुष्पाणामर्पणेन युक्तिपूर्वं ग्रहणेन च वञ्चिता, किं करोमि ?' इति । सहियडोऽपि स-दुःखं जगौ, 'त्वं सुखं समर्थं छुटिताऽसि, शृणु, यथाऽहमनेन कदर्थितोऽस्मि । पूर्वमस्य वाहनमन्तर्वार्धि प्रवासितं गतम् । क्वापि[2] नामापि न श्रूयते । ततोऽसौ मामेत्य 'महिषं ते दास्यामि, वाहनं मे समागम्यात्' इति प्रत्यपादि । आनीतं च तद् मया स्वशक्त्या । आययुर्वार्धापनिकाः । उत्सवोऽस्य गृहे । यावत् प्राप्तं क्षेमेण वहित्रं, विक्रीतं वस्तु । लाभोऽप्यमेयः । मया याचितोऽसौ स्वप्ने । सोऽपि तरुणमहिषमानीय तद्गलरज्जुं मम गले बबन्ध । वादित्राणि भेरीभुंगलमृदङ्गादीनि युगपद् वादयामास । त्रस्तो महिषः, चिरमरण्यवास्तव्यपरत्वात् । मां स्वेन सह रज्जुना घर्षन्नाचकर्ष यमवाहनः । ममाङ्गे चन्द्रिकाः । ताः किलाद्यापि नैं शान्तिमायान्ति । निःशूके च नाहमपि प्रभवामि । तस्मात् त्वं मा स्म रुदः । महद् भाग्यं ते, नाद्यापि किमपि विनष्टम् । याहि स्वगृहम् । किं नाश्रौषीः ?



१ क. ख. ग. स° । २ क. ग. °पि न । ३ ख. बोहित्थं । ४ ख. नो ।

For Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

"कोऽर्थान् प्राप्य न गर्वितो विषयिणः कस्यापदोऽस्तं गताः ?, स्त्रीभिः कस्य न खण्डितं भुवि मनः को नाम राज्ञां प्रियः ? ।
कः कालस्य न गोचरान्तरगतः कोऽर्थी गतो गौरवं ? को वा दुर्जनवागुरासु पतितः क्षेमेण यातः पुमान् ? ॥ १ ॥"

इत्यादि' । गता देवी ॥

॥ इति वञ्चकश्रेष्ठिकथा ॥ २५ ॥

---

**आमूलचूलं श्रोतव्यं श्रोतव्यं नांशमात्रतः । अज्ञातपारम्पर्येण गुरुः शिष्येण ताडितः ॥ १ ॥**

वीरपुरे कश्चिज्जटाधरो जरातुरो बधिरः । तस्य महावैधेयः शिष्यः । कदाचिद् गुरुणा शिष्यो वादितः, 'वत्स ! बधिरो न किमपि शृणोमि । गत्वा वैद्यं पृच्छ किमप्यौषधम् । चलितः शिष्यो मध्याह्नसमये वैद्यगृहद्वारं यावज्जगाम, स्थितश्चोर्ध्वस्तत्रैव, तावद् वैद्यो नगरं भ्रान्त्वाऽऽगतः स्वगृहम् । तेन च प्रातर्भ्रमणिकायै गच्छता ज्येष्ठपुत्रो, लघुपुत्रपाठनाय नियुक्तोऽभूत् । स ज्येष्ठपुत्रो भाषितः, 'भोः ! त्वयाऽस्य शिशोः पाठने किमपि यत्नः कृतो नवा ? पट्टिका समभ्यस्ता नवा ?' । ज्यायानुवाच, 'तात ! मद्वचनमसौ न शृणोति, इत आहूत उत्प्लुत्य परतो याति' । कुपितो वैद्यो बालं तं चपेटाभिर्जघान चिरं, 'किं रे ! श्रोष्यसि नवा ?' इति भूयो भूयो बभाषे च । श्रुत्वा चैतद् भरटकशिष्य इदमेव हननं बाधिर्यभञ्जनोपाय इति निश्चित्य मठं गत्वा गुरुं हस्ते गृहीत्वा भुवि पातयित्वा प्रचण्डचेटाभिस्ताडयति, 'किमद्यापि न शृणोषि ?' इति वदति च । मिलितो लोकः ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पृष्टं गुरुकुट्टने कारणम् । सोऽपि 'औषधमिदम्' इति वदति । 'कुत इदमौषधं ज्ञातम् ?' इति पृष्टे, 'वैद्यात्' इत्युक्ते, 'को वैद्यः ?' । 'अमुकः' । पारम्पर्ये गवेष्यमाणे मूलं न किश्चित् । महता क्लेशेन मार्यमाणो लोकेन रक्षितः ॥

॥ इति मूर्खशिष्यकथा ॥ २६ ॥

---

**यो यथा बुध्यते जन्तुस्तं तथा बोधयेद् बुधः । काकप्रलापी दधनेत्यार्यो याज्येन बोधितः ॥ १ ॥**

क्वचिद् ग्रामे धनधान्यसमृद्धोऽस्त्येकः श्रेष्ठी । स च तापसभक्तो, दाता, विनयी, दक्षः । अतो नगरादेकं टट्टारशिवं नाम तपस्विनं समाकार्य स्वग्राममानयत् । चतुर्मासीमवास्थापयच्च । अर्धमात्रे गते वर्षारात्रे ग्रामो रात्रौ धाव्या ज्वालितः । सर्वगृहेष्वन्नं दग्धम् । लोका नेशुः । यावता गुरुनतिनियमवान् यजमान आगात्, तावता तद्गृहं लग्नम् । ज्वलितमन्नरूतवस्त्रकर्पासादिवस्तुजातम् । प्रातः क्षुधार्तो गुरुः । प्रेषितः शिष्यो भिक्षानयनाय । जगाम यजमानगृहम् । किमप्यन्नं ययाचे । तैस्तु सकलां रात्रिं जागरितैरग्नितापार्त्ताङ्गैः सर्वदाहदुःस्थैः कौटुम्बिकैरुत्तरं कृत्वा प्रहितः । प्राप्त उपगुरु । गुरुस्त्वन्नालाभे दुःस्थः प्राह, 'यदपि तदपि भक्ष्यमानय', इति पुनस्तमेव प्राहिणोत् । तेनापि कस्मिंश्चिन्निम्बद्रुमे रात्रिलग्नाग्निज्वालादग्धमृतपतितकाकशवाङ्गान्यानिन्यिरे । गुरुस्तान्येव जिग्रसिषया चुन्थयितुं प्रवृत्तः । अत्रान्तरे प्राप तद्यजमानः । तादृशं विकर्म दृष्ट्वा गुरुमुपालेभे, 'गुरो ! स्मृतिवेदपुराणेष्वपि काकमांसभक्षणं न विहितम्, किमेतदारब्धं भवता ?' । गुरुराह, 'यजमान ! भृशं क्षुधा



P.P. Ac. Gunratnasuri M.S.  Jun Gun Aaradhak Trust

बाधितोऽहम्, तव तु गृहेऽग्निदाहादन्नादिप्राप्तिर्नास्ति, अत एव काककलेवराण्यद्मि । न ह्यपरं किमपि विद्मः, मातृकापुराणं तु गुरुपरम्परया जानीमः । तत्र 'क ख' इति पठ्यते । अस्यायमर्थः—'क' इति काकाः, 'ख' इति खादनीयाः । इति शास्त्रोक्ताचरणे को दोषः ?' । यजमानेन तस्य तावतीं पात्रतामाज्ञायाऽवादि, 'भगवन्! मातृका चेत् प्रमाणम्, तर्हि तत्रैव 'द ध न' इति चिन्त्यताम्, 'दग्धाः काका न भक्ष्याः स्युः' इत्यस्यार्थः । गुरुर्वदति 'हुं ज्ञातम्, त्यक्तास्तर्हि वायसाः' ॥

॥ इति व्यवहा[1]राज्ञबोधकथा ॥ २७ ॥

---

अर्थः प्राणापहाराय कोऽप्यायाति ध्रुवं नृणाम् । लब्ध्वापि हैमपुरुषं चत्वारो निधनं गताः ॥ १ ॥

हेमपुरे राजपुत्रः १ मन्त्रिपुत्रः २ पुरोहितपुत्रः ३ श्रेष्ठिपुत्रः ४ इति चत्वारः समसुखसुखिताः समदुःखदुःखिताः सहपांशुक्रीडिताः समानवयसः सुहृदः । ते देशान्तरकौतुकदर्शनाय पितॄ[2]नापृच्छ्य चेलुः । बहुमार्गमुल्लङ्घ्य सायमटव्यामेकस्यां द्रुमतले स्थिताः । 'एकैकेन यामो यामो जागरितव्यः' इति निर[3]चायि । प्रथमे प्रहरे श्रेष्ठिपुत्रो जागर्ति । शेषाः सुप्ताः द्रुमशिखरे शब्द उदपादि, 'अर्थोऽस्मि परमनर्थवेष्टितः, यदीच्छसि तदोपतिष्ठेः' । वणिजाऽनर्थभीरुणाऽभिदधे, 'मा स्मागाः' । एवं द्वितीये या[4]मे पुरोहि-

---

१ क. ग. घ. °हारबोधककथा । २ क. ग. °तॄन् पृष्ट्वा चे° । ३ क. ग. °रवाचि । ४ क. ग. प्रहरे ।

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

 



तत्पुत्रः, तृतीये[1] मन्त्रिनन्दनः । ताभ्यामपि तं शब्दं श्रुत्वा निषेध एवादधे । तुरीये त्वेक एव राजपुत्रो जागर्ति । शेषास्तु निद्रान्ति । स एव शब्दः श्रुतः । राजपुत्रः सत्त्ववान्

"श्रियमनुभवन्ति धीरा न भीरवः किमपि, यदिह शस्त्रहतः । कर्णः स्वर्णालंकृतिरञ्जनरेखाङ्कितं चक्षुः ॥ १ ॥"

इति विचिन्त्य 'स्वच्छन्दमागच्छ' इत्यूचे । पतितः पुरो हैमनरो विशालाङ्गः । प्रातरभूत् । रात्रिवृत्तान्तमन्योन्यं भाषमाणाः पुरश्चेलुः । प्रापुर्ग्राममेकम् । मध्याह्ने द्वौ भोजनायान्नाहरणाय तत्र गतौ । 'आवामेवास्य हेम्नः स्वामिनौ स्याव' इति विमृश्य सविषमन्नं लात्वोपमित्रमागतौ । बाह्याभ्यामपि तथैव विमृश्यासिना हतौ । हन्तारौ पुनरन्नभोजने क्षणादेव क्षयं गतौ ॥

॥ इत्यर्थस्याप्यनर्थमूलत्वकथा ॥ २८ ॥

---

केचिद् नृपशवो लोके तेषां तत्त्वकथा कुतः? । व्यवहारे बादरेऽपि न बुधत्वं तपस्विवत् ॥ १ ॥

क्वचिन्निवेशे जटी मूर्खो गृही च । तच्छिष्यस्तु तदधिकः । ऐकदा ग्रामासन्नग्रामस्थपितृभ्रातृमण्डलवासिनीं स्वजायामानेतुं गुरुणा शिष्यः प्रैषि । तेन पृष्टम्, 'तत्र गतेन मया किं वक्तव्यम् ?' । गुरुणाऽऽदिष्टम् 'उण्डानि वक्राण्युच्चानि वाक्यानि वाच्यानि' इति । गतः शिष्यो ग्रामम् । मिलितस्तेषाम् । आलापितस्तैः प्रथमं, 'गुरोः कुशलम्' इति ब्रूहि ? । तेन 'कूपः'



१ क. ग. °ये यामे मन्त्रिसुतो निषेधमकरोत् । चतुर्थे त्वे° । २ क. ग. कदाचिदास° ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

इत्युत्तरं दत्तम् । 'को भावः ?' । 'गुरुणा ह्यादिष्टम् 'उण्डानि ब्रूयाः', न च कूपात् परं किमप्युण्डम्' इति । पुनस्तैरालेपे शिष्यः, 'मङ्गलशालिनस्ते गुरुपादाः ?' । 'वक्राण्यभिधातव्यानि' इति स्मृत्वा सः 'दात्रम्' इति ललाप । पुनः क्षेमप्रश्ने 'उच्चानि वाच्यानि' इति धिया 'डुंगरः' इति निर्वचनमर्पितम् । तत्कुटुम्बमखिलं चकितम् । 'ध्रुवं स जटी दात्रं लात्वा तृणच्छेदाय शिखरं गतः, ततश्चलनस्खलनवशादधो गम्भीरेऽवटेऽपतद् मृतश्च; अत एवासौ व्यक्तं न वक्ति' इति विमृश्य तमुच्चैः पृच्छन्ति, 'गुरोः कुशलं कुशलम् ?' । स पुनस्तदेव प्रणिगदति । निश्चिततपस्विमरणैस्तैः 'हा हा ! राउलपत्नी रण्डिता' इति तारपूत्कारं रोदितुमारेभे । [1]शिष्योऽपि रोदिति । एवं बहून्यपि दिनान्यतिक्रम्य गतशोकैस्तैः शिष्यः प्रैषि । प्राप्तो गुरुमठं रोदित्येव मुक्तकण्ठम् । गुरुणा पृष्टम्, 'किं रे ! रोदिषि ?' । 'राउलपत्नी रण्डिता' इति तत्र श्रुतम् । राउलोऽपि तारमारटति । तदेव पुनः पुनः [2]प्रलपति । मिलितो लोकः । 'गुरो ! कथं रुद्यते ?' । जटी जगाद तथैव । लोकः प्राह, 'त्वयि जीवति कथं सा रण्डिता ?' इति । स सक्रोधमाचष्ट, 'रे ! दुष्टाः ! तत एव गृहाच्चेलक आयातः, कथं कूटमिदम् ? धिग्' । विदग्धलोकस्त्यक्त्वा गतः । भस्मराशिर्बोध्यमानोऽपि 'कथं पत्नी मयि जीवति रण्डा संभवति ?' इत्यपि न जज्ञौ ॥

॥ इति जडजटिकथा ॥ २९ ॥

---

१ ख. क्षुल्लकोऽपि । २ क. ग. वक्ति ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विद्याभिरनवद्याभिरपि कार्यं न सिध्यति । व्यवहारज्ञता नो चेच्चत्वारोऽत्र निदर्शनम् ॥ १ ॥

अष्टापदपुरे कुलशेखरो नृपः । सुबुद्धिः सचिवः । चन्द्रः पुरोधाः । कमलगुप्तः श्रेष्ठी । चतुर्णामप्येषां प्राज्ञाश्चत्वारः पुत्राः सन्ति । ते पृथक् पृथक् पण्डितैर्भूमिगृहेऽध्याप्यमाना एकमनसो विद्यायां दक्षत्वमापुः । प्रथमं राजपुत्रः पञ्चाङ्गलक्षणविचक्षणः । मन्त्रिसूनुरष्टाङ्गायुर्वेदविदुरः । पुरोहितसुतः षड्दर्शनतर्ककर्कशप्रज्ञः । श्रेष्ठिसूनुर्बीजग्रन्थ-फलग्रन्थादिभेदभिन्नज्योतिषनिस्तुषधिषणः । पठित्वोत्तीर्णाः । पण्डितजनपूजनग्रहिलाः सुखेन तिष्ठन्ति । इतश्च राज्ञा पर्षद्युक्तम्, 'अहो ! विद्या गरीयसी लोके,

"नानाशास्त्रसुभाषितामृतरसैः कर्णोत्सवं कुर्वतां येषां यान्ति दिनानि पण्डितजनव्यायामखिन्नात्मनाम् ।
तेषां जन्म च जीवितं च सफलं तैरेव भूर्भूषिता शेषैः किं पशुवद् विवेकविकलैः पाण्डित्यहीनैर्जनैः ? ॥ १ ॥" '

अथ मन्त्री गम्भीरं मधुरं तथ्यं मितं चोवाच, 'स्वामिन् ! सत्यमीदृगेव विद्या, परं व्यवहारं विना न किञ्चित्,

"करोति व्यवहारज्ञो लीलया यत् प्रयोजनम् । न तत् क्लेशसहस्रेण क्वचिद् विद्याजडो जनः ॥ १ ॥"

अन्यदेव हि कवित्वाच्चेर्वकत्वम्, अन्यद् रूपाल्लावण्यम्, अन्य एव नृत्यादिभ्यो भावः, अन्यदेव पठनाद् व्यवहारज्ञत्वम् । यदि देवो न प्रत्येति, तर्हि नवपठिताश्चत्वारोऽमी कुमाराः क्वापि कार्ये नियुज्यन्ताम् । यदि जडतया कार्यं न नाशयन्ति, तदहं देवपादानां न पादपीठोपकण्ठे कदाचनापि विलुठितः' इति । आकर्ण्य चेदं विशांपतिराहूय तांश्चतुरोऽपि गदति स यथा,

१ ख. राजा । २ ख. °वर्णम् । ३ क. ग. रूपादि° ।



P.P. Ac. Gunratnasuri M.S.    Jun Gun Aaradhak Trust

'भो वत्सा:! इत: प्रत्यासन्ने नारङ्गपुरेऽस्य राजादेशस्य बलेन द्विसहस्रप्रमाणं हेम तत्रत्यनियुक्तपार्श्वादानयत' इति। तेऽप्याहुः 'आदेशः प्रमाणम्' इति। वृषभे भोजनोपकरणानि शम्बलं च निक्षिप्य ते केवलाश्चत्वार एव प्रहिताः। तत्र गताः स्थितांश्च तत्परिसरे। ज्योतिषी बलीवर्दरक्षार्थं स्थितः। तार्किको घृताय वर्तुलिकामादाय घृतहट्टं गतः। वैद्यको विद्योपनिषन्निषण्णमनास्तु शाकाय शाकपत्रहट्टिकां गतः। लाक्षणिकस्तु भक्तनिष्पत्तये स्थाल्यामधिश्रयणादीनि कर्तुमुपचक्रमे। यस्तत्र ज्योतिषी, तस्मिन् यूथपरिभ्रष्टमृग इवेतस्ततो विलोकयति पश्यतोहरेण च्छोटितोऽनड्वान्। क्षणार्धे च दिक्षु चक्षुः क्षिपता गणकेन दृष्टोऽसौ, पृष्ठे न दधाव, किन्तु खटिकामाकृष्य लग्नं गणयितुं प्रावृतत् 'तल्लभ्यतायोगोऽस्ति नवा?' इति। तावद् गत एव वृषभहरः। स्थितो दीनास्यो दैवज्ञः। तार्किकस्तु घृतं वर्तुलकस्थं पश्यन् 'पात्राधारं घृतं, घृताधारं वा पात्रम्?' इति संबन्धनिर्णयकौतुकी पात्रं यावन्नामयति तावद् घृतमगलत्। वैद्यस्तु 'वातलमिदम्, पित्तलमिदम्, श्लेष्मलमिदम्' इति विवेकात् तानि व्यञ्जनानि परिहाय निम्बपत्रभारिकां त्रिदोषघ्नीमनैषीत्। वैयाकरणस्तु पच्यमाने ओदने कलकलायमानायां स्थाल्यां तमव्यक्तं शब्दं श्रुत्वा परामृक्षत्, 'हन्त! रूढयौगिकमिश्रभेदात् त्रिधा शब्दाः। तत्र रूढा आखण्डलादयः, यौगिकास्तु नीलकण्ठादयः, मिश्राः पुनः परावृत्त्यसहा गीर्वाणसंनिभाः। अयं तु कलकलशब्दः स्थालीजः 'अपशब्दः' इति रुषा स्थालीमेव खण्डशो बभञ्ज। यावच्चत्वारोऽपि वनस्था इव निरन्ना निस्ताम्बूला निस्तूलीका निशां निन्युः। तत्र राजादेशपत्रं वृषभेण सह नष्टम्, यद्बलात्

---

१ ख. सर्पिः सर्पिराधा°।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

किल हेमोद्राहणिका सेत्स्यति। इदं सर्वं प्रच्छन्नैर्नृपपुरुषैरीक्षित्वा नृपाय निवेदितम् । चत्वारोऽपि विगुप्य स्वं स्वं गृहमीयुः । ध्वनितमनसा राज्ञा मन्त्री सत्कृतः। ते चत्वारो व्यवहारं ग्राहिताः सर्वव्यापारपरायणं[1]नारायणतां निन्यिरे ॥

॥ इत्यव्यवहारज्ञविद्वत्कथा ॥ ३० ॥

---

**विचारयति कस्तत्त्वमविचारपरे नृपे ? । राजशालोऽपि राजोक्त्या शूलायामधिरोपितः ॥ १ ॥**

क्वचिदविचारपत्तने सप्तव्यसनोपहतो नृपशू राजा । तस्य दवाग्नय इव सर्वभक्षा मन्त्रिणः । प्रजानां राजयक्ष्मेव तलारक्षः । क्रौर्येण पिशाच इव पुरोधाः । यमकिङ्करा इव परिचारकाः । सुवासिनीपुत्रा इव स्वच्छन्दचारिणो दिवापि रात्रावपि चौराः । नित्यं शङ्किताः पापा इव साधुलोकाः । गणिकाप्रायाः शुद्धान्तवध्वः । एवंविधे राज्येऽन्येद्युर्जरत्येका प्रातस्तृणपूलकाङ्कितमस्तका राजद्वारमेत्य पूचक्रे 'हा हताऽहम्, हताऽहम्' इति । राज्ञाऽऽकार्य पृष्टा दुःखकारणम् । साह, 'देव [2]तवैव नगरे पञ्चचौरन्यायेन मम [3]तनूरुहेण श्रेष्ठीगोविन्दगृहे खातं पातितम् । स मम सुतो नवयौवनोद्भटभुजो बहुजनाधारो भित्त्या पतन्त्या शीर्णाङ्गो मृत इति दुःखिता रोदिमि' । राज्ञापि 'धिग् धिगन्यायकारी गृहपतिर्येन तादृशी भित्तिरकारि' इति श्रेष्ठ्याहूत आगात् । वादितश्च 'त्वमन्यायकारी, त्वद्भित्त्या चौरो मृतः' इति । सोऽपि तद्राजधर्मवेदी [4]समाचष्ट, 'देव ! मम को दोषः ? मया

१ क. ग. °णतां । २ ख. तवेह न° । ३ क. ग. सुतेन । ४ क. ग. अवदत् ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दलपाटकं सम्यगपूरि, सूत्रधारोऽसम्यग्ज्ञाता'। राजापि 'सत्यं सत्यम्' इति मन्वानः सूत्रधारमाकार्य 'कथं रे! त्वया विरूपा भित्तिश्चिता ?' इति हक्कयामास। सूत्रधारो लब्धलक्षो निःक्षोभो ललाप, 'देव! किं करोमि, यदा कुड्यं चिन्वानोऽहमभूवं तदा गोपालाख्यस्य श्रेष्ठिनः पत्नी मदनराजधानी शृङ्गारजीवनाऽमृतनदी आयतलोचना तेन पथा चचार। तद्गतमनसा मया विषमस्थरो दत्तो भविष्यति, ततो भित्तिपातः, ततश्च तादृक्पुरुषरत्नचौरक्षयः' इति। आनीता श्रेष्ठिपत्नी तमन्यायं ज्ञापिता। सापि 'क्षपणकोऽनेन पथा संमुखं समेतीति ह्रीतया मयैतद्दिक्परिग्रहः कृतः' इति निर्वचनयति स। मुक्ता सा। ततो हक्कारितो दिक्पटः, पृष्टश्च, कथमनेन पथा त्वमायासीस्तदा श्रेष्ठिभित्तिचयने ?'। इति स पारम्पर्यक्रोधान्धेन भूभुजाऽधिक्षिप्तश्च। क्षपणकस्य नोत्पद्यते किमपि विटोत्तरम्। अतो लकुटैर्यष्टिभिश्चपेटाभिः कुट्टयते। अत एव लोकोक्तिः 'मारय क्षपणकं, यस्य न कोपि रोदकः'। राजा क्षपणकस्य शूलारोपमादिश्य स्वसौधमध्युवास। क्षपणकस्य शूलारोपणक्षणे मन्त्रिभिर्नृपो विज्ञप्तः, 'देव! शूलाऽल्पीयसी, दिक्पटस्तुङ्गाङ्गः। राज्ञाऽऽदिष्टम्', 'तर्हि यस्तत्र माति स एव देयः'। लब्धराजादेशैः सचिवैर्विमर्श्य चिरादपकारी राजकीयशालक एव शूलायां दापितः। न च पुनः कापि चर्चापि राज्ञा चक्रे॥

॥ इत्यविचारराजकथा ॥ ३१ ॥

---

१ ख. आय°। २ ख. दिगम्बरस्तु।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कदाचिद्धानिरपि हि वृद्ध्यै स्यात् पुण्ययोगतः । सर्वं विप्रियमप्युच्चैः श्रेष्ठिना रुच्यमौच्यत ॥ १ ॥



तारापुरे देवानन्दः श्रेष्ठी । पत्नी तारा । वधूश्चैका विधवा । श्वैको नित्यसेवकः । कदाचित् कलहकुपिता वधूः पितृगृहं गता । श्रेष्ठिन्योक्तम् 'श्रेष्ठिन्! वधूरद्यापि नायाति रुष्टा, ततश्चाग्रहादाहूयताम्' । श्रेष्ठी 'नन्विदमपि भव्यस्य कारणम्' इति प्रोवाच । 'थिरहं लच्छि' इति च पुनः पुनरुवाच । एकदा मृतो मण्डलः । मण्डलान्तरानयने प्रेरितः श्रेष्ठिन्या पतिः 'इदमपि भव्यस्य कारणम्' इत्याह । पतिता चान्येद्युः सकपाटा खटकी । तत्रापि ते एव वचनप्रतिवचने । अथैकदा देशान्तरं प्रति गच्छत्सु निशि राजकीयधनवाहिषु रासभेषु निरङ्कुश एकरासभराड् राजकीयनरदृष्टिदूरस्थो बदरकभारातुरस्तद्गृहमेत्य धनमपीपतत्, अगाच्च वृन्दमध्ये । उत्थितो हि देहचिन्तार्थं श्रेष्ठी । हैमनाणकभृतां गोणीं दृष्ट्वा श्रेष्ठिनीमाकार्यादीदृशत्, 'मुग्धे! यदि खटकी सग्रहाऽभविष्यत् कथं रासभः प्रावेक्ष्यत्?, अतः श्वापि खरादिप्रवेशे प्रत्यूह एव । वधूस्तु विजातीया बहिरलपिष्यत्, ततश्च वधबन्धादीन्यपि प्रासङ्क्ष्यन्' इति यद् मयोक्तं तत् तथ्यमेव । श्रेष्ठिन्यापि 'ओम्' इति मेने ॥

॥ इति पुण्याधीनहितप्राप्तिकथा ॥ ३२ ॥



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

यन्न सिध्यति शक्त्यापि तत् साध्नोति धिया बुधः । उपरिग्रन्थिकरणयुक्त्या चौरमहन् वणिक् ॥ १ ॥

कोद्रवपुरे वीरङ्गः श्रेष्ठी । जाया तु माया नाम । कदाचित् सूचीभेद्यतमःसमूहपिहितपुष्करायां निशि[1] सुप्तौ तौ दम्पती । निशीथे च तस्करः पाश्चात्यभित्तौ खातं पातयति । ज्ञातं श्रेष्ठिभ्याम्, तथापि भयाद् हक्कयितुं न शक्नुतः । अत्रान्तरे मुत्कलसिंहनामा तलारक्षः प्रत्यासन्नराजमार्गेण हिण्ड्यागच्छन् हयखरखुरपुटखाट्कारभटगर्जादिभिर्ज्ञातः । परिचितश्चायं श्रेष्ठिनः । अतः कैतवादन्योन्यं वार्ताऽऽरब्धा दम्पतिभ्यां यत्, 'आवयोः पुत्रो भविष्यति तदा मुत्कलसिंहाभिधानं करिष्यावः; यदा क्रमिष्यति क्रमाभ्यां तदा 'मुत्कलसिंह! मुत्कलसिंह! इहागच्छ' इति समालपिष्यावः। [2]तं तु प्लुतप्रधानं शब्दं निशम्य समायातस्तलारक्षः । भाषितः श्रेष्ठी । आकृष्टानि बीटकानि । संभाषितस्तलारक्षो वणिजा, 'देव! दीपिकाऽऽलोकस्तावद् भङ्गुरस्तिष्ठति । उपलक्ष्योपलक्ष्य स्वमानुषेभ्यो बीटकानि दापयत' । यावद् दत्तानि नामग्राहं बीटकानि भूरिभ्यः, सोऽपि चौरः परिपाट्या बीटकमेलापकरुद्धत्वेन गन्तुमक्षमो ग्रहीतुं लग्नः । श्रेष्ठिना भाषितम्, 'किं तलारक्षपादाः! अयमपि भवदीयः ?' । तलारक्ष आह 'न' इति । श्रेष्ठिनाप्यूचे, 'अयमनेन द्वारेण समागतः संभाव्यते' । कृतः सग्रहो भटैर्बद्धश्च, खातस्य दृष्टत्वात् । जातं प्रत्यूषम् । [3]गृहीतः कारायां चौरः । तलारक्षेणापि कृतमन्तुरिति श्रेष्ठिनः पश्यत एव नीतो वटशाखायाम्, उद्बद्धश्च रज्ज्वा । रज्जुग्रन्थिस्तु गलकात् तिर्यग् वर्तते । अतः 'कदापि विच्छुट्यापि यास्यति' इति धिया नगररक्षोऽभाषि, 'हे नगररक्षाप्राकार!

---

१ ख. निशायां । २ क. ग. तदुत्प्लु° । ३ क. ग. क्षिप्तः ।

P. P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तावदस्माकमयमाचारः, पण्यादिकं तोलयद्भिर्ग्रन्थिरुपरि क्रियते' । तलारक्षेणापि ज्ञातो भावः, 'माऽयं जीवन् विच्छुटितः पुनः प्रतीकारं कुरुताम्' इति हि श्रेष्ठी कल्पयति । तथैव रज्जुग्रन्थिरुपरि कारितः । ततश्च मृतः पाटच्चरः[1] । अभूद्[2] निःशल्यो वणिक् ॥

॥ इत्युपायज्ञवणिकार्यसुखसाध्यताकथा ॥ ३३ ॥

---

**मनोरथान् प्रथयतां कार्यं नश्यति मूलतः । केषांचित् पुण्यहीनानां सक्तुगड्डुकविप्रवत् ॥ १ ॥**

आनन्दपुरे माणवक एको युवा निःस्वो निष्पुण्यो निष्परिजनो भैक्ष्यमात्रोपजीवी[3] निरक्षरः शिखामात्रधारी प्रत्यासन्नकोपी निवसति । तस्यैकस्यां नवसक्तुकाख्यायाममावास्यायां भिक्षमाणस्य बहवो मिमिलुः सक्तवः । यावत् सायं भृतो गड्डुकः । तं च पादोपान्ते दत्त्वा सुप्तो बटुः । स्वापं स्वापं जागरितः कल्पयत्यन्तर्मनसं यथा; 'सक्तूनां पूर्णस्तावत् कुम्भः, द्रम्मद्वयस्यैते भविष्यन्ति; द्रम्मास्तु सप्त पुरापि ग्रन्थौ बद्धाः सन्ति । तैः समुदितैः करिष्यामि क्षुद्रहट्टिकारम्भम् । त्यक्ष्यामि लाघवकारिणीं भिक्षाम् । भवितारः शतं द्रम्माः । व्यवसायो हि धनागमे प्रतिभूः । ततः प्रौढप्रौढतरारम्भयोगाद् मिलिष्यति सहस्रम्, तत-

---

१ क. ग. चौरः । २ ख. बभूव । ३ क. ग. भिक्षामा° ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

आयुतम् । ततः परिणेष्यामि विप्रकन्याम् । सा च शुश्रूषयिष्यति मां, यावदपत्यानि नोत्पत्स्यन्ते । उत्पन्नेष्वपत्येषु निरादरा यदा मामवहेलयिष्यति, तदैवं पादाग्रेण हनिष्यामि' इति रभसाद् घटमेवास्फोटयत् । गताः सक्तवः । संजाता चिन्ता फल्गुः ॥

॥ इति बटुकथा ॥ ३४ ॥

---

यावदायाति निर्वाहमाज्ञैश्वर्यं विवेकिता । तावदेव प्रयोक्तव्यं श्रुत्वा तां तापसीं कथाम् ॥ १ ॥

चन्दनिकाग्रामे[1] धनकनककणसमृद्धे शिवराशिर्नाम जटाधारी । तस्य बहवः शिष्या बठरशिरोमणयो बहुभुजः कुन्तीस्थाने 'कुन्ती' लक्ष्मणस्थाने 'लाषण', हनूमत्स्थाने 'हणूआ', परशुरामस्थाने 'सरफरा', धुन्धुमारस्थाने 'ढुंढणमार', युधिष्ठिरस्थाने 'जूठिल' इत्यादिपाठपरायणास्ते । चतुर्मासीं वर्षारात्रीयां स्थितो गुरुः सशिष्यः । भाद्रपदे वृष्ट्यभावात् क्षेत्रान्नानि म्लायन्ति । यजमानः सखेदः कश्चिदाह, 'गुरो! सस्यानि सीदन्ति, जलाभावात्' । गुरुराह, 'न खेदो धार्यः, अद्य प्रभाते जलप्लुतानि धान्यानि द्रक्ष्यसि' । तुष्टो गच्छत्यथ यजमानः । गुरुस्तु निशि शिष्यैरासन्नसरोवरादगाधजलात् कुम्भशतैरानाय्यानाय्य जलं क्षेत्रं सेचयति । प्रत्यूषे[2] क्षेत्रपतिः क्षेत्रं जलप्लुतं[3] दृष्ट्वा प्रीतः । सरलात्मा गुरुं सपरिकरं मुद्राास्थमेत्य वन्दते, स्तौति, प्रीणाति भक्तादिभक्त्या, देवतावश्यसिद्धिं च गुरौ प्रत्येति । मुदाऽङ्गे न माति । एवं द्वितीयदिने ख्यातिवशाद् द्वितीययजमानक्षेत्रसे-

---

१ ख. °न्दनग्रा° । २ क. ग. प्रातः । ३ क. ग. जलार्द्रं ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

चनं शिष्यैः । तथैव तृतीयतुर्यादिदिनेषु । निर्विण्णाः शिष्या एकमतीभूय विममृशुः, 'महत्त्वलोभेन गुरुरस्मान् वाहयते न च स्वयं कृपालूभूय निवर्तते, तस्माद् विज्ञप्यते, विज्ञप्तः सन् यद् वक्ता तदनुसारेण चेष्टितास्महे'। एवमालोच्य विज्ञपयामाहे। गुरुः प्रत्युवाच 'रे दासाः! किं युष्माभिः कार्यं, यदि जलं न वोढास्थ ?'। स्थितास्तूष्णीकाः शिष्याः। पुनर्व्युष्टे यजमानप्रार्थनाधिकारे सर्वैः शिष्यैः 'यः कथयति स वहति' इत्युज्जुघुषे। यजमानेन पृष्टम्, 'कोऽर्थोऽस्य वाक्यस्य ?'। शिष्यैरुक्तम्, 'इयत्कालं क्षेत्रसेकं भोः! अस्माभिर्गुरुगिरा व्यूहे, वयं निर्विण्णाः, अथ गुरुर्वोढा'। लब्धमर्मा लोको गुरुं तत्याज ॥

॥ इति जटिलकथा ॥ ३५ ॥

---

निःशङ्कः पुरुषः सर्वकार्येषु लभते फलम्। क्षत्रियस्यार्थलाभाय दण्डाय वणिजः सुरः ॥ १ ॥

कलिकाग्रामे साधिष्ठानो यक्ष एकः काष्ठमयो महाप्रमाणो लब्धमहापूजकः प्रत्ययसारो वसति। तत्रैव ग्रामे निर्भयभीमवृत्तिर्व्याघ्रो नाम राजपुत्रः सकुटुम्बः। तस्यैव च प्रातिवेश्मिको वणिगेकः सिन्दूरकनामा सगृहो निःस्वः। एकदा क्षीणवृत्तिः क्षत्रियश्चिन्तयति, 'नास्ति कश्चिदन्य उपायः, ग्रामासन्नोऽद्य यक्षः परिपन्थनीयः'। कुठारमादाय कठोरधारं जगाम यक्षान्तिकमेष वीरः। धृतो यक्षः कलाचिकायाम्; भाषितश्च, 'रे देहि किञ्चित्, अन्यथा न भवस्येव, करिष्यामि कुठारेण त्वामिन्धनमेव'।

---

१ ख. °यति। २ क. °ज्ञप्तः। प्र°। ३ क. ग. °टिकक°। ४ क. ग. कलिकग्रा° घ. सा°। ५ ख. पूजः प्र°। ६ घ. °जन्यः।



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

भीतो यक्षः साक्षादाचचक्षे, 'मूढकं गोधूमान् दातास्मि श्वः, तावत् पत्नीकराङ्गुलीस्थया हेममुद्रया वृत्तिं कुर्याः' । तुष्टो भटः स्वस्थानं गतः । आगामिधान्याशया यक्षादिष्टया मुद्रिकया दिनवृत्तिमारेभे । तदा तस्य गृहे सोन्मादां शाल्योदनसर्पिर्बहुलामदृष्टपूर्वां रसवतीं दृष्ट्वा सिन्दूराख्यवणिजः पत्नी सखीं पप्रच्छ, 'किमद्य सखि! रङ्गोत्तरङ्गा यूयम् ?' । सापि पतिविक्रमाक्रान्तयक्षदत्तां तां प्राप्तिमूचाना । वणिक्पत्नी 'सुष्ठूपायोऽयम्' इति मेने । गता गृहं, जगाद पतिम्, 'त्वमपि प्रातिवेश्मिकभटवत् साहसं कुरु' । ज्ञापयामास तां कथाम् । गतो वणिग् यक्षान्तिकं सपरशुः । दृष्ट्वा यक्षं शङ्कितः । तेन यक्षेण बद्धः । आराटीर्मुञ्चति । 'मुञ्च मुञ्च माम्' इति रोदिति । 'यदि राजपुत्राय विवक्षिताय मदेयं गोधूममूढकं दत्से तच्छुटसि' इति तं दण्डमादाय वणिग् मुक्तः । ऋणमपि कृत्वा तद् ददौ ॥

॥ इति सशङ्कनिःशङ्ककथा ॥ ३६ ॥

---

वीरे धीमति निःशूके देवा अपि हतौजसः । कितवेन यदादिष्टं तत् सर्वं देवताऽकरोत् ॥ १ ॥

उज्जयिन्यां हालाहलो नाम द्यूतकार उद्बद्धपिचण्डिकः स्थूलोष्ठो मार्जाराक्षोऽतिलम्बो रूक्षमूर्धजो वाचालो वितथवाक् सत्रीवेश्यारतः प्रपाजलानां पिबः कादम्बिकगृहचरो दण्डीखण्डधरः । सोऽन्यदा निशीथे वारवासिन्याख्यायास्तत्रस्थाया देव्या गृहमगात् । बुभुक्षाक्षामकुक्षिर्नैवेद्यमण्डकान् देव्याः पुरःस्थान् दृष्ट्वा जिग्रसिषामास । देव्याः स्कन्धयोः पादौ दत्त्वाऽत्युच्चस्थानस्थ-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दीपतैलेन सह मण्डकानत्ति । देवी क्रुद्धा तं भापयितुं जिह्वामाचकर्ष । सोऽपि धीमान् निःशूको मुखस्थार्धचर्वितमण्डकपङ्कं देव्या जिह्वायां लगयामास । देवी शूकया जिह्वां पश्चान्मुखीं नापसारयति, किन्तु तदवस्थामेव हस्तमात्रलम्बां समतिष्ठिपत् । गतः कितवशक्रः । जिह्वा तथैव । प्रातर्मिलितो लोकः, चकितश्च । राजापि तज्ज्ञौ, आगाच्च, 'महोत्पातः' इति बिभयाम्बभूवे च । आहूता विप्राः । प्रारब्धानि शान्तिकानि । हूयन्तेऽग्नयः । दीयन्ते दानानि । कार्यन्ते विविधा जापाः । सा जिह्वा कराला तथैव । राज्ञा पुरे पटहो दापितः; घोषयाञ्चक्रे, 'यो देव्या विकृतामिमां चेष्टां निवर्तयति, स लक्षं लभते' । आजगन्वान् हालाहलः पस्पर्श पटहम् । निन्ये राजान्तिकम् । स्फूर्जन् विज्ञपयामास, 'कर्तास्मि तवेप्सितम्, देव! अर्धमिदानीमेव देयस्य देहि, शेषं पश्चात्, अष्टावारक्षकान् मद्रक्षायै प्रेषय यथा नंष्ट्वा न गच्छामि' । कृतं तथैव राज्ञा । प्राप्तो द्यूतकृदुपदेवि । कर्णान्तिके भूत्वोक्तम्, 'यदि जिह्वां न व्याघोट्य पश्चाद् नेष्यति, तदा ग्राव्णा त्वां भङ्क्ष्यामि' इति । भीता देवी । स्थिता स्वभावस्था । गतमशिवशङ्कया । दत्तं तस्मै देयम् ॥

॥ इति निःशूकद्यूतकृत्कथा ॥ ३७ ॥

---

१ क. ग. आगाद् हा° ।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नराणां वञ्चने कैव कथा, बुद्धिधनो नरः। देवानपि[1] च्छलयति व्यन्तरं वणिजो यथा ॥ १ ॥

कदलीपुरे कुलवीरश्रेष्ठी व्यवहारज्ञो विद्वान्। एकदाऽसौ विशिष्टकाष्ठनिमित्तं वनमेकाकी ययौ। यावत् सुन्दरं तरुमेकं छिनत्ति तावत् तद्वासी व्यन्तर एकः प्रत्यक्षीभूय सविनयमिव कृताञ्जलिर्जगौ 'श्रेष्ठिन्! मा मे स्थानभूतं तरुं छैत्सीः, अहं ते वाञ्छितं चिन्तामणिरिव पूरयिष्यामि; एकं तु वच्मि, यदा न निदेशं दास्यसि तदा च्छलयिष्यामि'। वणिगपि 'तथैव' उक्त्वा व्यन्तरेण समं स्वगृहं गतः। आदिष्टो व्यन्तरस्तेन, 'कारयोत्तुङ्गतोरणं धवलगृहम्'। कृतं च तत् तेन वेगतः। पुनर्यद् धान्यधनवसनधूपकर्पूरागुर्वाद्यानयनं समादिष्टं, तत् तदैवाकरोदमरः। श्रेष्ठिना तद्वाक्यं स्मरता कार्यान्तराभावाद् नियुक्तः 'पर्वतोत्तुङ्गमेकं वंशमानयस्व' इति। सोऽप्यानीतः। श्रेष्ठ्याह 'यावदहं किमपि कार्यं न कारयामि तावदिहारोहावरोहौ त्वया कार्यौ'। श्रुत्वा जहास देवः 'छलितोऽस्मि' इति। नत्वा क्षमयित्वा स्वास्पदं तरुमगात् ॥

॥ इति च्छेकवणिककथा ॥ ३८ ॥

---

धूर्तानां प्रतिपन्नेषु मा श्रद्धां दधतां बुधाः। गन्धर्वाय प्रपन्नोऽश्वो न दत्तः शठभूभुजा ॥ १ ॥

देवपुरे कुन्तपालो नृपो वक्रहृदयः। तं सेवितुमन्येद्युः कोऽपि गाथको देशान्तरादागतः। निशि श्रुतिमूर्च्छनातानग्रामाभि-

---

१ क. ग. °पि हि च्छलति।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रामं गीतं जगौ । राज्ञोक्तम्, 'जात्यं तुरङ्गं लायाः' । तुष्टो गतः । नित्यं याचते, न तु लभते । ततो रोषादाह, 'देव! किमश्वं न दापयसि ?' । राजाह, 'किमर्थं याचसि ?' । तेनोक्तम्, 'मया ते कर्णसुखं कृतम्' । राजा प्रत्युवाच, 'मयापि तथा कृतम् । अद्यापि मूढ! किं याचसे ?' । शिरः कण्डूयित्वा प्राप्तः स्वस्थानं कलावान् ॥

॥ इति धूर्तेश्वरकथा ॥ ३९ ॥

---

सत्यामपि सुखप्राप्तौ नात्यन्तं सुखितो भवेत् । तदवस्थाच्युतो ह्येष हस्यतेऽन्यैः करीरवत् ॥ १ ॥

करवीरपुरे कोरको नाम श्रेष्ठी । तस्य कमला भार्या । जातः करीरो नाम पुत्रः । आरूढो विभ्रमक्रीडाकाननं यौवनम् । परिणीतः कुलजां कन्याम् । भुङ्क्ते इष्टान् भोगान् । पिता हि वत्सलस्तस्मिन् धनी प्रभुश्च । यदाहः—

"स्वर्गः स्वर्गात् स्वामी तातः, स्वर्गः स्वर्गाद् दक्षिणवातः । स्वर्गः स्वर्गाद् विद्वत्सङ्गः, स्वर्गः स्वर्गाद् वनितासङ्गः ॥ १ ॥"

निश्चिन्तश्च न करोति गृहधनलेख्यकोद्ग्राहणिकादिचिन्ताम् । न तनोति देवगुरूपास्तिम् । नाचरति पर्वतिथ्यादिषु तपः । केवलं स्नानविलेपनान्नपानपुष्पशय्याधारागृहकर्पूरादिकालोचितसुखोपचारमूढ एवास्ति । तं तथा वर्तमानं पिता विज्ञाय विजने तथ्यं पथ्यं च शशास, 'वत्स! वणिजो वयं व्यवसायाऽऽजीवाः । व्यवसायश्च क्लेशसाध्यः । ततोऽतीव शरीरसुखं मा सेवस्व;—

---

१ ख. °जा वदति कि° । २ क. ग. प्रत्याह म° । ३ ख. °ला नाम कान्ता । ४ क. ग. परं स्ना° ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

"न पीडयेदिन्द्रियाणि न चैतान्यतिलालयेत् । अकालमरणोन्मादावेवं परिहृतौ ध्रुवम् ॥ १ ॥"

करीरः सावज्ञमनाकर्णितकेनोत्थाय गतः । श्रेष्ठी दूनोऽन्तर्मनसं स्थितो मौनेन । एकदा प्रातर्मित्रैः सह वार्तयन्तमेवमशृणोत् करीरं तातः, यथा—'हे सुहृदः ! रात्रौ कुसुमप्रस्तरे पुष्पवृन्तेनाहं तथा दूनो यथा कृपाणेन' । श्रुत्वेदं कुपितः श्रेष्ठी करीरं सदनाद् निरवासयत् 'याहि याहि' इति कृत्वा । सुजनांश्च जनान् प्रेष्याजिज्ञपत्, यथा—'आगतस्यास्य स्थानं केनापि न देयम्' । निःससार करीरः । भ्रमति स नगरे निराश्रयः शून्यो वायसपोतवत् । उपहस्यते विटैर्ज्ञातपरिभवैराच्छिन्नवसनाद्युपकरणत्वेन । निर्धनस्यास्य भोजनप्राप्तिरपि नास्ति । अतः क्षुधा सीदंस्तैलिकमेकं ययाचे 'खलखण्डं देहि' इति । स तु निर्दयः,

"द्यूतकारस्तलारक्षस्तैलिको मांसविक्रयी । वार्धकिर्नृपतिर्वैद्यः कृपया सप्त वर्जिताः ॥ १ ॥"

इति वचनात् । अत उवाच 'यदि घाणके वहसि, मद्बलीवर्दस्य विश्रामं दत्से, तदा ददेऽन्यथा न' इति । तदपि स चक्रे । अत एव लोकोक्तिः;—

"[1]जा जा पडइं अवत्थडी, सा सा सहइं सरीर । [2]फुलह बिंटिहि [3]दूमीओ, घाणइं वहइं करीर ॥ १ ॥"

---

१ या याऽऽपतत्यवस्था तां तां सहते शरीरम् । पुष्पाणां वृन्तैर्दूनस्तिलयन्त्रं वहति करीरः ॥ १ ॥

२ ख. फुल्लिहि । ३ ख. दूहविउ घा° ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तं घाणकं वहन्तं छन्ननरेभ्यो ज्ञात्वा तमेत्य श्रेष्ठी ततर्ज, 'क्व रे! तत् ते मार्दवम्? अद्यापि सरलो जातोऽसि नवा?'। करीरो दुःखाक्रान्तो विनयेन तातमाराध्य गृहमासाद्य त्रिवर्गाविरोधेन गृहवासमपीपलत्। प्रस्तावे च,

"यत्रैवाहमुदासे तत्र मुदाऽऽसे स्वभावसुखतुष्टः। यत्र तु वस्तुनि ममता मम तापस्तत्र तत्रैव॥ १॥"

इति विदित्वा सर्वसङ्गपरित्यागेन परं पदं ययौ॥

॥ इति करीराख्यश्रेष्ठिकथा॥ ४०॥

---

खलवाक्प्रत्ययेनार्थं सिद्धं निर्णाशयन्ति हा!। केचिन्नराधमास्तत्र कन्थाविप्रो निदर्शनम्॥ १॥

क्वचिद् नगरे दरिद्रो ब्राह्मण एकः पशुदेश्यः। कलहकारिणी भार्या। बहून्यपत्यानि। भग्ना वृत्तिः। शैवलित उदकोदञ्चनः। शीर्णानि च्छदींषि। धूलीनिकुरम्बमयमङ्गणम्। स्नाय्वस्थिशेषं वपुः।

"तद्गेहे मुशलीव मूषकवधूर्मूषीव मार्जारिका मार्जारीव शुनी शुनीव गृहिणी वाच्यः किमन्यो जनः।
क्षुत्क्षामक्लमघूर्णमाननयनैः सोन्निद्रमुर्वीगतैः कर्तुं वाग्व्ययमक्षमापि जननी डिम्भैः समालोक्यते॥ १॥" ॥ ३६॥

अन्येद्युरसौ सिद्धपुरुषमेकं धनार्थी सिषेवे। तुष्टेन तेन षाण्मासिक्या श्मशानवासोपवासब्रह्ममौनप्रधानक्रियया साध्यः साम्नायो मन्त्रोऽदायि। तं चासौ तथैवासाधयत्। प्रत्यक्षाऽभूद् देवता, ऊचे च, 'वत्स! गृहाणेमां कन्थां, प्रातः प्रातरसौ



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्रस्फोट्यमाना रत्नपञ्चशतीं विकरोति, 'विवर्णा' इति माऽमूं द्राक्षीः परमतत्त्वमिदम्' । गृहीतकन्थो विप्रः पुरप्रवेशे लोकेन जजल्पे, 'किं विप्र! तव शिरसीदम्?' । सोऽपि देवतादत्तां तां प्राकृतलोकायाह । लोकोऽप्याह, 'श्मशानसत्केयं त्वया गृहीताऽनर्थाय कल्प्ता' । इत्यादिवाग्भिः खटखटापितेन तेन सा कन्था हृदयदुर्बलत्वादुज्झाञ्चक्रे । गगनेनोत्प्लुत्य गता । स तु दीनास्यो गेहमगात् । गेहिन्यै तत् तथा[1]ऽऽख्यत् । गेहिन्या पादप्रक्षालनपात्रेण मूर्ध्नि हत्वा निष्काशितः ॥

॥ इति स्वार्थमूढविप्रकथा ॥ ४१ ॥

---

न वर्तितव्यं धीरेण स्त्रीनिदेशात् कदाचन । स्त्रीवाग्वशंवदत्वेन तन्तुवायः क्षयं गतः ॥ १ ॥

चन्द्रिकायां [2]पुर्यां वीरणको नाम तन्तुवायः । स कदाचिद् विशिष्टकाष्ठकार्येणाटवीमाटीत् । [3]महीरुहं महान्तमेकं छिन्दंस्तत्र-[4]वास्तव्येन व्यन्तरामरेण जगदे, 'भोः पुरुष! मा च्छिदस्तरुमिमं [5]मम गेहम्, तवाहमीप्सितं ददे, याचस्व यदृच्छया' इति दैवं वचः श्रुत्वा महिलामुखो वराकः कुविन्दोऽवदत्, 'भार्यां पृच्छामि 'किं याचे' इति' । गतो गृहम् । ऊचे च महिलाम्, 'अयि सुन्दरि! एवमेवं मां व्यन्तरो वक्ति, किं प्रार्थये?' इति । तया [6]परामम्रशे,

१ ख. °थाख्यातं । गे° । २ ख. नगर्यां । ३ क. ग. तरुं । ४ ग. स्तव्यव्य° । ५ क. ग. मे । ६ क. ग. विसृष्टं ।

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

' "प्रवर्धमानः पुरुषस्त्रयाणामुपघातकः । पूर्वसंचितमित्राणां दाराणां सद्मनामपि ॥ १ ॥"

इदं ध्रुवम् । ततोऽसौ श्रीसंपत्तौ स्वीकरिष्यति रूपयौवनलावण्योदारान् दारान्, भविष्यति तन्मयः, अवकरिकामिव परिहरिष्यति मां गलितयौवनाम्; परिचितद्वेषी लोको नवं नवमिच्छति; अतो वृत्तिमात्रमेव मेऽस्य चास्तु' इति । ततश्चालापितस्तया, 'प्रियतम! किमस्माकं महत्या राज्यादिश्रिया? पुरा यथास्थितेन शरीरेण दीनारद्वयमर्जयसि वानवृत्त्या, देवात् तुष्टाद् द्विगुणं देहं याच' इति । सोऽपि मूर्खस्तथैव प्रतिपद्य तत्र गत्वा तं देवं 'द्विगुणमङ्गं ममास्तु' इति ययाच । तच्च तथैवासीत् । चचाल वनात् सदनं प्रति । यावत्प्राकारद्वारमायाति तावदमिलल्लोकः, जगाद च 'आश्चर्यमहो! विकृतमूर्त्तिः कौणपोऽयं कोऽपि नगरजनखादनेच्छया समागच्छति, ततो हन्यतां हन्यताम्' । ततश्च यष्टिमुष्टिग्रावादिभिः क्षणात् कुट्टं कुट्टं पांसूकृतो जघ्ने ॥

॥ इति स्त्रीमुखकुविन्दकथा ॥ ४२ ॥

---

यत् सिध्यति धिया पुंसां तद्बलेन न सिध्यति । गाथकोपद्रवो वाचनादेन वणिजा हतः ॥ १ ॥

केरलपुरे कुन्ददन्तः श्रेष्ठी विशुद्धधर्मनीतिलोकाराधनपण्डितः[1] । तस्य पुत्र–पौत्र–प्रपौत्र–दौहित्रादिभिः प्रवृद्धं गोत्रं गर्गरकं



---

१ क. ग धर्मे, घ. धर्मनीतिव्यवहारो लो° ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

च । एकदा राज्ञः प्रसादपात्राणि गन्धर्वाः श्रेष्ठिगृहासन्नं महन्मन्दिरं निवासाय लेभिरे । ते च द्विसन्ध्यमपि मन्द्रमध्यतारभेदेन स्वरसाधनां कुर्वते, कारयन्ति च । भवति च गगनाङ्गणव्यापी कोलाहलः । तदाकृष्टानि श्रेष्ठिकुटुम्बमध्यात् पत्नीस्नुषापुत्र्यादीनि मानुषाणि श्रवणेन्द्रियलौल्यात् तत्रैव मृगवद् गच्छन्ति । गलन्ति प्रस्तुतकार्याणि । न च निषिध्यमानानि तानि श्रेष्ठ्याज्ञां मन्यन्ते गीतलौल्यात् । ततः श्रेष्ठिना चिन्तितम्, 'अमी गातारो राजमान्याः, मया गायन्तः कथं निषिध्यन्ते ? कुटुम्बमप्यबद्धम्; विटत्वसहचारिणी च गीतविद्या, तद् ध्रुवं योषितामासां शीलविध्वंसो भावी; ततोऽनागत एव जले पालिबन्धः श्रेयान्' इति । अथ कारितमेकं स्वमन्दिरासन्नं प्रौढं देवतायतनम्, स्थापिता देवता । सोपायनेन गत्वा भेटितो भूपः । भूपेनापि दानबाहुल्यतुष्टेन 'श्रेष्ठिन् ! किमयमियानुपक्षयो विधीयते ? याचस्व किमपि' इत्युक्ते श्रेष्ठिना बंभण्यांबभूवे, 'देव ! सेवककल्पद्रो ! मया कारितं देवगृहम्, तत्र त्रिसन्ध्यमपि विचित्रवादित्रनिनादभरितभुवनान्तरालं संगीतं कारय, यदि प्रसादस्ते भवेत्' इति । राज्ञोक्तम्, 'स्वैरं वादय वाद्यानि, योऽत्र निषेद्धा तस्य रुष्टो श्राद्धदेवः' । तत् श्रुतं तैर्गाथकैरन्यैश्च । श्रेष्ठी नित्यं तद्गीतश्रमकाले भेरीभाङ्कारैर्निःस्वानादिनिःस्वनैः स्फोटयति तत्कर्णान् । उद्विज्य गृहान्तरमगृह्णन् विटाः । सुखेन जिजीव श्रेष्ठी ॥

॥ इति कार्यतत्त्वज्ञश्रेष्ठिकथा ॥ ४२ ॥

---

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सेवाफलमयच्छन्तः स्वामिनो हास्यभाजनम् । भृत्यानामपि जायन्ते शुभ्रदन्तचतुष्कवत् ॥ १ ॥

बकुलपुरे भद्रशाल–चन्द्रशालाभिधौ मन्त्रिपुत्रौ द्वौ सहपांशुक्रीडितौ सर्वविद्यौ व्यवहार[1]सार[2]निश्चयतृतीयलोचनौ । तत्रापि भेदः; प्रथमोऽवसरं जानाति, द्वितीयस्तु दर्शितेऽवसरे वक्तुं वेत्ति शक्नोति च । अन्येद्युस्तावुभौ क्षीणप्रायधनौ नूतनधनाशयाऽमरपुरे देवानन्दनामानं नृपं सेवितुं गतौ। नृपं प्रधानपुरुषद्वारेण ददृशतुः, सेवेते च यथाविधि,—तथाहि; नृपाहूतौ नम्रावेव सभां विशतः, सुमार्गेण योग्ये स्थाने सुसंवृतावासाते, स्वामिनः पार्श्वे त[3]न्मुखाभिमुखस्थौ कृताञ्जली तिष्ठतः, हृदयं चास्य ज्ञात्वा कार्याणि साधयतः, नात्यासन्नौ न दूरस्थौ, न समोच्चासनस्थौ, न पृष्ठस्थौ न पुरःस्थौ, प्रभुप्रिये स्नेहलौ, प्रभुद्विषि द्वेषिणौ, प्रभुदत्तताम्बूलादिषु सबहुमानौ, पदे पदे स्तुतिवचनतुन्दिलकपोलौ, पदे पदे नमितशिरसौ च, स्वामिनः सकाशादतिहीनवेषौ, शुद्धान्तचारिजनालापनमूकौ, स्वामिवाञ्छितके[4]लालालनाभियोगिनौ स्तः । एवं जगाम विपुलः कालः । स्वामी न ददाति वस्त्रखण्डमपि; केवलं धवलदन्तचतुष्टयमुद्धाट्य प्रमुदित इव हसति । खिन्नौ तौ । अन्यदाऽश्वक्रीडया राजा निर्ययौ । तौ पृष्ठस्थौ यातः । पृतना पश्चादस्थात् । पृतनातो दूरे नृपोऽश्वेन पातितः । भग्नं राजदन्तचतुष्टयम् । अत्रान्तरेऽवसरज्ञेन भद्रशालेन चन्द्रशाल आलप्यत, ‘भो मित्र! चिरादपि स्वार्थाय स्वामिनं विज्ञपयस्व, अवसरवचनवाचस्पते! अवसरोऽयं वक्तव्यस्य, ब्रूहि किञ्चित्, वेत्सि चेत्’। इति निशम्य कृताञ्जलिश्चन्द्रशालो धूलिपटलावगुण्ठितं शिरोभ्रष्टमौलिबन्धं दीनप्रायं पार्थिवं प्रत्यासन्नी-



१ क. ग. °रनि° । २ घ. °रलो° । ३ ख. तद्वदनाभि° । ४ क. ग. °दिस° । ५ ख. कालाला° ।

Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भूय बभाषे, 'देव ! प्रसीद, अनुजानीहि गमनाय नौ'। राजाप्याह, 'किमिति गन्तुमिच्छा वाम् ?'। चन्द्रशालोऽप्याह, 'देव ! कुन्दोज्ज्वलानां चतुर्णां हासमिश्राणां दन्तानामेवाशा किलेयत्कालमासीत्, सांप्रतं साप्यसत्प्राचीनदुष्कर्मदोषप्लोषितपुरुषपौरुषेण विधिना विलुप्ता; स्थित्वा किं कुर्वहे, लाभस्तु जरत्तृणस्यापि नाभूदेव' श्रुत्वेदं तद्वचो विलक्षभावमुदुवाह भूपालः; यावत् किञ्चिद् वक्ति तावद् गतौ तौ छेकशिरोमणी ॥

॥ इति सेवकशत्रुस्वामिकथा ॥ ४४ ॥

---

यस्यालस्यमसामान्यं तस्य देहेऽपि नादरः । मा-भागिरावुभौ लोके न श्रुतावग्निदीपने ॥ १ ॥

क्वचित् पुरे कृपापरो राजा । स वक्ति, 'ये वराका अलसास्तेभ्योऽशनवसनादि दास्ये'। ततः सर्वोऽपि लोको 'अहमप्यलसः' 'अहमप्यलसः' इति लपन्[1] प्रायो ढुढौके । राजा तान् भोजयति, परिधापयति, स्थापयति कुटीषु । मिलिताः कोटिशोऽलसाः । मुधा भक्षयन्ति । निर्विण्णो राजा सामात्यः । ततश्च 'जात्यालसवराकानेव निर्वाहयिष्यामः, शेषा यान्तु' इति धिया तद्वासकुट्यासन्नो ज्वलितः कृशानुः, लगितं प्रदीपनं नृपेण[2] । ज्वलन्तीषु कुटीषु नेशुः सर्वे । द्वौ तु मातुलभागिनेयौ पतितौ पतितौ

---

१ क. ग. लपन्निति । २ ख. क्षितिभुजा ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ब्रूतो यथा मा° भा° मा° भा° ब्रूतो न तु स्थानादुत्तिष्ठतः। तज्ज्ञातं चरमुखाद् राज्ञा। ज्ञात्वा 'सत्यमेतावेवालस्यहतौ' इति दयया स्थापितौ जीवितौ ॥

॥ इत्यलसकथा ॥ ४५ ॥

---

प्रच्छन्नवाच्यं यद्वाक्यं नैव वाच्यं तदुच्चकैः। ततो ह्यनर्थवृद्धिः स्यादाचार्यप्रोक्तचूर्णवत् ॥ १ ॥

क्वचन द्रङ्गे गुणभूरयः सूरयो बहुपरिजनास्तस्थुः। ते बोधयन्ति लोकम्, शोधयन्ति तपसा स्वात्मानम्; न निन्दन्ति परं, न स्तुवन्ति स्वम्; शीलयन्ति शीलम्, भुञ्जते शुद्धं भक्ष्यम्। एवंव्रतास्ते भगवन्तः कदाचन शिष्यानुच्चैः स्वरमध्यापयन्तः सन्ति। तत्र च वाचयतामायातं योनिप्राभृतग्रन्थरहस्यम्, यथा, श्रमणाः! एभिरेभिरौषधैर्मिश्रितैरुदकद्रोणीनिक्षिप्तैर्महाप्रमाणा मत्स्या बहवो नवीना निष्पद्यन्ते। इदं च तारतरेण स्वरेण घुष्यमाणं प्रतिश्रयपश्चाद्भूमिं गच्छता मत्स्यबन्धकेन श्रुतम्, प्रज्ञाबलादवधारितं च। मेलितान्यौषधानि, निक्षिप्तानि जलभृतमणिके। जाताः स्फीता मीनाः। स लब्धसुखाकरतादृगुपायस्तथैव नित्यं विदधाति[1]। सूरयो ग्रामान् कतिपयान् विहृत्य पुनस्तत्रैयरुः। तत्रस्थांश्च तान् सूरीनसौ ज्ञात्वा मैनिको दीनारभृतस्थालेनोपतस्थे। ॥ ३९ ॥
पुरो निषण्णः कृताञ्जलिः 'गृह्णीत गृह्णीत, प्रसीदत प्रसीदत' इति प्रार्थयामास। सूरयः प्राहुः, 'कस्त्वम्, किमिदं प्राभृतम्?'।

---

१ क. ग. करोति।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सोप्यवक्, 'भवतां शिष्यान् प्रति व्याख्यापराणां मीनोत्पादकचूर्णं श्रुतं मया, प्रयुक्तं दृष्टप्रत्ययं, नान्यत्रोक्तं, लब्धं फलं निरायासम्; ततो भक्त्या विद्यागुरूनुपासीनोऽस्मि'। सूरिभिः 'हा धिग् धिक् सावद्यकारिणोऽस्मान्' इत्यात्मनिन्दामन्तर्मनसं कुर्वाणैः कृतकप्रमुदितैर्भाषितोऽसौ, 'वयं निर्ग्रन्था धनं न गृह्णीमः; यत् त्वमेवं विनयी कृतज्ञस्ततस्ते सविशेषमत्स्यकरं चूर्णमर्पयिष्यामः'। सोऽपि 'महाप्रसादः' इति शिरोऽनीनमत्। आचार्यैरप्युपदिष्टं तच्चूर्णम्, येन जलक्षिप्तेन सद्यः सिंहोत्पत्तिः। 'मा भूदधिकरणवृद्धिः' इति कारणे सति प्राणातिपातादिविराधनामप्याद्रियन्ते महामतयः। सावद्यच्छेदश्चात्र महत् कार्यम्। गतोऽसौ 'सूरिभिर्मद्भक्तितुष्टैर्भूयिष्ठमत्स्यकरणचूर्णकरमौषधवृन्दमादिष्टम्' इति प्रमोदमानमानसतमः। संयोजितान्यौषधानि। क्षिप्तान्यलिञ्जरे। निस्सृतः पारीन्द्रः। हतस्तेनासौ। निषिद्धा सावद्यवृद्धिरिति। इयतः पापस्य कारणं रहस्यवचनस्योच्चैर्भाषणमेव संपन्नमिति निषेध्यमेव ॥

॥ इति सूरिमैनिककथा ॥ ४६ ॥

---

अपुनःकारिता यत्र तद् मिथ्यादुष्कृतं शुभम्। अन्यत् पुनः कुम्भकारमिथ्यादुष्कृतवद् मृषा ॥ १ ॥

क्वचन संनिवेशे श्रावककुम्भकारस्य गृहे सूरयो बहुशिष्यवृतास्तस्थुः। तत्र चैकः क्षुल्लकः क्रीडाप्रियः। स कराङ्गुष्ठाङ्गुली-

---

१ घ. नास्त्येषा कथा मूलतः। २ ग. इति क्षुल्लककुम्भकारमिथ्यादुष्कृतकथा प्रसिद्धा।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यत्रक्षिप्तकर्कराघातैर्मृत्पात्राणि भनक्ति । दृष्टः कुलालेन वारितश्च । क्षुल्लकः प्राह, 'मिथ्या दुष्कृतम्' । पुनस्तथैव करोति । भाषितश्च 'मिथ्या दुष्कृतम्' इत्याचष्टे । एवं त्रिश्चतुः । ततः खिन्नो दण्डभृद् गोक्षुरं शुष्कमानीय क्षुल्लस्य कर्णयोरासज्य चम्पयति । क्षुल्लकः कोकूयते । चक्रजीवी तु 'मिथ्या दुष्कृतम्' इति मुहुर्मुहुस्तारं तारमालपति । गुर्वादयोऽवोचन्, 'किमिदं मिथ्या-दुष्कृतम्, यत्रैवं कर्तव्यता ?' । चक्री प्राह, 'यथा च क्षुल्लको मृषाभाषी, तथाऽहम्' । क्षुल्लो मोचितः । कुम्भकारक्षुल्लकमिथ्यादुष्कृतं ततः प्रभृति सिद्धान्ते प्रसिद्धम् ॥

॥ इति कुम्भकारमिथ्यादुष्कृतकथा ॥ ४७ ॥

---

**मा कस्यचिदवष्टम्भाद् वैरमारभतां सुधीः । वणिग्भिक्षाकदृष्टान्ताद् न कश्चिद् विषमे सखा ॥ १ ॥**

कुरुविन्दपुरे कलहंसः श्रेष्ठी प्रभूतविभूतिभाजनमभूत्[1] । कदाचिदस्य सदने सदनेकभक्ष्यपेयलेह्यसंकुला रसवती महोत्सववशान्निष्पन्ना भुञ्जते जनाः । एकः कार्पटिको भिक्षितुमागात् । गृहपतिना पुरःस्थितेन पत्नी वादिता 'भिक्षामस्मै देहि' इति । सा तु भिक्षां लात्वा तदभिमुखं ययौ । स तु तामेव दिव्यरूपलावण्यपुण्यावयवामेकमना निध्यायन्नन्ध इव बधिर इव मूक इव ग्रावमय इव बभूव । विषयान्तरमननुभवंस्तामेव पश्यन् भिक्षाग्रहणमपि व्यस्मार्षीत् । तया भाषितो 'गृहाण' इति शून्यत्वाद् न

१ क. ग. °नभूतः ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वेत्ति किञ्चित् । केवलं पश्यत्येव निर्नष्टचेष्टान्तरः । ततश्च कुपितः कलहंसो बभाषे, 'रे कार्पटिककीटक ! ममैवैतां दयितां प्रसारिताक्षः पश्यसि, किमिमां गृहीत्वा यास्यसि ?' । सोऽप्याह लब्धचैतन्यः, 'श्रेष्ठिन् ! किमेवं विब्रवीषि, एतां ते पत्नीं लात्वैव गन्तास्मि, लात्वा गच्छन्तं मां निषेधयिष्यसि चेत्, तदाऽन्नोदकपरित्यागेन तव गृहद्वार एव मरिष्यामि' । कृतवज्र-निबिडप्रतिज्ञः पर्यस्तिकां बद्ध्वा भित्तिमवष्टभ्य लङ्घयितुमुपविष्टः, केनापि नोत्थापयितुं शक्यते । मरणकृतनिश्चयो ह्यसौ । गताः स्वजना भोजं भोजम् । कार्पटिकोऽनुनयेन रुषा च कथमपि न गच्छति । जातानि १५ लङ्घनानि । चर्मास्थिशेषवपुषोऽपि तस्य न दैन्यस्य लवोऽप्याविरासीत् । श्रेष्ठिना विमृष्टम्, 'निरर्थकोऽयं विड्वरोदयः, आसन्नमरणस्तावदसौ भिक्षुः; सर्वस्वगतावपि पत्नी दातुं तु न शक्यते, अधमत्वप्रसङ्गात् । ततः कदाचिदयं कालधर्ममुपैति चेत्, तदैतन्मरणजं पङ्कयुत्तारणादिकं स्वजना राज-न्याश्च कुर्युः, गाढमुपरुद्धाः सन्तो मम पक्षपातमाबिभ्राणा मां निष्कलङ्कमेव व्यवस्थापयन्ति नवा ? इति प्रथमं सम्यग् विदित्वा यथोचितं करिष्यामि' इति ध्यात्वा गतोऽसौ स्वज्ञातिकानां प्रत्येकं सर्वेषां सदनानि । उवाच च तत्र कृतकम्, यथा, 'जानीथ बन्धवः ! तं कार्पटिकमन्यायिनं मत्पत्नीग्रहणराढ्या मद्गृहे लङ्घमानम्' । तेऽप्यवोचन् 'ओम्' इति । कलहंसः प्राह, 'स तावत् पञ्चत्वमाप्नोत्, किमिदानीं कर्तव्यम् ?' । ततस्तेषु केचित् पूर्वबद्धवैराः, केचित् परविघ्नसंतुष्टाः, केचिदसूयास्यूतस्वान्ताः, केचिद् रङ्कप्रायाः, केचिल्लुब्धाः प्रलेपुः, 'कलहंस ! मृतश्चेत् कार्पटिकः, तदा त्वं पङ्केरुत्तीर्ण एवासीः' । कलहंसः प्राह, 'मम

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

को मन्तुर्यदि स स्वस्तब्धतया म्रियते ?' । अथ ते किमपि न शृण्वन्ति, केवलं तदेव ब्रुवन्ति । ज्ञात्वा तत्त्वं तलारक्षमहामात्यादीनप्यगात्, तत् तथाचख्यौ । तेऽपि लुब्धा दण्डयितुमिच्छन्ति,

"दोग्धा द्रोग्धा च सर्वोऽयं धनिनश्चेतसा जनः । विसृज्य लोभसंक्षोभमेकद्वा[1] यद्युदासते ॥ १ ॥"

अथासौ लब्धलोकमर्मा लोकं लक्षसंख्यं संपिण्ड्य कार्पटिकमाललाप, 'प्रसीद, गृहाण मम जायाम्' इत्यार्पयत् । सोऽपि शीतीभूतः, आचष्टे च, 'सुष्ठु नम्रीभूतस्त्वम्, अतोऽनुमीयते मे भगिनीयं ते पत्नी' इति शान्त्वोत्थाय गत एव । कलहंसेन ज्ञातयो राजकीयाश्च वादिताः, 'मया लोकस्य तत्त्वं ज्ञातम्,

"वाङ्मात्रमैत्रीमधुरो जनोऽयं न मूढ! कार्ये घटते सहायः । अनन्यसाध्यां जठरस्य यात्रां सार्द्धं जने वासमुशन्ति धीराः ॥ १ ॥"

लोको लज्जितः स्वं स्वं स्थानमगात् । श्रेष्ठ्यपि व्यचिन्तयत्,

"ज्ञानामृतोर्मितृप्तस्य कृतकृत्यस्य योगिनः । नास्त्येव किञ्चित्कर्तव्यमस्ति चेन्न स तत्त्ववित् ॥ १ ॥"

कृत्वाऽथ स वासपरित्यागं निःक्लेशं पदमाससाद ।

॥ इति वणिग्भिक्षाककथा ॥ ४८ ॥

---

१ एको वा द्वौ वा एकद्वाः ।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भोक्तारोऽर्थस्य कार्पण्यसंचितस्यापरे नराः । संचेता केवलं पापक्लेशपात्रं यथा वणिग् ॥ १ ॥

कुन्दकलिकायां नगर्यां कुरुबको नाम श्रेष्ठी महाकदर्यो धनेश्वरश्च रूक्षाङ्गो रूक्षवाग् रूक्षहृदय इष्टगोष्ठीसुखास्वादविमुखो विश्वाससंतोषक्षमावर्जितो निःस्नेहाहारः स्वजनदर्शनमलिनाननः स्नानादिहीनश्च । तेन संचिक्ये भूरिहेममाणिक्यवज्रादि । तत्तु क्षितिक्षेपाय कटाहस्थीकृत्य स्वयमेकाकिना निशि बहिरारामे निन्ये । अभिज्ञानं कृत्वा निचख्ने भूमौ उपरि तथा तथा समारचितपरिसरः, तथापि मनसि भीतोऽसौ, 'यदि पुनरासन्नशून्यदेवकुलस्थेन केनापि धबधबशब्दः श्रुतो भविष्यति, सम्यक् पश्यामि' इति तदेव देवकुलमुत्ससर्प । तत्र च कार्पटिक एको वैदेशिकः सायमेत्य सुष्वाप शठराजः । तेन निशीथे निर्जने निःशब्दान्तरे स शब्दः श्रुत एव, ज्ञातं च 'निधिक्षेपोऽत्र कस्यचित्' इति, शब्दवेधियोधवल्लब्धलक्षत्वात् । यावता स च वणिगागच्छन् ददृशे तावता शैशवादारभ्याभ्यस्तपवनजरणोऽयं पवनं रुद्ध्वा परासुरिव पतित्वा तस्थौ । वणिजा च दृष्टोऽसौ तिमिरे नाड्यादिस्पन्दाभावाद् मृत्युमनुमायाप्यविश्वासाद् नासावंशोऽस्य चिच्छिदे, तथापि नासौ सलवलनमप्यकार्षीत् । ततस्तेन कर्णौ चकृताते । एतावता निश्चितमरणोऽसौ श्रेष्ठी निश्चिन्तः स्वगृहमुपतस्थे, सुष्वाप च । कार्पटिकोऽपि शनैः शनैरुत्थाय शब्दानुसारज्ञातोर्वीसत्कं महद्धनं बद्धरुद्धमादाय तं प्रदेशं तथैव समारचय्याविभातायां रात्र्यां स्थानान्तरे निक्षिप्य किञ्चित् सहादाय वेश्यायाः सदनं गत्वा तद्धनं विलसन्नास्ते । गतः कियानपि समयः । एकदा कुरुबकनामाङ्कं मुद्रारत्नमेकं विक्रेतुं द्विपटी-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पिहितसर्वाङ्गो हेमकारहट्टिकां गतः । तत्रोपविष्टोऽस्ति कुरुबकश्रेष्ठी । दर्शितं हेमकाराय मुद्रारत्नम् । दृष्टं चेदम् प्रसङ्गतः श्रेष्ठिनापि गृहीतं करेण । दृष्टं नाम । चकितो मनसि; 'किं स एवायं मया नासाकर्णच्छेदनपूर्वं मृतत्वप्रत्ययाद् मुक्तः ? ध्रुवं स एवायं मायावी नरो जीवन्नेव तदासीत्, अर्थलोभात् तावतीं वेदनां ससाह, मदर्थं च ललौ, एतन्मुद्राप्राप्त्यन्यथानुपपत्तेः' । ततः श्रेष्ठिना 'चौरः' इति कृत्वा गृहीतोऽग्रहस्ते गाढम् । जातो राजकुले वादः । राजकीयास्तु नामदर्शनाद् मुद्रायां तं चौरं श्रद्दधुः, अन्यद् भूयिष्ठमस्त्येतत्प्रसङ्गत इति प्रेरयति राजमान्यान् श्रेष्ठी । उक्तं कार्पटिकेनाऽऽशिखं वासश्छन्नाङ्गेन, 'देव ! वस्तु प्रति वस्तु गृह्यते, किमेषा चौरी वृत्तिः ?' । राजन्यकेनोक्तम्, 'किं त्वयाऽस्मै वणिजे दत्तम् ?' । सोऽप्याह, 'यदि सट्टके मिलितेऽपि न रुचिस्तदा स्वं स्वं वस्तु ग्राह्यं धनिकैः, इति स्थितिः, अतः पश्यत पश्यत' इति गाढमभिधाय दुकूले दूरे कृत्वा दर्शितं छिन्नं कर्णयुगं नासापुटं च । पृष्टं कारणिकैः, 'किमेतत् ?' । कार्पटिकेन प्रकटितम्, 'भोः पुण्यपुरुषाः वैदेशिकोऽहं देवकुले सुखं विश्रान्तो निर्मन्तुरेवं विडम्बितो निस्त्रिंशचूडामणिनाऽमुना; मया चास्य द्रविणनिधिर्जगृहे स्वरानुसाराज्ज्ञातचर्यो धरायाम्; यदि न रोचते तदा मदीयं वस्तु मे दत्तां, स्वं तु स्वयं लातु' इति तद्वचनं श्रुत्वा श्रेष्ठिनमाहुस्ते, 'किं करिष्यसि ?' श्रेष्ठिनापि दीर्घमुष्णं च निःश्वस्य जगदे, 'कृतं तत् कर्तव्यम्, किमुच्यते ? सर्वथा प्रतिकूलो विधिः' । एवं वदत एवास्य कारणिकैरूचे, 'कार्पटिक ! गच्छ सुखं भुङ्क्ष्व धनानि'; 'श्रेष्ठिन् ! यदि नासाकर्णं दातुमीशिषेऽस्य, तदा त्वं स्वं स्वं गृहाण' इति ।

१ ख. तत्रास्ति कुरुबको निषण्णः द° । २ क. ग. °तलाद् ।



Pu. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्राप्तो भिक्षुचरः स्वनिकेतनम् । विललास स्वापतेयममेयम् । किञ्च, कार्पटिकेनोक्तम् , 'अहो ! भवतां नीवृति न्यायो, यदेवं वैदेशिकाः श्रान्तसुप्ता वणिजा विडम्ब्यन्ते ?' । राजापि रुष्टो वित्तशेषमदण्डयत् । श्रेष्ठी तु मूर्च्छन् पतन् विलुठन् निःश्वसन् दैवमुपालम्भमानः खं पश्यन् विलक्षो हृदयत्रोटेन पितृपतिसदनमगमत् ॥

॥ इति कृपणकथा ॥ ४९ ॥

---

परद्रविणमादाय तस्य प्रत्यर्पणं खलाः । मनसापि न चिन्तन्ति यथा स स्वर्णकारकः ॥ १ ॥

एलापुरे नगरे कलाकेलिर्नाम सुवर्णकारः । चन्दनो नाम श्रेष्ठी । चन्दनस्य गृहे कदाचित् पुत्री जाता । तस्या बालिकायाः सुन्दरभूषणघटनाय श्रेष्ठिना कलादाय तस्मै जात्यं हेम पलप्रमाणमर्पयामासे । नित्यं श्रेष्ठी याचते 'हेम देहि तद् भूषणं वा' । स्वर्णकारस्तु 'ददामि ददामि' इति वदति न तु ददाति, यावज्जाता श्रेष्ठिनन्दिनी यौवनस्था । परिणिन्ये केनापि महर्द्धिना वणिजा । जगाम श्वशुरस्य धाम । संपन्ना गुर्वी च । तादृशी पित्रा सगौरवमानीता वात्सल्याद् निजगृहम् । कालेन सुतामसूत सा । श्रेष्ठिनोऽपि संपन्ना वाञ्छा दौहित्र्याः परिष्कारकरणाय । याचते पुनः पुनस्तद् हेम हेमकारम् । स तु वाहयत्येव धूर्तः । एकदा क्रोधोद्बोधताम्रनेत्रः श्रेष्ठी प्रातर्विपणिषण्णं नाडिंधमं गत्वा तत् तथा ययाचे । न चासौ प्रतिवचनं दत्ते । ततः श्रेष्ठी

---

१ क. ग. कलादं ।



P.P. Ac: Gunratnasuri M.S. Jun Gun Aaradhak Trust

निष्ठुरमभाषिष्ट, 'भोः पुत्रीभूषणायार्पितं जाम्बूनदं दौहित्रिकाभूषणेऽपि न ददासि ?' । कलादसूनुस्तत्रोपविष्टस्तत् श्रुत्वा कृतकं क्रोधं विधायाभ्यधात्, 'तात ! त्वमपीदृशैः कापुरुषैरुत्सुकैः सह व्यवहारं करोषि, न जानासि पुरुषपरीक्षाम्' । श्रेष्ठिनोचे, 'पुत्रीभूषणार्थमर्पितं दौहित्रीभूषणावसरे मया याच्यते; अहमुत्सुकश्चेत्, तर्हि कोऽनुत्सुको य इयन्तं कालं विलम्बं सहिष्यते ?' । कलादसुतेनोक्तम्, 'अस्माकमियं स्थितिः पूर्वजेन यद् गृहीतं तत् सप्तमोऽपि सान्तानिकः पुनर्नैव ददाति, स तु पूर्वजः स्वजन्मनि दास्यतीति दूरापास्तैवेयं वार्ता । राजकृतवधबन्धप्रसङ्गेऽपि स्कन्धकपञ्जरकैर्विलम्ब एव कार्यो दृढचित्तीभूय, न तु किमप्यर्पणीयम् । एवं कथं व्यवहारनिर्वाह इति चेत् । एते ब्रूमः, महति नगरे हृदयान्धा लुब्धाः किमल्पीयांसः सन्ति ? किन्तु बहवः । यत्र च बहवो मुग्धा लुब्धास्तत्र नवं नवं परिपन्थयतां महानपि कालो यास्यति' । तद्गिरं श्रुत्वा श्रेष्ठी हेमतृष्णां[1] मुक्त्वा गतः ।

॥ इति लुब्धशठकथा ॥ ५० ॥

---

न यच्छन्ति यथाशक्ति ये वित्तं स्वभुजार्जितम् । तेषां परवशो तस्मिन् भवेत् संकलवत्, यथा ॥ १ ॥

अस्ति व्योमोल्लेखिप्रासादस्खलदरुणसारथिरथं हेमरथं नाम नगरम् । तत्र शत्रुकलत्रनेत्रसलिलनिर्वापितदुर्नयवह्निर्जह्नुर्नाम



---

[1] ख. कनकमृगतृ° ।

P.P. Ac. Gunratnasuri M.S.                                        Jun Gun Aaradhak Trust

धराधीशः। तत्र च कनककोटिप्रभुरपि कदर्यतानिधिः संकलो नाम श्रेष्ठी न ददाति न भुङ्क्ते। परिजनस्यैकवारं मध्याह्नसमये नीरसमपि जेमतः कवलान् गणयति। पङ्ककूपिकायामपि पतितां वराटिकां दन्तैराकृष्य गृह्णाति। तत्रैव च विप्र एको दरिद्रो विद्यावांस्तमर्थयते निर्वापमेकम्। संकलस्तु न ददाति, 'नहि नहि' इत्येव वदति, ततोऽनेन विप्रेण

"दत्तं न वित्तं करुणानिमित्तं लोभप्रवृत्तं कृतमेव चित्तम्। यैः संचयोत्साहरसाच्च नृत्तं शोचन्ति ते पातकमात्मवृत्तम् ॥ १ ॥"

इत्यादिसूक्तपरिपाट्याऽङ्गीकारितो निर्वापदानम्। ततः प्राह संकलः, 'प्रातर्दास्यामि' इति। प्रातरायातो विप्रः। संकलः प्राह, 'स्मर मद्वचनस्य 'प्रातर्दास्यामि'''। एवं वाक्छलेन वाहयतोऽस्य वर्षं गतम्। चुकोप लोलुपो द्विजो, जगाद च, 'भोः कुपुरुष! तत् प्रतिपन्नं किमिति न दत्से? धिक् त्वां निःसत्त्वशिरोमणिम्, कस्ते नामापि गृह्णीयात्?'। इति तद्वचनक्रुद्धः संकुलस्तं गले ग्राहयित्वाऽक्षेपयद्घातयच्च। तिरस्कृतोऽसावभिमानी वाडवो नगरासन्नं महाप्रभावं भक्तिसाध्यं सत्त्वग्राह्यं यक्षं तीव्रेण तपसाऽऽरराध।

"तैणसरिसंपि न सिज्झइ कज्जं पुरिसस्स सत्तरहियस्स। गुरुकलियसाहसाणं वसम्मि वट्टंति देवावि ॥ १ ॥"

तुष्टो यक्षः प्रत्यक्षो भूत्वा तमभाषत, 'भो महानुभाव! याचस्व किञ्चित्'। सोऽपि प्रतिबभाषे, 'यदि देव! प्रसन्नोऽसि, अभिमतरूपं कर्तुं शक्तिर्मे भूयात्, विषमे चावसरे त्वं समाधिष्ठाय ब्रूयाः'। यक्षः 'तत् तथा' इति प्रतिपद्याऽदृश्यत्वमानशे।

---

१ क. ग. वक्ति। २ तृणसदृशमपि न सिध्यति कार्यं पुरुषस्य सत्त्वरहितस्य। गुरुसाहसकलितानां वशे वर्तन्ते देवा अपि ॥ १ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विप्रः स्वगृहं गत्वा संकलस्य च्छिद्राणि गवेषयति । एकदा संकलो ग्रामान्तरं प्रति मितपरिजनश्चचाल । तत्रान्तरे विप्रः[1] संकलवेषधारी वरप्रभावपुष्टपराक्रमः संकलद्वारमायासीत् । प्रविष्टश्च स्वच्छन्दमन्तः । आलापितः संकलकुटुम्बेन, 'किमिति ग्रामान्तरगमनाद् व्याघुट्यागताः?' । संकलवेषो विप्रः प्राह, 'शकुनाभावाद् व्यावृत्ताः' । कुटुम्बेनाप्युक्तं, 'सुष्ठु' । ततोऽसौ भाण्डागारिकमाह स, 'न किमपि केनापि सह भवान्तरं यास्यतीति परिभाव्य दानोन्मुखमनसः सः । आकृष दुकूलमुक्ताफलहारकर्पूरकनकादीनि । दद्मः स्वच्छन्दम् । स्वाम्यादेशं तं तथा प्रमाणीकृत्य सर्वं समुद्गकादिगतं गृहसारमसौ प्राचीकटत् । ददात्यसौ संकलपत्नीस्नुषादिभ्यस्तत्तत् । तुष्टं सकलं कुलम् । यो ददाति स देवता । 'यदैवेश्वरश्चिन्तयति तदैवं दत्ते' इति वार्ताश्चातताः । गतं दिनत्रयम् । व्ययितं प्रायेण दानादखिलं धनम् । अत्रान्तरे सिद्धग्रामान्तरकौर्यः[2] सत्यसंकल आगात् । स्वावासं प्रविशन्नसौ 'रूपान्तरं कृत्वा बहवष्ठगाः संचरन्ति पुरे, नात्र कोऽप्यज्ञातः प्रवेशयितव्यः' इति प्रपञ्चसंकलनियोगदृढमनसा दौवारिकेण निषिद्धः । सत्यसंकलस्त्वगृहीतसंकेतः 'किमिति रे! किमिति रे! वयं निषिध्यामहे?' । स आह, 'कूटकारः कोऽपि त्वम्, याहि याहि' । संकलो मध्ये विलसति धनमतिधनम् । खिन्नः संकलस्तारतारस्वरेण 'रे! को मध्ये चौरः?' इति पूत्करोति । तद्वचो निशम्य विप्रसंकलः कलहायते स 'रे रे! त्वं चौरः' । इत्थं वर्धमाने कलहे प्रसृता वार्ता राजकुले । आहूतौ द्वावपि । अन्तरं स्वरवेषभाषावयोलिपिगत्यादिषु न लभ्यते । कारणिकाः किं कुर्वते? । गृहनिध्यादिकं च यथा सत्यसंकलः

१ ख. सूत्रकण्ठः । २ खं. करणीयः समेयाय सत्यसंकलः स्वा° ।

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

कथयति तथा मिथ्यासंकलोऽपि लपति, यक्षप्रसादप्रभावात् । एवं गतेषु कियत्स्वपि मुहूर्त्तेषु मतिसाराख्यो मन्त्री तत्रस्थो निर्णिनीषुस्तत्र कलशमेकममण्डयत्, ऊचे च, यथा 'यः सत्यसंकलः सोऽनेन कलशद्वारेण निर्यातु' । सत्यसंकलो न शक्नोति निःसर्तुम् । मिथ्यासंकलस्तु सर्वथा द्रोहं श्रेष्ठिने चिकीर्षन्, अत एवात्मानं प्रचिकटयिषुर्वरमाहात्म्यात् सूक्ष्मरूपीभूय सूक्ष्मद्वारे निरयासीत् । प्रतिष्ठितं लोकैः 'अयमेव सत्यः, अयं तु मिथ्या' इति । ततो मिथ्यासंकलो भाषितो भूपेन, 'भोः ! कस्त्वम् ?' । जातो विप्रः स्वभावस्थः । राज्ञोक्तम्, 'किमेतत् त्वया चेष्टितम् ?' । स तां कथां तथाऽचकथत् । उक्त्वा च संकलं प्रति बभाषे;—

"दातव्यं भोक्तव्यं सति विभवे संचयो न कर्तव्यः । यदि संचयं करिष्यसि संकल ! पुनरागमिष्यामि ॥ १ ॥"

इति संकलं प्रतिबोध्य यक्षवरदुर्घर्षणो राजन्यान् रञ्जयित्वा द्विजो ययौ । संकलस्तु दाताऽभूत् ॥

॥ इति दानादानयोः संकलकथा ॥

---

संशयध्वान्तमग्नानां सद्वाग्दीपः प्रबोधकः । सोमदत्तेन विप्रेण बोधितः श्रेष्ठिनन्दनः ॥ १ ॥

कक्कोलिकायां पुरि नन्दिवर्धनः श्रेष्ठी । तस्य जिनदत्तः पुत्रः परिणिन्ये दशपुरुषविशुद्धकुलोद्भवां कनीम् । यावदारोहति मदनमृगयुमृगयावनं यौवनम्, यावदारभते नवनवान् व्यवसायांस्तनयः, तावदाक्रान्तो नन्दिवर्धनो रोगैः । वैद्या अपि 'न

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

चिकित्स्योऽयम्' इति तत्यजुः । श्रेष्ठ्यपि पाटलीपुरपत्तनवास्तव्यं सोमदत्तं बालमित्त्रं विप्रमाहूय सत्कृत्य किञ्चिद्गृहसूत्रं भविष्यत्कालोपयोगिनिधिभूदर्शनलक्षणं तेन सह मिलित्वाऽकार्षीत् । वस्त्रादिभिः सत्कृत्योदश्रुदृशाऽनुव्रज्य विससर्ज । सप्तक्षेत्र्यामुवाप वित्तबीजम्, यतः,—

"उप्तं न सप्तक्षेत्र्यां यैर्न शीलं परिशीलितम् । भावतो न तपस्तप्तं कुतः काङ्क्षन्ति ते सुखम् ॥ १ ॥"

प्राणप्रयाणे प्रत्यासन्ने पुत्रं जिनदत्तमाकार्य रहः शिक्षामेवं ददौ, 'वत्स ! चलिता वयं परलोकाय, त्वं प्रकृत्या गुणवानसि, ता एता मम शिक्षाः कर्णे कुर्याः पालयेश्च, तद्यथा; 'दन्तैर्वृत्तिर्ग्रामे ग्रामे कर्तव्या १ दत्तं न याचनीयम् २ महिला बद्ध्वा कुट्टनीया ३ मिष्टं भोक्तव्यम् ४ सुखं सु ( ? स्व ) प्तव्यम् ५ ग्रामे ग्रामे गृहं कार्यम् ६ गङ्गातले खनितव्यम् ७ वृत्तिदौस्थ्ये सति पाटलिपुत्रे सोमदत्तस्य पार्श्वे गन्तव्यम्'' इत्येवं वदन्नवाप मृत्युम् । जिनदत्तस्तु पितृवागनुसरणाद् गजदन्तैर्ग्रामे ग्रामे वृत्तिं कारयितुमुद्यतः । तत्तु दुष्करम् । क्षिपयति वृथा दन्तिदन्तान् । दत्तं न याचते, ततश्च क्षीणधनत्वेन दूनः । महिलां कचिद्पराधे बद्ध्वा पिट्टयंस्तया त्यक्तो विगुप्यति स्म । परिवारस्य चिन्तां न कुर्वन् मिष्टान्नानि च्छन्नं भुञ्जानः परिवारस्य गृहे द्वेषपात्रमभूत् । सुखं स्वपन् कार्याण्यचिन्तयन् हीयते पुरुषार्थे[1]षु । ग्रामे ग्रामे गृहं कुर्वन्नुपक्षयेण पीड्यते । गङ्गातटं खानयन् कर्मकरैरप्युपहस्यते । दिने दिने निर्धनश्च बोभवीति, यावज्जातो निस्संबन्धिबन्धनो निर्गृहो निर्गृहिणीको निष्प्रतापो निर्यशाः[2] । एकदा विभातक-



---

१ ख.° र्थेऽपि । २ क. ग. निर्वृतः ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ल्पायां त्रियामायां पितृवचः श्रुत्वा पाटलीपुत्रं प्रत्यचालीत् । प्राप्तः सोमदत्तस्य गृहम् । सत्कृतस्तेन मित्रपुत्र इति । अवसरे पृष्टो द्विजः, 'कथय, कः खल्वेतासां गिरां पितुर्भावः ?' । तेन प्रत्येकं भाषितः श्रेष्ठिसूराह, 'एभिरेभिरुपदेशैः क्षयं गतोऽहम्' । विप्रः प्राह, 'न वेत्सि भावार्थं, शृणु तावत्, 'दन्तैर्वृत्तिर्ग्रामे ग्रामे कार्या' कोर्थः, प्रतिग्रामं प्रतिपुरं मधुरालापेन मित्राण्युपार्जनीयानि, यतः;—

"चन्दनं चन्द्रमणयो जलार्द्राश्चन्द्ररश्मयः । आह्लादयन्ति न तथा यथा वाक् सूनृता नृणाम् ॥ १ ॥"

'दत्तं न याचितव्यम्' इति किं तत्त्वम्, अधमर्णात् कनकं साधिकं गृहीत्वा धनमर्पणीयम्, न पुनरङ्गोद्धारेण, पदे पदे पराभवपश्चात्तापसंभवात् । 'महिला बद्धा पिट्टनीया' कोऽर्थः, उत्पन्नपुत्रा पत्नी ताड्या, नान्यथा, नैराश्येन पितृगृहगमनात् । 'मिष्टं भोक्तव्यम्' कः परमार्थः, अलभ्यमानबहुमाने सदने न भोक्तव्यम्, लाघवयोगात् । 'सुखं स्वप्तव्यम्' इति कोऽर्थः, निर्विरोधैर्वस्तव्यम् । 'ग्रामे ग्रामे गृहं कार्यम्' इति को भावः, ग्रामे ग्रामे स्थापितेभ्यो मित्रेभ्यो वृत्तान्ताः सर्वे प्रजादीनामवगन्तव्याः, यथाज्ञानं व्यवहरणसंभवात् । 'गङ्गातटे खनितव्यम्' इति कोऽर्थः, यदा वत्स ! क्षीणधनो भवसि तदा यत्र पूर्वमपि गृहद्वारासन्ने देशे गङ्गाख्या सुरभिर्बध्यते तत्र खनितव्यम्, यथा तत्र मया न्यस्तमक्षयनिधिं लभसे । 'यदा तु मुह्यसि तदा सोमदत्तस्य पार्श्वे गन्तव्यम्' इति तु व्यक्तमेव ।' जिनदत्तः प्राह, 'ब्रह्मन् ! कथं तातेनाहमेवं विषमवाक्यशिक्षया खेदितः ? प्राध्वरमेव नोपदि-

१ ख. भावार्थः । २ क. ग. °वादिसं° ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ष्टम्?'। विप्रोऽवदत्, 'वत्स! त्वया बाल्यादपि न किमपि कष्टं सोढम्, दुग्धमल्ल एवासीः, न च कष्टागमं विना कार्यचैतन्य-मुन्मीलति, ततश्च विनीतो भवति, उक्तं च:—

"ईषत्प्रम्लानदोर्दर्पो धनी मान्येषु रज्यते। संपूर्णमण्डलश्चन्द्रो न मित्रमुपसर्पति ॥ १ ॥"

इति। सोढकष्टस्तु सचेतीभूतः प्रष्टुमीहसे। ततो वाक्यभावार्थनिर्णयायाहं वक्ता दर्शितस्ते। मयाऽधुना सर्वं व्यक्तं ते निवेदितम्। ज्ञातं च भवता तत्त्वम्। त्वया कथमिदमवगतम्? इति चेत्, श्रेष्ठिना हि मया सह मन्त्रितपूर्विणैव तथा त्वं भाषितोऽसि, नाहं तस्माद् दूरेऽभूवम्, सर्वथा विश्वासपात्रत्वात्'। इत्यादिवार्तास्तेन द्विजेन सह चिरं कारं कारं स्वगृहमगात्। ततो धीरो विनीतः शास्त्रप्रियो गुरुदेवभक्तो भार्यावचनानुवर्ती कुटुम्बयात्राकुशलो गृहवासमसाधयत्। वार्धके तु विममर्श,

"दुष्करं बत कुर्वन्ति महतोऽर्थांस्त्यजन्ति ये। वयं त्वेतान् परित्यक्तुमसतोऽपि न शक्नुमः ॥ १ ॥"

इति। ततः पुत्रे निवेशितसर्वभारो गृहीतसर्वविरतिसामायिको नाकलोकमुपससर्प ॥

॥ इति गुरुजनाधीनतत्त्वबोधे जिनदत्तकथा ॥ ५२ ॥

---

गुरुमव्यवहारस्थं हितवाचामगोचरम्। कौर्ययुक्त्या शिक्षयन्ति धीरास्तापसयाज्यवत् ॥



Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

चम्पकपुरे चकोरः श्रेष्ठी प्रगल्भमतिस्तापसभक्तः । कस्मिन्नपि पर्वण्यसौ सशिष्यं गुरुं निमन्त्र्याभूभुजत् । भुञ्जानेन तेनोदरंभरिणा स्फारशृङ्गारे गोरोचनावर्णे लम्बकर्णे यजमानस्य द्वे दुहितरौ ददृशाते । उज्जजागारास्य मदनविकारः । भोजनान्ते यजमानं शिष्येभ्यश्छन्नं गुरुर्जगौ, 'भो यजमान ! के इमे कन्ये ?' । स आह 'मम पुत्र्यौ' । 'तर्हि मह्यं देहि' । याज्यः प्राज्यखेदं जगाद, 'गुरो ! चिन्तितुमपीदं न युक्तं भवादृशानां प्रतिष्ठितानाम्, किं पुनर्व्यक्तं वक्तुम् ?' । गुरुर्ब्रुवो ब्रूते स, 'यदि न दास्यसि तदा स्वमरणेन हत्यादूषितं करिष्यामि, देह्येव, नोत्तिष्ठाम्यन्यथा ध्रुवम्' । तस्य तं कुग्रहं दृष्ट्वा रजो गृहीत्वा स गुरुं प्रोचे, 'भगवन् ! न मे वः किञ्चिददेयम्, जनसमक्षं तु समर्पयञ्जिह्रेमि; संप्रति नगरबहिस्थं स्वं मठं गच्छ; अस्यासन्नाऽस्ति ह्रदिनी, तस्या अनुश्रो[2]तसा मञ्जूषायां निवेशिते द्वे अपि निजे सुते श्वः प्रातः प्रेषयिष्याम्येव, नात्र संदेहः' । जगाम मठं कुण्ठमतिर्जटी । निशां तद्ध्यान एवानैषीत् । तेन तु यजमानेन मध्ये भल्लुकीद्वन्द्वं क्षिप्त्वा मञ्जूषाऽनुश्रोतः प्रेरिता तटिनीतटमाटीत् । दृष्टा मठस्थेन तदेकमनसा तापसेन । हृष्टश्च शिष्यान् प्रहित्याकर्ष्य सा मञ्जूषा मठान्तरानिन्ये । उवाच तान्, 'भो विनेया[3]ः ! किमप्यत्र मञ्जूषायां रहस्यं वस्तु भविष्यति, तस्मादिमामपवरकं [4]नयत, अपवरकं दृढं द्रढयत, मद्वाचं विना कपाटौ नोद्घाटनीयौ' । शिष्यैस्तथा प्रतिपन्नं, कृतं च । गुरुर्मञ्जूषां लात्वाऽपवर[5]कस्य मध्ये प्राविशत् । महता मनोरथेन यावन्मञ्जूषाद्वारमुद्घाटयति तावदभिमुखे प्रकटीभूते द्वे लोमजालजटिले खरनखरे बुभुक्षिते भल्लूक्यौ । उल्ललिते चाभिमुखम् । गृहीतो नासावंशः, स्फा-

१ ख. स्त्रियौ । २ क. ग. °तसि । ३ क. ग. शिष्याः । ४ ख. नेतास्मि । ५ क. घ. °रके यावन्महता मनोरथेनोद्घाट्य विलोकयति ताव° ।

Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

टितौ कपोलौ, दारितं भालम्, खण्डशश्छिन्नं परान्नपीवरमुदरम्। स एकः सोढा। ते द्वे क्षुधिते। कथं वराकस्तदुपद्रवस्य पारमृच्छतु ? । ततः कोकूयते 'भक्ष्ये भक्ष्ये, [1]शैक्षकाः! कपाटसंपुटं विघटयत'। तेऽपि शृण्वन्ति बहिःस्थाः, न तु सहसा द्वारमुद्घाटयन्ति। महता कालेन द्वारे उद्घाटिते। निस्ससार रक्तप्रवाहानुकृतसधातुनिर्झरगिरिवरो गुरुः, पृष्ठतश्च ऋक्षिते। पप्रच्छे शिष्यकैः, 'भगवन्! किमेतत्?'। भस्मस्नातकेन्द्रेण बलादपि तत्तथ्यमेवाभिदधे। शिष्यैः सविचिकित्सं सोपहासं च गुरुरालेपे, 'भगवन्! यादृशो यक्षः, तादृशी धूपवेला, नास्ति दोषः, सुखं संतुष्य तिष्ठ' इति। गुरुरपि सदैन्यो महता कालेन सज्जाङ्गो जातः। यजमानेनाप्युपाहासि, अबोधि च शनैः शनैः॥

॥ इति निरङ्कुशगुरुदमनयजमानकथा ॥ ५३ ॥

---

**यदेकः स्थविरो वेत्ति न तत् तरुणकोटयः। यो नृपं लत्तया हन्ति वृद्धवाक्यात्स पूज्यते ॥ १ ॥**

कश्चिद् महानगरे कोऽपि महर्द्धिर्नृपः। तस्य शतसंख्यास्तरुणाः सेवकाः। ते ब्रुवन्ति, 'देव! वृद्धपुरुषाः स्खलद्गतयश्चलन्मतयः कफपङ्किलवदनाः श्रोद्दण्डडिण्डीरपिण्डपाण्डुरतुण्डमुण्डाः सभां विनाशयन्ति; ततस्तान् नात्मसंनिधौ स्थापयितुमर्हसि'। राजापि तत् तथा मेने। "प्रायेण भूमिपतयः प्रमदा लताश्च यत्पार्श्वतो भवति तत्परिवेष्टयन्ति।" राज्ञा द्वाःस्थायादिदिशे, 

१ ख. शिष्यकाः।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

'भोः ! वृद्धस्य कस्यापि मन्त्रिणः श्रेष्ठिनो विप्रस्य राजपुत्रस्य वा प्रवेशो न देयः' । ततः प्रभृति वृद्धः कोऽपि नारोहति राजद्वारम् । युवानस्तु लब्धप्रसराः सगर्वाः स्फुरत्कोटिचोटयस्ताम्बूलमत्ताः स्फारकपोलाः प्रतारयन्ति नृपम्, ग्रसन्ते राजराज्यम् । एकदा ब्राह्म्ये मुहूर्ते क्षितिपतिना विमृष्टम्, 'एभिर्युवभिरहं मन्त्रं मन्त्रं जरद्भ्यो दूरं धृतः; यदा कदाचिद् दैवादुत्कटे रिपुसंकटे पतिष्यामि तदाऽमीभिरुद्वेष्टयिष्ये नवा ? प्रथममदसीयां बुद्धिं परीक्षे' इति । प्रातः सेवार्थमागतांस्तरुणानाललाप प्रजापः, 'योऽस्माल्लँतया शिरसि प्रहरति तस्य किं क्रियते ?' । ततस्ते मत्तोन्मत्तप्रमत्ताभाः प्रत्येकं प्रोचुः, 'प्रभो खण्डशः खण्डशस्तस्य चरणश्छिद्यते' । राजा न ध्वनति । ते तु तथैवाहुः । मध्याह्नसमये विससृजिरे । भोजनायागुः स्वं स्वं सदनम् । एकस्य यूनः पितामहो वृद्धः । स लङ्घते । यदा पौत्रोऽश्नाति तदैव स्वयमश्नाति, वात्सल्यात् । ततः पप्रच्छेऽसौ जरता, 'वत्स ! किमद्यातिकालः कृतः ?' । तेनापि तद् नृपवाक्यं प्रोक्तं, तरुणदत्तमुत्तरं च । जरी प्राह, 'राजा चमत्कृतस्तरुणदत्तोत्तरेण नवा ?' । पुत्रो निजगाद, 'न चमत्कृतः, प्रत्युत मसिमलिनाननः संवृत्तः । प्रोवाच स्थविरः, 'तर्हि मत्पार्श्वादुत्तरं कारयोपराजम्' । भुक्त्वा तौ गतौ राज्ञः सिंहद्वारम् । राजा विज्ञप्तो वृद्धेन, 'देव ! वयं रीढापात्रं ते, यदि भाषयसि तदा भाषामहे' । राज्ञादिष्टम्, 'भाषस्व' । वृद्धो भाषते, 'देव ! यस्त्वां लत्तया जघान तस्य चरणयोर्वैडूर्यमाणिक्यकनकमयं भूषणमारोप्यते' । हसितं भूपालेन, कथितं च, 'सुष्ठु भणितम्' । ततो यातयामेन जरालंकृतेन परःशतास्तरुणास्तत्र मेलिताः साक्षेपमालपिताः, 'रे हृदयान्धा

P. P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यूयम्, न वित्थ वक्तुम्; न खलु राज्ञीं विनाऽन्यो नृपं शिरसि हन्तुं पारयति, सा तु प्रेम्णा पारयति, तस्याश्चरणयोराभरणमेवार्हम्'। स्वात्मसंवादमुदितो राजा तरुणान् निरसारयत्, वृद्धानाराधयामास, राजकार्याणि च साधयामास ॥

॥ इति वृद्ध[1]विज्ञलकथा ॥ ५४ ॥

---

**शक्या केन वशीकर्तुं निर्मर्यादा नितम्बिनी ? । पतिरन्यायकारिण्या धीबलात् किंकरीकृतः ॥ १ ॥**

विशालायां पुरि कोकिलो नाम गृहपतिः । तस्य मयूरिका नाम भार्या । सा तु द्वारप्रदेशस्थायिनी जनसंकुलचारिणी बहुदेवतापूजिनी संततहास्या स्वैरिणी वैरिणी । संध्यायां प्रत्यासन्नेषु दूरस्थेषु वा केषुचिद् गृहेषु भ्रामं भ्रामं स्वगृहमायाति । ततश्च कुप्यति पतिः । कलहायते 'रे रे दुश्चारिणि ! यदृच्छया चरसि, मां न जानासि दुर्दमनदमनम् ?' । सापि प्राह, 'ज्ञातोऽसि, संग्रामे सहस्रबाहुस्त्वं यदेवं तर्जयसे माम्; किं करिष्यसि, यदि स्वच्छन्दं भ्रमिष्यामि ? ' । सोऽपि स्पष्टमभाषिष्ट, 'यद्यद्याऽनस्तमिते रवौ न स्वगृहमेष्यसि तदा गृहान्निष्कासयिष्यामि' । सापि जगौ, 'एवमस्तु' । ज्ञा[2]यते लग्नम् । गतानि पञ्चषाणि दिनानि । तथैव बंभ्रमीति सा । अथ रुष्टः पतिर्गृहद्वारं पिधाय मध्येसायं निषद्यास्थात् । गते रात्रेः प्रथमे यामे समाजगाम गजगामिनी । द्वारं खटत्कारयामास । प[3]तिस्तु नोद्घाटयति रोषात् । अथ सा चाटूनि वक्तुं प्रारेभे; 'नाथ ! नाश्रितेष्वियान्

---

१ ख. °द्धमानार्हताक° । २ घ. लमं द्वयोः । ३ ख. धवस्तु ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कोपः कर्तुमुचितः; कीटिकाया उपरि कः कटकारम्भः? पुनर्नैवाचरिष्याम्यपराधम्; प्रत्यासन्नसख्या सह प्रेमपरवशात् कालमियन्तं वार्ताभिः स्थिता; न तु तव किमपि प्रतिकूलमाचरितवती'। एवं लपन्त्यामपि सत्यां नोत्तरं दत्तं भर्त्रा। ततः सा रुरोष। 'तत् करोमि येनासौ मां पुनर्नाभिभवति' इति ध्यायन्ती गृहद्वारासन्नकूपिकायां तटस्थं महान्तं ग्रावाणं लोठयित्वाऽपातयत्। तेन च समुत्पन्नो डबकशब्दः। तेन श्रुतेन क्षुभितो भर्ता चिन्तयति, 'ध्रुवं मदवज्ञातया तया कूपिकायामपत्यत, 'हा हत्याकारी' इति लोके निन्दिष्ये'। एवं भयाद् द्वारमुद्घाट्य यावत्कूपिकापतितपत्नीसमाकर्षणाय किल दीपिकादिप्रक्रियां समारभते, तावल्लब्धलक्षा सा प्रविश्य कपाटयुगं निबिडं दत्त्वा सुखं तस्थुषी। पतिर्यावत् कूपिकां विलोडति तावत् तया गाढस्वरेण भाषितोऽसौ, 'रे कूपिकायां नाहं पतिता, त्वमेव पतिष्यसि, यन्मम चिकीर्षुरासीत् तत्तवैवापतितम्; यदि शूरोऽसि तदा पुनर्गृहमागच्छेः'। मिलितो नगरलोकः। कस्यापि भणितं किमपि न मन्यते। एतदेव तु वक्ति, 'मां निर्दोषामेष दोषवतीं भाषते, नास्य कोऽपि शासिता; यद्यसौ पतिपाशो हस्ताक्षराणि दत्ते 'मयाऽस्यास्तप्तिर्न कार्या', तदा प्रवेशं ददेऽस्य, इतरथा तु न; अथाभिभविष्यति मां, तदा मम हत्या वः'। ततो महाजनगिरा भर्ता तथा तदकृत। सा यदृच्छया बभ्राम॥

॥ इति निर्मर्यादनारीकथा ॥ ५५ ॥

---

१ ख. °लोकय°। २ क. ग. न तु।

१ विनो०

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अप्रार्थितोऽपि लाभः स्याचेद् दानं श्रद्धया भवेत् । श्रद्धाया विरहे लाभः क्वास्ति, वृद्धा निदर्शनम् ॥१॥

क्वचिदपि नगरे श्रीवीरस्वामी छद्मस्थावस्थायां वर्तमानः कयाचित् पुण्यवत्या लघुकर्मत्वाज्जिनधर्मवासितसप्तधातुकया मिष्टान्नैः प्रत्यलाभि । तदा प्रमुदितमनोभिर्देवैः सार्धद्वादश कोटयो हिरण्यानां ववृषिरे । दिवि चेलोत्क्षेप-दुन्दुभिनिर्घोषौ संवृत्तौ । गगनादविरलं गन्धोदकवर्षं गन्धान्धलमधुकरनिकरानुधावितं पुष्पवर्षं च पपात । 'अहो दानमहो दानम्' इति स्तुतिमुखराः स्वं स्वं स्थानं गताः सुमनसः । इदं च सर्वं तत्प्रतिवेशिन्या कयाचन जरत्या ददृशे । विमृष्टं च 'धनलाभे सुष्ठूपायोऽयम्' इति । दिनेषु पञ्चस्वतीतेषु तया भिक्षायै पर्यटन् कश्चिल्लिङ्गमात्रोपजीवी मूलोत्तरगुणग्रामविरहितो विकथाप्रसङ्गी हास्यललितादिविनोदप्रियो गच्छन्नामन्त्र्य तैस्तैरन्नपानैः प्रतिलाभयितुमारेभे । प्रतिलाभयन्ती सा मुहुर्मुहुर्गगनमालोकते । पृष्टं च लिङ्गिना, 'भद्रे ! किमितस्ततः पश्यसि ?' । साप्याह, 'गगनात् कदा कनकं पतिष्यति ? कथमद्यापि न पतति ? इत्यालोके' । लैङ्गिकः पप्रच्छ, 'अभ्रात् कनकपातस्य संभावना कुतः ?' । साप्याह, 'दिनकतिपयेभ्यः परतोऽत्रैव मत्प्रातिवेशिमक्या भिक्षुकाय कस्मैचिद् दत्तमन्नोदकम्, पतितं च खाद् गाङ्गेयम्' । भ्रष्टव्रतोऽपि ज्ञाततद्वृत्तान्तः स्मयमानः प्राह, 'तर्हि मुग्धे ! गृहमध्यं प्रविश प्रविश, यतस्तवानया श्रद्धया, मम चानेनेदृशेन दुस्तपेन तपसा वियतोऽङ्गाराः पतन्तः संभाव्यन्ते । गतो लिङ्गी ॥

॥ इति निःश्रद्धदानकथा ॥ ५६ ॥

१ ख. स्थानमगमन् सु° ।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्वामिने रोचते यद्यत् तत्तदेवानुजीविनः । प्रमाणयन्ति, वृन्ताकस्तोतृनिन्दकभृत्यवत् ॥ १ ॥

अचलपुरे कुलतिलको राजा । तस्य दानकल्पद्रोरनेकसेवकाः । तेष्वप्येको मन्त्रिराड् नीतिविदुरः । सर्वशास्त्रपरिमलितमतिरस्ति । एकदा भोजनावसरे भुञ्जानस्य नृपस्य सूपकारेण सुसंस्कृतवृन्ताकानि परिवेषितानि । तानि च सस्वदिरे । ततः स्वादुंकारं [1]भुक्तानि । [2]भुक्त्यनन्तरं क्षणान्तरे बाह्यमण्डपिकायामुपविष्टेन राज्ञा वृन्ताकानि शश्लाघिरे, 'अहो ! वृन्ताकानामपूर्वः कोऽपि रसः, अतः परं किमपि जगति नास्त्येव स्वाद्यं पोषणं च' । ततो नीतिविदुराख्येन मन्त्रिणा जगदे, 'जगदेकतत्त्वज्ञेन स्वामिना सुष्ठ्वादिष्टम्, सत्यमीदृशान्येवैतानि, वेधसाऽत्र फलेष्वमृतरसो न्यासि, तत एव तद्रक्षणार्थं मुखे पिधानं वृन्तमिषादरोपि' । राजा रञ्जितः । [3]समयान्तरे तु पुनः परिकर्मणा सामग्रीवैगुण्याद् वा व्याक्षेपाद् वा तानि सूदेन पक्वान्यपि न रुरुचिरे । ततो भूपतिना तस्यैव मन्त्रिणः पुरो निनिन्दिरेऽमूनि, 'धिग् धिग् विरसान्यमूनि' । मन्त्र्यप्याह शाठ्यशेवधिः, 'देव ! नामूनि वेधसा भक्षयितुं सृष्टानि, किन्तु वृन्तैर्ग्राहं ग्राहं शिरउपरि भ्रामं भ्रामं क्रीडायै इतस्ततः पर्यसनाय' । क्षितिपतिरपि प्राचीनतद्वचनस्मरणचमत्कृतः प्राह, 'तान्येव स्तुत्वा किं निन्दसि ?' । मन्त्र्याह, 'देव ! नाहं वृन्ताकानां ग्रासं ग्रसे किन्तु तव' इति तव रुच्यरुची अनुवर्ते । राजा जगाद, 'सत्यमीदृगेव सेवाधर्मः,

---

१ क. भुनक्ति । २ क. ख. भुक्तान° ग. भुक्त्वान° । ३ क. ग. एकदा प° ।

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

"यश्चारुचाटुवचनोच्चरणप्रगल्भो लोकाद्धनग्रहणकर्मणि मर्मविद् यः । यश्च प्रपूरयति पाणिमुपायनेन प्रायः प्रियो भवति भूपतिमन्त्रिणां सः ॥" '

इत्युक्त्वा प्रसाददानं दत्त्वा विससर्ज ॥

॥ इति चाटुकारकथा ॥ ५७ ॥

---

**केनापि सार्धं मेधावी विरोधं विदधीत न । यतः शुकशकुन्तेन यथा वेश्या विडम्बिता ॥ १ ॥**

रत्नपुरे परमरमारमणीयो रत्नसाराभिधः श्रेष्ठी । तस्य केदारकसूनुः पठितविद्यो व्यवसायाध्यवसायी कृतपाणिग्रहणो विचरति सुखम् । तस्य च श्रेष्ठिनः पुराणस्मृतिकथाख्यानाख्यायिकाविचक्षणः [1]कैलाकलापो नाम शुकः । कियत्कालेन रुजार्तो मुमूर्षुः स श्रेष्ठी सुतं साञ्जसमुक्तवान्, 'वत्स वयं मरणाभिमुखाः, त्वं तु नवयौवनः, यौवने च विषयविषमविषघूर्णमानदृष्टयो न किञ्चित् पश्यन्ति नराः । सद्गुरूपदेशामृतसेकसिच्यमानात्मानस्तु पुरुषा न बाध्यन्ते तेन विषेण । ततः संगृहाण सदुपदेशामृतम् । स चायं सदुपदेशः; 'अज्ञातेषु न विश्वसनीयम्, नारीषु मन्त्रो न प्रकटनीयः, मूलानुपालनेन धनं व्ययनीयम्, विरोधः प्रोन्मूलनीयः, महाजनो रञ्जनीयः, गुरवो न खेदनीयाः, आवश्यके कर्मणि न प्रमादः करणीयः, सूक्तमुक्तं रिपोरपि न दूषणीयम्, कस्यापि न च्छेदनीया कथा, चाटुकारेषु न प्रत्ययनीयम्, वेश्याः पराङ्गनाश्च वर्ज्याः, धनं भार्यापुत्राधीनं ॥ ५० ॥

---

१ ख. कलापो ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

न विधानीयम्, कष्टेऽपि पुरुषव्रतं न त्यजनीयम्; अदानतपस्कं दिनं नातिवाहनीयम्' इत्यादि' । केदारकोऽपि 'तथा' इति प्रतिपेदे । श्रेष्ठिना शुकः समीपमानीय प्रोक्तः 'शुक ! त्वयाऽयं मत्पुत्रः कुव्यापारे प्रवर्तमानो निषेध्यः' । पुत्रं पुनः प्रोवाच, 'त्वयाप्यस्य शुकस्य वाक्यमनास्थया न श्रव्यम्, किन्तु तत्त्वधिया' । पुत्रोऽपि तदादद्रे । मृतः श्रेष्ठी । गतानि वर्षाणि द्वित्राणि । अथ केदारो नगरान्तश्चरन् कामपताकाख्यां प्रौढवेश्यां दृष्ट्वा तदासक्तो जातः । तत्रैव तिष्ठति प्रायः । यदा तु गृहमेति तदा शुक उपालभते, 'त्वं क्व स्थित इयत्कालम्? मा स्म विसार्षीस्तानि पितुर्व्याहृतानि' । केदारकस्तूष्णीमास्ते । लब्धे च प्रसरे वेश्यायाः किंकरी केदारकस्य गृहमेति । वसुकनकादि याचते । स्वैरं लभते । शुकस्तु तस्याः शृण्वत्या एव लालपीति, 'अहो! श्रेष्ठिन्! कथं गृहं मोषयसि ? धिक् त्वाम्' इत्यादि । किंकर्यपि स्वामिन्यै व्यज्ञपयत् । तत्र मन्त्रो जातः, 'शुकोऽयमानीय हन्यताम्, य एवमस्माभिर्भक्ष्यं श्रेष्ठिनं तथा तथा रिरक्षिषति' । एकदा श्रेष्ठिनि गृहस्थे भुञ्जाने, शुकेऽपि दाडिमीफलशर्करादिलवशालिकणखादव्यग्रे, वेश्याकर्मकरी समेत्य यत्तत्कार्यं प्रोच्य 'अहो! कीदृक् शुको रमणीयः' इति स्तुतिमिव कृत्वा हस्ते गृहीत्वा गतैव स्वामिन्यग्रे तं मुमोच । सापि तमाह, 'रे निर्दय! श्रेष्ठिना क्रियमाणामस्मद्वृद्धिं छिनत्सि, तस्मादनुभव चापल्यस्यास्य फलम्' इति गदित्वा पक्षावुदच्छिदत् । कृतो मांसपिण्डप्रायः । यावल्लोहं तीक्ष्णमादाय किल तं छेत्स्यति, लोहं च ग्रहीतुं गता, तावदसौ शनैः शनैः कृतरिङ्खणो रसवतीसदनैकदेशस्थान्नत्यागस्थानं सरसं प्राप्तः ।

---

१ क. ग. लाखा ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वेश्यया तु लोहमादायाऽऽजग्मुष्या शुको न दृष्टः, उन्नीतं यथा 'शकुनिकया सरसमांसलोभेन गृहीतः, किं तेन ?' इति गवेषणनिरभियोगा तस्थौ । शुकेन्द्रोऽपि तस्यास्तत्परिवारस्य च दृष्टिं परिहरन् ध्वान्ते धान्यकणानुपजीवंस्तद्गृहे च वसन् क्रमा-दुद्गतपक्षः संवृत्तः पुष्टाङ्गः पूर्ववत् । ततस्तादृग्वैरनिर्यातनार्थी निश्युड्डीय तत्र गोविन्दभवने प्राप्तः, यत्र सा गणिका भक्तम्मन्या नित्यं नित्यमेति । प्रभूतपुष्पपूजितस्य हरेरङ्गैकदेशे पुष्पपिहितस्तस्थौ । सार्धप्रहरमात्रे गतेऽहनि समागता सा गणिका । ननाम च महाभक्त्या हरिम् । अत्रान्तरे कालज्ञः शुकः प्रोल्ललाप प्रौढस्वरम्, 'भद्रे! तव भक्त्या तुष्टोऽस्मि, विष्णुरहम्, त्वां वैकुण्ठभवनं नाम प्रसिद्धं स्वभवनं विमानेन नेष्यामि, माऽत्र भ्रान्तिं कार्षीः' । एवं शुकोक्तमपि शुका-दर्शनात् सा मुकुन्दगदितमिति प्रतीयाय । ततः संजातपुलका प्राह, 'भगवन्! महाप्रसादो मय्ययम्, किमन्यद् गवेष्यते ? कथय, कदा तत्र नेष्यसि ? किं चाहं दानपुण्यादिकं करोमि ?' इत्युक्ते पुनः प्रोचे, 'भद्रे! आसन्नायामस्यामेव दशम्यां सर्वस्वं दत्त्वा गृहं च पात्रशः कृत्वा परिवारमपि विसृज्य मुण्डितमुण्डा कज्जलकरम्बितमुखी दण्डीखण्डितनिवसना सपौरज-नपदा मद्गृहाङ्गणमापतेः; मध्याह्ने । शुक एकः समीपस्थं रसालमारूढो दर्शिष्यते, तेनाभिज्ञानेन श्रद्धातव्यं यथा कि-ङ्किणीरणझणायमानं सकृष्णं विमानमभ्येष्यति' इति । एवमुक्ते प्रत्येति स्म सा । गच्छति स्म सदनम् । चकार सर्वं तदुप-दिष्टम् । धूर्तैर्लोभिष्ठो बाध्यते । आगता सा दशमी । कृता सा सामग्री । मेलितो महाजनः । आगता पूर्वोक्तसमाचरण-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

परा पण्यस्त्री । प्रसृता देशेऽपि सा वार्ता । यावत्संववृते द्विपहरी । अत्रान्तरे समागतः स शुको माकन्दशाखायाम् । ददर्श च तं लोकः, उवाच च, 'लिङ्गदर्शनाल्लिङ्ग्यनुमीयते' । यावदतिक्रान्ता त्रिप्रहरी । न चायाति विमानम् । उत्पश्यो लोकः सा च । एवं सति शुकः समेत्य बभाण, 'रे राक्षसि! क्व कृष्णः? क्व विमानम्? क्व चास्यास्तवेदृशी पात्रता? केवलमेतेद्धि

"कृते प्रतिकृतं कुर्याद् हिंसिते प्रतिहिंसनम् । त्वया लुञ्चापितौ पक्षौ मया मुण्डापितं शिरः ॥ १ ॥" '

लोकैः पृष्टम्, 'किमेतत्?' शुकेनोक्ता सा कथा प्रपञ्च्य, जहास लोकः, सा तु मम्लौ । गताः सर्वे स्वस्थानम् ॥

॥ इति पराभिभवफले शुककथा ॥ ५८ ॥

---

कूटसाक्ष्यात्परं पापं न भूतं न भविष्यति । रुरोद वायसो दृष्ट्वा चरितं ग्रामवासिनाम् ॥ १ ॥

कुण्डिलाख्ये ग्रामे तरुवरशालिपालिपरिसरं सरः सरसमेकमास्ते । तत्र वायसो वसति विराट्[3] । प्रावृट्कालप्रारम्भे तत्र राजहंस एकः सपत्नीकः समागात् । तदा ह्यसौ दूरत्वात् सहसा मानसं सरः सर्तुं न शशाक । अतस्तत्रैव तिष्ठासामास । वायसेनापि सबहुमानं स्थापितः, शुश्रूषितश्च स्वविभवोचितया भक्त्या । आजगाम क्षामेतरचन्द्रिकाविलिप्तदिक्चक्रवालः कालः ।

---

१ ख. समेयाय । २ ख. °तद् विद्धि । ३ ख. विराद् । ४ क. ग. विलुप्त ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मरालोऽपि स्मरन् मानसस्य सरसः खरसेन तत्र गन्तुं सभार्यश्चचाल । आपप्रच्छे च काकोलम्, 'बान्धव! चिरं स्थितं भुक्तं सुप्तम्, मन्तुं क्षमेथाः, एते यामः, पुनः कुशलेन दर्शनं भूयात्' इत्यूचे च । एवमुक्त्वा गच्छन् कादम्बः काकेन जगदे, 'कथमेतां हंसीं लात्वा गच्छसि? इयं हि मम सधर्मचारिणी, बाल्ये पित्रा मनोरथशतप्रार्थनीयामेनां परिणायितः' । ततो हंसेन बभाषे, 'त्वं काकः, काकस्य कुतो हंसी? विरूपं विरूपे कुतः?' । काकः प्राह, 'अत्रार्थे ग्रामेयकाः साक्षिणः, यैरहमेतां परिणयन् ददृशे' । हंसोऽप्याह, 'तथाऽस्तु, को दोषः? तत्र गमिष्यामः' । एवं विवादवन्तौ हंस्या सह हंसध्वाङ्क्षौ ग्रामकूटपर्षदमारतुः, ऊचतुः स्वं स्वं वादपदम् । शुश्रुवुश्च ग्रामेयकाः । 'हंसी कथं काकस्य पाणिगृहीता भवेत्?' इति यावद् वदिष्यन्ति ते, तावत् काकेन दूरे गृहीतास्ते, 'भोः! शृणुत, मयाऽयं कूट एव कलहः प्रारब्धोऽस्ति, यदि तु यूयं मत्पक्षे न भविष्यथ, तदा भवतां येऽनड्वाहो याश्चानड्वाह्यो येऽश्वाः, अन्यदपि यच्चतुष्पदं जराग्रस्तं क्षतसंकुलपृष्ठं गोचरेषु चरति, तेषां चञ्चुप्रहारशतैर्मरणान्तां व्यथामुत्पादयिष्ये, ब्रूत यच्चिकीर्षध्वे?' । पुनः काकः प्राह, 'क्षेत्रेषु नीयमानं भक्तं नीरघटांश्च मलक्षेपेणापवित्रान् करिष्ये, प्रधानवडवादीनां नयननिष्कासनं च' । इति श्रुत्वा भीतास्ततस्ते संभूय मन्त्रयन्ते स्म, 'हंसो वैदेशिकः, स पराभूतश्चेत् किं विप्रियं करिष्यते? काकस्त्वीदृगेव द्रोही, तस्मादेतद्वचनमनुवर्तनीयमेव' । इत्यक्षत्रमादृत्य काकमूचुः, 'भोः! त्वां हंसीपतिं वक्ष्यामः, मा कुपः' । काकोऽपि तान् गृहीत्वा महत्यां पर्षदि हंसमाह, 'पृच्छैतान्, 'कः सत्यः को-

१ ख. गृहीत्वा ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ऽसत्यः ?' इति' । हंसोऽपि तेजोहीनो देशान्तरप्राप्तो मन्दमन्दस्वरं स्माह, 'भद्राः! कस्येयं हंसी पत्नी, वितथेतरद् ब्रूत?'। विचारे प्रस्तुते काकः प्राह, 'सदृशी भगिनी स्याद् भार्या त्वन्यकुलजा' इति मत्पत्नी अन्यादृग् हंसी स्यादेव' इति श्रुत्वा ते प्रोचुः 'काक एव हंसीपतिः, आ शैशवाद् दृष्टमिदम्, श्रुतं शिशवोऽपि विदुः'। एतदशनिघातकर्कशं वचनमाकर्ण्य बाष्पान्तरतरत्तरलतारकाभ्यां दृग्भ्यां रोदिति, हंसी च। काकश्च सविशेषमश्रूणि मुञ्चति। ततश्चमत्कृता ग्रामेयकास्तमभाणिषुः, 'काकोलेन्द्र! भो! मौकुले तवायत्तीकृता हंसीयमस्माभिः, ततो हंसो रोदितु, हंस्यपि बद्धानुरागाऽस्मिन् वियोज्यमानाऽऽक्रन्दतु; त्वं तु कृतकृत्यो जितवादः कथमेवं मुक्ताफलस्थूलान्यश्रूणि मुञ्चसे?'। ततश्चिरजीवी जगाद, 'भोः पुरुषाः! अहमेतद् रोदिमि यद् भवतामेतादृशानां मृषासाक्षिणां मृतानां का गतिर्भवित्री ? यतः,—

"एकत्रासत्यजं पापं पापं निःशेषमन्यतः। द्वयोस्तुलां विधृतयोराद्यमेवातिरिच्यते ॥ १ ॥"'

राजहंसं प्रति 'पक्षीश्वर! याहि त्वम्, पत्नीयं ते मे स्वामिनी माता वा, मया तु मृषाभाषिणां चरितानि दर्शितानि, गच्छ गच्छ' इति व्यसर्जि सजायः। गता ग्राम्याः। तत्रास्थात् काकः ॥

॥ इति कूटसाक्ष्ये काककथा ॥

---

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कल्पितेयं कथा । कल्पितकथाकथनं न युक्तं विवेकिनामिति चेत् । न, जनबोधाय कल्पितकथाकथनेऽप्यदोषः "[1]चरियं च कप्पियं वा" इति वचनाद् द्विधा कथानामागमेऽपि प्रतिपादनात् ॥ ५९ ॥

---

यत्र तत्रापि जातानां पूर्वकर्म सहानुगम् । देशान्तरं न याति स्म श्रुत्वा बालवचः कृती ॥ १ ॥

अङ्गदपुरे निरवद्यविद्यः प्रद्योतनो नाम विप्रः । कालिका नाम पत्नी । तस्य क्रमागतं दारिद्र्यम् ।

"दण्डीखण्डमितः प्रयच्छ यदिवोत्सङ्गे गृहाण[2]ार्भकं शुद्धं भूतलमत्र नाथ ! भवतः पृष्ठे पलालोच्चयम् ।
दम्पत्योरिति जल्पतोर्निशि यदा चौरः प्रविष्टस्तदा लब्धं कर्पटमन्यतस्तदुपरि क्षिप्त्वा रुदन्निर्गतः ॥ १ ॥"

एकदाऽत्यन्तं दारिद्र्योपद्रुतोऽचिन्तयदयम्, यथा 'देशोऽयमधारणीयो मे, ततस्त्यक्त्वाऽमुं देशान्तरमुपसर्पामि' इत्येवमनुसंध्याय कुटुम्बमादाय गृहे ज्वलन्तं [3]दीपं मङ्गल्यद्वारयित्वा संचचार । नगरोपान्तं गतस्य 'यष्टिर्गृहे विस्मृता' इति मनस्यभूत् । तां ग्रहीतुं यावत् सदनं गच्छति तावत् पश्यति कामपि बालिकां श्यामां श्यामवेषां बर्बरकेशां मङ्गल्यार्थं बोधयित्वा मुक्तस्य दीपस्य तैलेनोपानहौ समभ्यञ्जन्तीम् । तां च दृष्ट्वा भीतो विस्मितश्चायं पप्रच्छ, 'भद्रे ! का त्वम्, ? किंवा पादुके तैलेन

---

१ चरितं च कल्पितं वा । २ ख. °णात्मजं° । ३ ख. दीपमादाय मङ्गल्यत्वात् सं° ।

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

प्रक्षयसि ?'। ततः सा साट्टहासमवादीत्, 'भो विप्र! य एतस्य गृहस्य स्वामी, तस्यार्धाष्टमिकाऽहम्; स तु देशान्तरं प्रति चचाल, तमनुगन्तुमहं चरणत्राणद्वयं सज्जयन्त्यस्मि'। एवं श्रुत्वा 'स्थानान्तरे दारिद्र्यं तादृगेव, कथं स्वस्थानमुज्झामि ?' इति मत्वा सकुटुम्बः पुनस्तत्रैव स्थितः। ननु सार्धसप्तवर्षस्थायिन्या अर्धाष्टमिकापरनामाया द्वादशजन्मद्वितीयराशिस्थशनि-कालस्थितेः कथं रूपवत्तापि विद्यते, येन बालिकात्वं कल्प्यते? । मैवम्, कुलदेव्या एव विप्रबोधार्थमेवंचेष्टितदर्शनात् ॥

॥ इति कर्मप्राबल्ये विप्रकथा ॥ ६० ॥

---

ध्रुवमेकाग्रया भक्त्या परितुष्यन्ति देवताः। शत्रोरपि प्रसन्नोऽभूद् गदापाणिस्तपस्विनः ॥ १ ॥

भद्रपुरे जडमतिस्तापस एकः। तस्य मते शिव एव देवः। अत एव गोविन्दे द्वेषः। ततश्च कदाचिद् हरिशङ्कराख्ययात्रार्थं स हरिद्वारमुपागमत्। तत्र ददर्श समुदितौ हरिहरौ। स तु हरमेव ननाम न तु हरिम्, एकपादाश्रयणात् पार्वतीचरणपरिहारेण शिवचरणनन्तृरावणवत्। जलस्नात्रपुष्पचन्दनपत्रजलादिभिः शिवपक्षमेवानर्च। यदा तु धूपदहनार्थं धूपदहनं प्रगुणीचकारासौ। तदा चिचिन्त हरिः, 'गन्धस्य घ्राणकोणद्वयप्रवेशस्तावदवश्यंभावी, कथमत्र मां वर्जयिष्यति ?'। एवं विमृशत एवास्य तद्ग-न्धप्रवेशनिवारणार्थं सहसा करसंपुटेन हरेर्घ्राणं मुद्रितम्। तेन च तस्य कर्मणा प्रमुदितो विष्णुः साक्षाद्भूतः प्रोवाच, 'भो-स्तापस! तवाभक्तिरप्यसौ मम भक्तिरेव, एकाग्रतया देवाः प्रसीदन्ति, याचस्व यथेच्छम्'। एवं तेनोक्तेऽपि जटी प्राह,

P.P. Ac. Gunratnasuri M.S.     Jun Gun Aaradhak Trust

'तव प्रसादेन मे न कार्यम्' । ततः सविशेषं तुष्टो हरिः । हरस्य पार्श्वाद् भरटकमुकुटमणेरदृश्यीकरणवशीकरणविषनिग्रहादिसिद्धीरदीदपत् ॥

॥ इति भक्तौ जटाधरकथा ॥ ६१ ॥

---

उपकारपरं ज्ञात्वा प्रीणीयाद् न तु खेदयेत् । उद्वेजितेन श्राद्धेनोपालभ्यत यतिर्यतः ॥ १ ॥

प्रवालपुरे कलिङ्गश्रेष्ठी । तस्य पञ्च पुत्राः, हरिषेणो १ देवः २ कुलनन्दनः ३ चन्दनो ४ वर्धमानश्चेति । तत्र प्रथमः साधुशुश्रूषणतत्परः । एकदा तत्रागताः सूरयः । तद्गच्छे बहवः श्रमणाः, तेष्वेकः सुगुणतमः, एतस्य विश्रामणार्थं हरिषेणो नित्यमेति । अन्येद्युरस्थिमांसत्वग्रोमसुखां संवाहनां कुर्वाणे तस्मिन् स मुनिः प्रकामं पिप्रिये । अतश्च स मुनिः 'इच्छ' इति न व्याकरोति । प्रहर एको व्यतीयाय । ततो विश्रामणालुब्धेन वार्तयितुमारेभेऽसौ, 'श्रावक ! यूयं कति बान्धवाः ?' । तेनोक्तम्, 'पञ्च' इति । 'क्व वो मातृशालम् ?' । तेनोचे, 'अवन्त्याम्' इति । 'को व्यवसायः ?' । 'सूत्रहट्टम्' इति । एवं वार्तासु निष्ठितासु विस्मृतिवशात् पुनः पृष्टम्, 'श्रावक ! कति बान्धवाः ?' । स ऊचे, 'चत्वारः' इति । यतिनाचक्षे, 'पूर्वं त्वमेव 'पञ्च बान्धवाः', उत्यूचिवान्, इदानीं तु 'चतुरः', किं कारणम् ?' । खिन्नः श्राद्धो बभाण, 'यस्तव



---

१ ग. श्राद्धशु° ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हस्ते चटितस्तस्य जीवितव्यं[1] सौभाग्यवत् कुतः ? अत एव मृतोऽसौ कल्यः, अग्रतश्चत्वार एवावशिष्यन्ते[2]' ॥

॥ इत्यतृप्तयतिकथा ॥ ६२ ॥

---

**भ्रमन्ति दाम्भिकाः केचिद्देवगुरुधर्मकाः । परद्वीपादुपेतेन विक्रीतौ वणिजा यती ॥ १ ॥**

भृगुक्षेत्रे केचिदाचार्याः । तेषां गच्छो महान् बालग्लानशैक्षाकुलः । भृगुक्षेत्रं च वेलाकूलम् । तत्रागतं किमपि वाहनम् । तत उत्तीर्णा लोकाः । तत्रैको वणिग् मायावी कर्णघृष्ट्याऽधीतश्रावकधर्मा मिथ्यादृष्टिरास्ते । सोऽप्यागात् । नगरान्तो भ्रमन् वसतिं प्रविष्टः । ववन्दे गच्छम् । परिचयं च प्रारेभे । गच्छस्याभिमत इवाभूत् । तत्रापि द्वौ क्षुल्लकौ भृशमावर्जयामास । प्रतीतौ तस्य तौ । एकदा प्रवहणवार्तास्तेन प्रक्रान्ताः । क्षुल्लयोः प्रवहणदर्शनेच्छाऽभूत् । गुरूनापृच्छ्य तं खलं पुरस्कृत्य तौ गतावुपसागरम् । तदानीं वाहनपूरणिकावसरः । ध्वजपटाः प्रोत्तम्भिताः । सितपटस्ताडितः । पवनाः पूरिताः । तदा च तौ क्षुल्लकौ तेन वणिजा दिदर्शयिषामिषादब्धिबोहित्थं समारोपितौ । प्रेरितं यानम् । क्रमेण प्राप्तं परतीर्थे बर्बरकूले । क्षुल्लौ तेन वणिजा कोलिकशालायां विक्रीतौ । ते हि कोलिका नृशोणितेन दुकूलानि साधुवन्ति । कोलिकेभ्यो बहुकं स्वं



---

१ क. ख. °व्यं कु° । २ ख. °व जज्ञे ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गृहीत्वा गतो वणिक् । तक्ष्येते तीक्ष्णक्षुरैः क्षुल्लौ । आकृष्यते रक्तम् । एवं जातावस्थिचर्मावशेषौ । गतो बहुकालः । भवितव्यतावशात्तु तत्रागतेन भृगुक्षेत्रवास्तव्येन पूर्वपरिचितेन श्रावकेणोपलक्ष्य मोचितौ । आनीतौ भृगुपुरम् । सेवेते गच्छमालोचितप्रतिक्रान्तौ क्रियापरौ । गतेष्वब्देषु द्वित्रेषु स एव द्रोही वणिगागात्, तौ येन विक्रीतावभूताम् । 'निस्सीही' इत्यादिप्रक्रियापूर्वं यदा समेत्य वन्दितुं प्रवृत्तः, तदा ताभ्यां क्षुल्लाभ्यामुपालक्षि । तेन तु तौ न, असंभवात् । आगतमात्रेण च निमन्त्रितौ क्षुल्लौ यानदर्शनाय । ज्ञाततत्त्वौ च तौ ब्रूतः स;—

"दिट्ठं बब्बरकूलं दिट्ठाइं ताइं तुम्ह चरियाइं । अन्ने वंदसु सावय ! जे तुम्ह गुणा न याणंति ॥ १ ॥"[1]

ज्ञातं च तेन गच्छेन वणिजः पारंपर्यं वार्तायाः । गतो वणिग् । गच्छश्चिरमनन्दत् ॥ ॥ इति शाठ्यधार्मिककथा ॥ ६३ ॥

---

केचिज्जडधियः कार्ये पौर्वापर्यं न जानते । पात्रपक्षद्वयात् त्यक्ते घृततैले तपस्विना ॥ १ ॥

लक्ष्मीपुरे कोऽपि जटाधारी जाल्मः । तस्य विनेयस्तु तदधिकः । कस्मिन्नपि दिने गुरुः शिष्यमादिशत्, 'वत्स ! धूपदहनमिदं गृहीत्वा गच्छ हट्टम्, अस्यैकस्मिन् पक्षे घृतम्, एकस्मिन् पक्षे तैलं क्षिप्त्वा समागच्छ' । 'तथा' इत्युक्तेऽविमृश्यकारी ययौ । भाषितो वणिग्, 'देहि मे घृततैले' । सोऽपि घृतमेकत्र चट्टुके चिक्षेप, 'द्वितीयं पात्रं बिभृष्व तैलाय' इति भरडकमूचे । स आह,

---

[1] दृष्टं बर्बरकूलं दृष्टानि तानि तव चरितानि । अन्यान् वन्दस्व श्रावक ! ये तव गुणान् न जानन्ति ॥ १ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

'नन्वस्य द्वितीयः पक्षोऽस्त्येव, निक्षिप तत्र तैलम्'। इति श्रुत्वा वणिग् हसन् द्वितीये पक्षे घृते तैलं न्यास्थत्। तदा च घृतं त्यक्तम्। गतो हट्टाद् गुरोरन्तिकं शिष्यपशुः। वादितोऽसौ गुरुणा, 'रे! आनीते घृततैले?'। स आह, 'ध्रुवमानीते'। यावद् दर्शयति पक्षमेकम्, तावत् तैलं दृष्ट्वा गुरुः क्रोधाज्जगाद, 'रे घृतं क्व?'। शिष्यः प्राह, 'द्वितीयपक्षे'। 'तर्हि दर्शय'। यावत् परावर्तेन द्वितीयपक्षं प्रकाशयति तावत् तैलं जगाल। घृतं तु प्रागपि गतमेव। स्थितौ प्रसारितास्यौ तौ॥

॥ इत्यविमृश्यकारिकथा ॥ ६४ ॥

---

यथा रुचिर्यथा पथ्यं कार्यं कुर्यात् तथा बुधः। बहुभाषी जनः फल्गुस्तत्र श्रेष्ठी निदर्शनम् ॥ १ ॥

कश्चिद् वणिक् सह बालेन पुत्रेण सवृषभश्चचाल निजग्रामाद् ग्रामान्तरम्। अन्तराले समायातो ग्राम एकः। तत्र पुत्र उत्तारितो वृषभात् स्वयं चोत्तीर्णः 'मा स्म लोको वादीर्वृषभपीडननिस्त्रिंशोऽयम्' इति। यावद् ग्रामान्तर्गच्छति तावल्लोको भाषते, 'किमयं वृषभो रक्षितो दुग्धं दास्यति? कथं स्वयं नारोहति, सुतं वा नारोहयति?'। एवं श्रुत्वा वणिक् पुत्रं वृषभमारोपयत्। तदा ग्रामलोको लपति, 'अहो! मूर्खो वृद्धः, किमनेन शिशुना रक्षितेन,? स्वयं नारोहति'। तदाकर्ण्य

---

१ ख. गत उपगुरुं शि°। २ घ. रुचि यथा°। ३ ख. °ल ग्रा°।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पुत्रमुत्तार्य स्वयमारुरोह । पुनर्लोकवचः, यथा; 'अहो! निर्लज्जो निर्घृणो वणिक्, पाल्यं बालं रोलयति, स्वयं तु पङ्गुरिवारूढो याति' । इति विविधवाग्मुखरं जनं दृष्ट्वा वणिगन्तर्मनसं जगाद;

"सर्वथा स्वहितमाचरणीयं किं करिष्यति जनो बहुजल्पः । विद्यते स न हि कश्चिदुपायः सर्वलोकपरितोषकरो यः ॥ १ ॥"

॥ इति लोकाप्राधान्ये श्रेष्ठिकथा ॥ ६५ ॥

---

परोक्ते यस्य विश्वासस्तस्य दुःखं न दुर्लभम् । वृद्धावचनविश्रम्भात् क्षुद्राभिस्तस्करो द्रुतः ॥ १ ॥

वीरवर्धनपुरे क्वचिद् गृहे श्वश्रूवध्वौ स्तः । कदाचित् तत्र चौरबाहुल्यं संवृत्तम् । निशि ते श्वश्रूवध्वौ जागृतः । शूचीभेद्ये तमसि तत्र गृहे प्रविष्टस्तस्करः । 'जागर्ति कोऽपि नवा?' इति ज्ञातुं मन्दमन्दपदो भित्तिकोणे तस्थौ । तं च विदाञ्चक्रतुस्ते स्त्रियौ । विदित्वैव च सुप्ते सुप्ते वार्तयतः । श्वश्रूराह, 'ऋजुस्त्वम्, किञ्चिद् वत्से! न जानासि, 'संप्रतीह कोट्टपालदौर्बल्याच्चौराः प्रबलाः स्वैरं चरन्ति' एतच्च न वेत्सि, ततश्च कथं निजं नगोदरहारार्धहाराङ्गादिभूषणं न गुप्ततरे स्थाने न्यस्तवती, त्वयाऽत्र संमुखे पिचुमन्दे न्यस्तं सर्वं स्वकीयमस्मदीयं च हेमादि, अत्रारुह्य मलिम्लुचस्य गृह्णतः कियान् विलम्बो भवेत्?' इति श्रुत्वा तस्करस्तं निम्बद्रुममारोहति स्म । तत्र च चिराद् विद्यते मधुजालम् । तत्र स्थिताः सरघाः सहसोड्डिडियिरे । उड्डीय च मलिम्लुचस्याङ्गे लग्नास्तुदन्ति, तोत्रतीक्ष्णैर्मुखैर्वेधयन्ति समन्ततः, वहति रक्तप्रवाहः । तदाक्रान्तः पतितोऽधश्चौरः ।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ज्ञातो धब्बकः । उक्तं मध्ये स्थितया वृद्धया 'कोऽयं पतितः?' । चौरेण गदितम्, 'यस्तव वाचा प्रतीतः स पतितः' । वृद्धयाऽभाषि, 'धिक् तं विधिं, यस्त्वां चौरं ससर्ज, कोऽपि किं द्रुमे हेमादि निक्षिपति?' । चौरो गतः ॥

॥ इति परवाक्प्रत्यये चौरकथा ॥ ६६ ॥

---

**विद्वद्भिः सह वक्तव्यं धीवृद्धैर्न पुनर्जडैः । प्रज्ञानाशादिहार्थेषु दृष्टान्तः पटुवाग् जटी ॥ १ ॥**

पाटलिपुरे विप्रयज्ञदत्तस्य सूनुर्महाप्रज्ञश्चैत्रो नाम । स पपाठ किञ्चिद् किञ्चिद् गुरुसंनिधौ[1] । विशेषशास्त्राधिजिगांसया[2] तु महोदयनामकं पत्तनं प्राप्तः । तत्रास्ते उपाध्यायो ज्ञानदर्पणः । तत्पार्श्वे विनयेन चैत्रेण पठनं प्रारब्धम् । संपन्नश्चातुर्विद्यमहोदधिः खण्डनपण्डितश्च । कृतकृत्यश्च पितरं स्मृत्वा स्वदेशं प्रति यियासुर्गुरुमापप्रच्छे । तेनापि सवात्सल्यं भूयिष्ठान् पुस्तकान् दत्त्वाऽनुव्रज्य प्रेषितः । व्यावर्तमानेन च शिक्षा दत्ता, 'वत्स! जटाधरैः कूटपाठकैः सह संगतिर्न कार्या, धीभ्रंशात्' । 'तथा' इति गुरोः शिक्षां मूर्ध्नि निधाय पृष्ठवाहं पुस्तकैर्भृत्वा चचाल । प्रयाणके पञ्चमे सायं नगरमेकं प्रविष्टः । अत्रान्तरे जलदो वर्षितुं प्रचक्रमे । पुस्तकभेदभयात् स्थानमिच्छता तेन दृष्टो भरटकमठः । आहूतश्च भरटकेन । गतश्च मठमध्यमसौ । गुरुवाक्यस्मरणेऽपि कार्यं बलीय एव । उत्तारिताः पुस्तकाः । बद्धोऽनड्वान् । स्थितश्च तत्र चैत्रः । निशायां वार्ताप्रसङ्गेन भाषितो भरटेन

---

१ क. ग. उपगुरु । २ क. ग. जिज्ञास° ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

चैत्रः, 'यूयं किं किं वित्थ ?' । सोऽप्याह, 'वयं पण्डिताः, यद् यः पृच्छति तस्य तद् व्याख्यामः स्वच्छन्दम्' । एवं श्रुते जटी प्राह, 'तर्हि व्याख्याहि;—

"जातरि भुंजति भरड भसंगी मुहगोरि ! जडपांडरी । तड तड भुंजइ महण देइ पडतड ता धसमस ॥ १ ॥"'

इदं श्रुत्वा चैत्रो बहुधा विचिन्त्यापि न वेत्ति । जातो विलक्षः । पुनर्जटी प्रललाप, 'तर्हीदं शृणु;—

"सिरिगिरि बोलइं राणा, सिरिगिरि दीजइ काणा । सिरिगिरि बोलइ पंडिया, तीनरिनेता सिरिगिरि सिरिगिरि ॥ २ ॥"'

चैत्रो न वेत्ति । जटी प्राह, 'न वेत्सीदं चेत्, कुतस्त्यः पण्डितस्त्वम् ?' । चैत्रो मनसि ललज्जे । प्रभाते प्रश्नेच्छया व्याघुट्य पण्डितस्यैव समीपमुपतस्थौ । वन्दित्वा मठगमनकथां पूर्वोक्तां कथयित्वा तयोः पद्ययोरर्थं पप्रच्छ । गुरुणा भाषिते पद्ये द्वे अपि अभ्यूहनशक्तियुक्ततया आचख्ये यथा, 'वत्स ! कूटपाठेनान्तरितोऽर्थः, न पुनरज्ञातं ते किमपि प्रायः, शृणु;—

"यत्र भुञ्जति भस्माङ्गी मूर्खो वा यदि पण्डितः । तत्र भुञ्जाम्यहं देवि ! प्रत्यक्षो वृषभध्वजः ॥ १ ॥"

इत्युमामहेशसंवादे श्लोक एकः । द्वितीयस्तु लोके ख्यातः;—

"सकृज्जल्पन्ति राजानः सकृज्जल्पन्ति पण्डिताः । सकृत्कन्याः प्रदीयन्ते त्रीण्येतानि सकृत्सकृत् ॥ २ ॥"'

इति पारम्पर्यं ज्ञात्वा चैत्र आह, 'भगवन् ! किं करोमि, जलदवृष्टिपारतन्त्र्यवृत्त्या तत्र प्रविष्टोऽहम्, अतः परं तु मूर्खैः सह न संयोक्ष्ये' । गुरुरूचे, 'वत्स ! न नवीनमेषामिदं जाड्यम्, किन्तु चिरात्; श्रूयते हि पूर्वम्; 'नव तपस्विनो ग्रामा-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

चेलुः, अन्तरा समेता नदी, तीर्णाः प्राप्ताः पारं सर्वे, तत एकेनोक्तं 'संख्या गृह्यताम्, मा कोऽपि मग्नोऽभूत्' इति; ततो गणयति, पश्यत्यष्टौ, नात्मानं नवमं गणयति; ततो रोदिति 'एको मृतः' इति, शेषा अपि तथैव कृत्वा रुदन्ति; इतश्चागताः पथिकाः, केनापि पृष्टं रोदनकारणम्, ज्ञातं तत्त्वम्, बोधिताश्च तैः कृच्छ्रात्, यथा 'अयमेव नवमः'; गताः पान्थाः'। ततो गुरुं नत्वा प्राप्तश्चैत्रः पितुर्मन्दिरम्। विद्यया महाजनपूज्यपादश्चाभवत्॥

॥ इति जडसङ्गत्यागे चैत्रकथा ॥ ६७ ॥

---

प्रथमं डम्बरं दृष्ट्वा न प्रतीयाद् विचक्षणः। अत्यल्पपठितं कीरं ज्ञं मेने कुट्टिनी यतः॥ १ ॥

सिन्दूरपुरे चन्दनको विप्रः। स शाठ्यनिधिः। शुकमेकं चतुष्पथे विक्रीयमाणं गृहीत्वा[१] गृहमानीय श्लोकगाथादोधकादिकं पाठयितुमारेभे। न किञ्चिदप्यागच्छति, निष्प्रज्ञत्वात्। भवन्ति हि तारतम्येन तिर्यक्ष्वपि ज्ञानप्रभेदाः। ततो विप्र एतदेवापीपठत्, यथा 'वीसइ विसा'। एतत्तु शुकस्याप्यायातम्। यौवनस्थं सुरूपं शुकं सपञ्जरं स चतुष्पथे विक्रयार्थमानिनाय। तत्रैकागता कुट्टिनी। दृष्टस्तया शुकः। भाषितो वाडवः, 'किं विचिक्रीषसे शुकमेनम्?'। स प्राह, 'एवम्' इति। कुट्टिन्याह, 'किमपि पाठितोऽस्त्यसौ नवा?'। सूत्रकण्ठोऽवदत्, 'एतमेव पृच्छ'। ततो जल्पितोऽनयाऽसौ, 'वत्स कीर! किं मा-

---

१ क. ग. लात्वा।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तृकां पठितुं जानासि?' । कीरो धीरोक्त्याऽवदत्, 'वीसइ विसा' । पुनः पृष्टम्, '''चत्वरे चत्वरे रामः पर्वते पर्वते शिवः'' इत्येतद् वक्तुं वेत्सि?' । पुनः शुकः सावष्टम्भमाह, 'वीसइ विसा' । हृष्टा नर्तकीमाता, 'असौ वावदूको मम सदने भोगिनां रञ्जको भावी' इति कदाशया तं शुकं भूरिणा हेम्ना चिक्राय । विप्रोऽगात् । तुष्टा गता सा गृहम् । भोजितः शुकः । मध्याह्नानन्तरं भाषयामाहे, 'वत्स कीर! पठितुं जानासि सूक्तानि?' । कीरो 'वीसइ विसा' इत्येतदेवाह, न तु सूक्तं किञ्चित् । पुना रामायणभारतादिषु सर्वपृच्छासु 'वीसइ विसा', न तु पठति किञ्चित् । ततोऽनया लेपे 'घाठी रे घाठी' । शुकोऽपि बभाषे, 'वीसइ विसा' । 'धिग् विप्रेण वञ्चिताहम्' एवं खिन्ना सा ॥

॥ इति प्रथमडम्बरकथा ॥ ६८ ॥

---

कं न खेदयति प्राज्ञमत्यन्तं चिरकारकः । श्रुत्वा वधूश्वशुरयोरालापं प्राघुणा ययुः ॥ १ ॥

पोतनपुरे कामपालो वणिक् । तस्य मल्लो नाम सुतः । बलाहिका नाम वधूः । साऽत्यन्तमालस्योपहता न किमपि वेलायां गृहकर्म करोति । करोति वा किञ्चित्, तदपि मनसि ज्वालं ज्वालं, न तु हर्षं हर्षम् । एकदा प्रभाते प्रभूताः प्राघुणकाः प्राप्ताः । कृतः श्रेष्ठिना स्वागतादिसत्कारः । उपविष्टाः सर्वे । तदा चाभ्युदयते भानुमान् । त्रस्यन्ति तिमिराणि । वाद्यन्ते चैतेषु

१ ख. वेत्सि । २ क. ग. रविः ।




P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वाद्यानि । प्रवर्तन्ते व्यवहाराः । तदा च श्रेष्ठिना स्नुषा भाषिता, 'वत्से! वधु! दीपकं कुरु' । साप्यूचे, 'करिष्यामि' । प्राघुणाः प्रोचुः, 'जगद्दीपे रवौ सति को दीपकरणावसरः?' । श्रेष्ठ्यप्याह, 'न जानीत यूयमस्मद्वध्वा व्यवहारम्, इयं संप्रत्युक्तं संध्यायां दीपं करिष्यति । ततोऽर्वागपि कथयन्नेवास्ते यथा तदा करोति' । इदं श्रेष्ठिवचः श्रुत्वा प्राघुणैर्विमृष्टम्, 'ईदृश्याः प्राधान्ये कदा देवार्चनम्? कदा भोजनम्? कदा ताम्बूलम्? तस्मात् पलायनमेव श्रेयः कुदेशात् कुप्रभोश्चैव' । इति विचिन्त्य शिरः कण्डूयन्तस्ते ययुः, न पुनराययुः ॥

॥ इति चिरकारिस्नुषाकथा ॥ ६९ ॥

---

आकस्मिको महाल्लाँभो नृणां भाग्योदये भवेत् । खादामि खादामि गिरा विप्रेणोपार्जिताः श्रियः ॥१॥

गोबरपुरे हलसेनो नाम ब्राह्मण आढ्यूनो निर्भाग्यो जडबुद्धिः कुवाग् दीनः कुरूपो दरिद्रश्च । तस्य कृपणा चण्डी कुमिला च कृत्तिका नाम भार्या । सा राध्नोति चन्द्रबिम्बाभिधां रब्बां संध्यायाम् । आसन्ध्यभिक्षितकणेभ्य एव तन्निष्पत्तिः । नित्यं रब्बाभोजनात्तु निर्विण्णो विप्रो वक्तुं न शक्नोत्यस्याः पुरः । परिवेषितायां रब्बायां विप्रोऽवदत्, 'अहं न खादिष्याम्यमूम्' । ततः सा कौणपीव कुपिता काष्ठमयीं दर्वीं तद्घातायोत्पाटयामास । तद्भयादसौ नष्टो गच्छति । सापि दर्वीहस्ता महतीं वेलां पृष्ठे दधाव । पश्चाद् निवृत्त्य गृहमागात् । विप्रस्तु ध्यानात् तामन्वायान्तीमेव भीतो विदन् प्रविष्टस्तन्नगरकोट्टपरिखायाः पृथु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

लायाः गम्भीराया मध्यम् । अस्तं गतो रविः । जातं तमः । आयाति निद्रा । सुप्तः पतित्वा विप्रहलसेनः । परिगलिता निशीथिनी । परिशिष्यते घटीचतुष्टयम् । तदा च लुण्टाकाः केऽपि रात्रौ तत्र पुरे चौरीं कृत्वा तत्रैव परिखायामागताः । ते च भृशं बुभुक्षिताः सर्वे, चिरकालं लङ्घितत्वात् । तेषु पुनरेकस्य चौरस्य शम्बले नालिकेरमास्ते । तत् स्फोटयितुं पाषाणं विलोकयतस्तस्य दृष्टौ पतितं शिरः । तमोवशात् तदेव पाषाणं कल्पयित्वा तदुपरि तेनास्फालितं नालिकेरम् । तेनाघातेन जागरितो विप्रश्चिन्तयति, 'ध्रुवं सैव मम भार्या रब्बाया अखादनेन रुष्टा दर्वीहस्ता मामागात्, मामेवं दर्व्या जघान' इति । ततः सहसा प्रललाप तारस्वरम्, यथा; 'खादामि खादामि' । विप्रेण 'रब्बां खादामि, कथं मां मारयसि हे पत्नि ! ?' इति धिया गदितम्, चौरैस्तु ज्ञातम्, 'राक्षसोऽयं कश्चित्' । लोप्त्रं तदवस्थं मुक्त्वा प्राणभयात् तस्कराः पलायिताः । क्षणार्धेन च प्रादुरास विद्रुमपुञ्जमञ्जुलः प्रातःसंध्यारागः । ततो मायापिहितमुद्घटते च विश्वम् । कश्मीरजकृताङ्गरागेव भानोर्भर्तुरागमे पूर्वा परिगृहीतकौसुम्भवसनेवाभाति स्म । द्विजो यावत् पश्यति तावन्नास्ति सा कुटुम्बिनी । केवलं वस्तूनां पोट्टलिकाः स्फुरन्ति पुरतः । यावच्छोटं छोटं पश्यति, तावद् रजतमहारजतप्रवालमुक्ताफलहीरचीरकर्पूरादीनि वस्तूनि महेभ्यगृहार्हाणि ददर्श । तथैव बद्ध्वा समादाय स्वगृहमाजगाम । वादितस्तया संमुखोपविष्टया व्याघ्र्येव दारुणया जायया, 'क्व गतोऽभूः ? रे किमर्थं गृहमागतोऽसि ? केनाहूतः ? गच्छ शीघ्रम्' इत्यादि । विप्रोऽप्यवादीत्, 'भद्रे ! गतास्ते दिवसाः, येष्वहं ते दासवद् निर्भत्सनीयोऽभूवम्, संप्रति श्रिया धनदोपमः कृतो दैवेन । तथा हि पश्येदं कनकादि प्रत्येकम् । तां श्रियं दृष्ट्वा

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हृष्टतुष्टा 'जीव, आदिश' इति वादिनी तमेव विप्रं दैवतवदाराराध ॥

॥ इति सहसार्थलाभकथा ॥ ७० ॥

---

असत्यवादिभिः पुम्भिरपाये को न पात्यते। कारितौ कलहाक्रन्दौ [1]गृहिणोः शठवाग्मिना ॥ १ ॥

अवन्त्यां महीधनः श्रेष्ठी। स नव्यनव्यकथाप्रियः। [2]तस्य भार्या मदनिका। एकदा तत्र धूर्तानां पेटकमायासीत्। तेषां च परस्परमियं व्यवस्था, 'एकेन जनेन शेषाणां सर्वेषां भोजनं दापयितव्यं वारके वारके। ततः प्रभातारम्भे एको धूर्तो विप्रवेषः श्रेष्ठिगृहमागच्छन् श्रेष्ठिनमाललाप, 'भो महाभाग! देहि मे मत्कुटुम्बाय च भोजनम्,

"निक्षिप्य कर्षकः क्षेत्रे प्रवर्धयति संपदः। न्यासीकुर्वन् पुनर्गेहे नाशयत्येव मूलतः ॥ १ ॥"'

इत्यादि तद्वचनमाकर्ण्य श्रेष्ठ्याह, 'अहं तस्मै भोजनं ददामि, यो मामेतां कथां कथयति, या पूर्वं नाभूद्, न भवति, न भविष्यति च'। तादृशीं कथां कथयितुमसमर्थो धूर्तपांशनो निवृत्त्य स्वं पेटकं प्राप्तः। उवाच च धूर्तानाम्, यथा, 'अत्र श्रेष्ठ्येको मया भोजनं ययाचे, तेनोक्तम्, 'तस्मै ददे यो वै कथां तां कथयति या नाभूद् न भवति न भाविनी;' सा च कथयितुं मया न पारिता, अतोऽहमागतः, यो शक्तः स गृह्णातु तत्पार्श्वादभिमतम्'। एवमभिधाय विरते तस्मिन्नेको निष्पन्नधूर्तः प्राह, 'अहमेव

---

१ गृही च गृहिणी च तयोर्गृहिणोः। २ क. ग. तद्दं दमनिका।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तं बोधयिष्यामि' । एवं प्रतिज्ञाय गतस्तत्र । उपविष्टः श्रेष्ठिपुरः, ऊचे च, 'श्रेष्ठिन्! अद्भुतमेकमत्रैव नगरे संप्रत्येव दृष्टं मया, यथा; दशपुरुषवाह्यं वृन्ताकीफलमेकं पञ्चभिर्लोष्टिकैर्लभ्यते पत्रशाकहट्टिकायां प्रकटितमस्त्येकेन नरेण' इत्यपूर्वां वार्तां श्रुत्वा द्रष्टुं दधाव वणिक् । गच्छता च स गृहरक्षणे नियुक्तः । तदा हि तस्य पत्नी निकटे सरसि जलाहरणाय गताऽभूत् । गृहं शून्यं धूर्तो रक्षति; ताम्बूलं चर्वति । आगता क्षणेन पत्नी पतिमपश्यन्ती तं च नवीनं पश्यन्ती पप्रच्छ, 'कस्त्वम्! गृहपतिः क्व गतः?' । धूर्तोऽवदत्, 'अहं वैदेशिको भोजनार्थी श्रेष्ठिनः समीपमागतः, यावदहं सूक्तादिना रञ्जयामि, तावदागतैका मत्ता स्त्री । तया सह श्रेष्ठी चिरं वार्तयंस्ताम्बूलं खादयन्नस्थात् । सा च तं क्वापि गृहीत्वा गता । तत्प्रकीर्णमिदमिह ताम्बूलम्' इति स्वताम्बूलमदर्शयत् । रुष्टा पत्नी जलघटं प्रस्फोट्य तं पप्रच्छ, 'केन पथा स पापी गतः?' इति सोऽपि तमेव पन्थानं श्रेष्ठिक्षुण्णं कथयित्वा प्राहिणोत् । दधाव सा । ददर्श पतिम् । तादृशवृन्ताकादर्शनादितस्ततो भ्रमन्तं शून्यास्यं दृष्ट्वा क्रुद्धा चुक्रोश, 'रे पारदारिक! किं भक्षितार्द्रको मूषिक इव भ्रमसि?' इत्युक्त्वा निर्धमनपङ्कपांस्वादिनाऽताडयत् । सोऽपि 'किमेतत्? किमेतत्?' इति तामूचे । सापि क्रुद्धाऽऽह तानि दुर्वचांसि । श्रेष्ठिनोक्तम्, 'कथं यत् तद् भाषसे?' । साप्याह, 'इत्थमेवं स्वैरी दुरात्मा,— मम वैदेशिकेन तेनोक्तम्, 'परस्त्रियाऽऽहूतो गतः' इति' । श्रेष्ठिना शपथशतैः प्रत्यायिता सा, भाषिता च, 'धूर्तवार्तयाऽहमेव भ्रान्तस्त्वमपि भ्रान्ता, खरण्टितौ पांशुपङ्कादिना सरसि स्नात्वा गृहं यावः' । गतौ स्नानाय । दृष्टौ च श्रान्तौ[1] दूरात् तेन

---

१ ख. स्नातौ ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गृहगवाक्षस्थेन । अत्रान्तरे ग्रामान्तरादागात् श्रेष्ठिभगिनी सपरिकरा । तद्गृहं प्रविशन्ती च न भ्रातरं भ्रातृजायां च पश्यति । ततः शठमप्राक्षीत्, 'क्व गृहस्वामी, गृहस्वामिनी च ?' । शठो ललापं[1], 'तयोः स्वजनेषु कोऽपि वल्लभः प्रमीतः[2], तज्जलाञ्जलिदानाय तौ जलाशयमगाताम्, पश्यत, शुचैवं जलपात्रं प्रस्फोटयन्तौ तौ गतौ, इति गृहस्वामिनीस्फोटितं[3] तमेव कुम्भं दर्शयामास' ।

"असत्यमपि सत्याभं भाषन्ते शठबुद्धयः । उच्चं नीचं समेऽप्युच्चैर्यथ्युश्चित्रकरोत्तमाः ॥ १ ॥"

प्रत्येति स्म सा ऋज्वी । स्थिता च निषद्य सशोकमूकानना । मुहूर्तेन चाजगन्वांसौ तौ दम्पती जलक्लिन्नकेशवसनौ । तथाविधौ दृष्ट्वा शोकं निश्चित्य गले तयोर्लग्ना रोदिति प्राघुणिका । तावपि रुदितः । तौ हि 'ध्रुवमियं कमपि शोकं स्वभर्तृपक्षजं वहमाना उपासदागता[4] क्रन्दति' इति विचारयतः । यावत् त्रयाणामपि भग्नो रोदनेन स्वरः । पश्यति हसन् कैतवी । उपविष्टा रोदं रोदं सर्वेऽपि । पृष्टं भगिन्या, 'को वो मृतः ?' । तावाहतुः 'न कोऽपि; भवत्यास्तु पक्षीयः कः क्षीणः ?' । सोचे, 'कुशलं चिरजीविनो मत्पक्षस्य, न कोऽपि मृतः' । श्रेष्ठिना बभणे, 'तर्हि किं क्रन्दसि ?' । साऽभाषत, 'भवतोः सशोकत्वं श्रुत्वा क्रन्दामि' । श्रेष्ठिभ्यामूचे, 'केनोक्तं तवेदम् ?' । साप्यङ्गुल्यग्रेण दर्शयन्ती तं धूर्तमाविष्करोति स्म । श्रेष्ठिना कोणकोपविष्टो हसन्नसौ समाकार्याऽलापि, 'भोः ! किमेतत् तव चरितम्, प्रथममहं वृन्ताकवार्तया विप्रलब्धः,

---

१ क. ग. °प स्व° । २ मृतः । ३ क. ग. भग्नं त° । ४ अस्माकं समीपे उपास्मत् । ५ ख. गतः ।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भार्या तु मामिका मच्छीलविप्लवकथनेन प्रतारिता, भगिनी तु शोकाक्रन्देन खेदिता ?'। धूर्तः प्राह, 'श्रेष्ठिन् ! भोजनार्थिनो वयम्, ऋजुपद्धत्या तु त्वं किमपि न ददासि, अद्भुतां कथां पृच्छसि, अद्भुता चास्याः कथायाः परा कापि नास्ति, सेयं भव्या कथा वः कथिता'। चमत्कृतो वणिक् सर्वान् धूर्तानबूभुजत् 'सर्वमेभिः सिध्यति' इति परिभाव्य । भगिनीं व्यसृजत् ॥

॥ इति मृषावादिधूर्तकथा ॥ ७१ ॥

---

[1]स्फोरयन्ति शौण्डीर्यं केचिद् वाचैव केवलम् । कार्यकाले तृणायन्ते यथा स क्षत्रियाधमः ॥ १ ॥

मालवेष्वुज्जयिन्यां कश्चिद् राजपुत्रो राजकुलं याति । सेवां करोति । तत्रायातः कदाचिद् गौर्जरः सेवार्थी शठो भटः । तयोः सिंहद्वारासन्ननिषण्णयोर्जातो मिथः संलापः । प्रथमं मालविको गौर्जरं पप्रच्छ, 'भवतः किं नाम ?'। गौर्जरेणोचे, 'गजसिंहः'इति पितरो वदन्ति । ततो 'गजः सिंहश्च'इति भयकृन्नामोक्तं विचार्य सकोप इव तस्थौ । पश्चाद् गौर्जरेण पृष्टो मालविकः, 'भवतां किं नाम, देव ! कथ्यताम् ?'। मालवीयोऽप्याचचक्षे श्मश्रुणि करं क्षिपन्, 'भोः ! मम बहूनि नामानि, तद्यथा; विंशतिर्वृश्चिकाः, सप्त सर्पाः, चत्वारश्चित्रका इत्यादि कियदुच्यते !'। एतदाकर्ण्य तूष्णीं [3]तस्थौ गौर्जरः । गताः

॥ ६१ ॥

---

१ क. ग. स्फोरयन्ति च शौ° । २ क. ग. वेनोक्तं । ३ क. ग. स्थितो गौ° ।

© Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

केऽपि दिनाः। एकदा मेघान्धकाराकुलायां [1]निशि राजद्वारे चपेटयाऽऽहत्य मालविकस्य खड्गमाच्छिन्नं गौर्जरेण। मालविकेनापि ज्ञातं यथा, 'अनेनैवाहं परिभूतः'। भीतस्तु प्रातर्मिलितस्यापि तस्याग्रे न किञ्चिद् वक्तुमीष्टे। ततो गूर्जरदेशभटेन भाषितः प्रातः, 'भोः पुरुष! तव कानि नामानि?'। मालविकोऽप्यलापीत्, 'यानि नामानि स्वकीयानि मया तुभ्यं प्रतिपादितानि, तानि मातुरुल्लापनकानि, मूलनाम तु 'न किञ्चित्' इति'। श्रुत्वेदं तुष्टो गौर्जरो बभाण, 'इदमेव सत्यम्, इदं नाम चेत्, तर्हि गृहाण तमिमं स्वं खड्गम्। मालविको ललौ कृपाणम्, न तु ललज्जे निर्जीवः॥

॥ इत्यसारपुरुषकथा ॥ ७२ ॥

---

जडश्चिरं विमृश्यापि विदधात्यसमञ्जसम्। अरालवलितानडुच्छृङ्गान्तः कं न्यधाज्जटी॥ १॥

वक्रवलितयोर्वृषभशृङ्गयोर्मध्ये भरटको मस्तकं चिक्षेपेत्युत्तरार्धार्थः। कथा त्वेवम्। गो[2]पालितको नाम ग्रामः। तत्र चतुष्पद्लक्ष्मीबहुलो बहुलो नाम श्रेष्ठी। स च तापसभक्तत्वात् तापसमेकं समाजूहवत्। अतिष्ठिपच्च स्वगृहसंनिधौ गेहे। तस्य च गेहस्यासन्नो गवां वाटको विपुलः। तत्र सायं समागच्छन्ति भूयस्यः सुरभयः, भूयांसश्च वृषभाः; उपविशन्ति च स्वच्छन्दं रोमन्थायमानाः। तत्र गोवृन्दे चैको वृषः पीनः ककुद्मान् महाघण्टः। तस्य च वक्रवलितेऽधिज्यधनुराकारे मिलिताग्रे शृङ्गे

---

[1] ख. निशायां। [2] क. ग. °पालतिलको।

Pu. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्तः । ते दृष्ट्वा दृष्ट्वा सायं सायं रात्रौ रात्रौ चिन्तयति जटी, 'हन्त! यद्यहमेनयोः शृङ्गयोरन्तरे शीर्षं क्षिपामि तदा किं स्यात्?' इति । षण्मासा गताः । तदन्ते चैकदा सायं तस्यैव महोक्षस्य शृङ्गयोरन्तर्मूर्धानमक्षैप्सीत् । क्षोभवशाच्च सहसोत्थितो गोपुत्रः । जटाजूटस्य शृङ्गयोस्तथा तथा विलग्नत्वाद् मस्तकं विच्छोटयितुं न शक्नोति तापसः । अन्दोल्यमानश्च कोकूयते पीडाक्रान्तः । ततो मिलितो लोकः । विच्छोटितः कथञ्चित् । कृतः सुस्थः । उपालब्धश्च, 'न विमृश्येदं त्वया कार्यं कृतम्, येनैवं परिपीडितोऽसि' । अथ क्रोधारुणो जटाभृदूचे, 'षण्मासा विमृशत एव ययुः, कथं ब्रूथ न विमृष्टम्?' । हसन् गतो लोकः ॥

॥ इति यत्तत्कारिभिक्षुकथा ॥ ७३ ॥

---

**एकं तत्किमपि ब्रूते येन ग्राह्यो न जायते । आलं लपन्नपि खलो यथा खालित्यहृद् भिषक् ॥ १ ॥**

पद्मिनीखण्डपत्तने मायावीरो नाम वैद्यः । स एकदा विदेशाय चचाल । प्रयाणके क्वापि प्रातर्नगरस्यैकस्य तटे पर्यटन् पुष्पितं फलितं चिर्भटीकच्छमद्राक्षीत् । तत्र रक्षकः कोऽपि नास्ति । इति निर्भयं प्रविश्य भिषक् चिर्भटानि त्रोटं त्रोटं स्वच्छन्दं भक्षयितुं प्रवृत्तः । अत्रान्तरे समायातः कच्छाधिपतिर्यष्टिपाणिः पितृपतिरिव क्रूरः । ताडितस्तेन वैद्यो दुर्मत्त इव चक्री- ॥ ६२ ॥

---

१ ख. नगरे ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वान् । पादयोः पतित्वा चुच्छोट । चलितः पुराय । प्रविष्टो मध्यम् । नगरान्तर्नगराधिपतिं देवकुलाग्रोपविष्टं बहुपरिकरं दृष्ट्वा तमगमत् । धन्वन्तरेराशीर्वादमुवाद । पृष्टः स्वामिना, 'के यूयम् ?' । तेनोक्तम्, 'अगदंकाराः' । ऊचे स्वामिना, 'किं किं वित्थ ?' । वैद्यो जगाद, 'यज्जगति चिकित्सनीयं तरूणां तिरश्चां नृणां वा तद्वेमि' । नृपेण गृहेऽग्राहि, भोजितः, पूजितो भाषितश्चैकान्ते, 'मम शिरसि यौवनेऽपि टल्लिः पतिता, स्त्रीभ्यो जिह्रेमि, एतां स्फोटय' । वैद्योऽभाषिष्ट, 'इयति किं वाच्यम्, इदानीमेव साध्नोमि यमुनाजलश्यामलं वेणीदण्डम्' । हृष्टः प्रभुरवदत्, 'तर्हि औषधानि मेलय' । वैद्यः प्रभुं तुरङ्गाधिरूढं सहादाय कच्छमगमत्[1] । ताश्चिर्भटीः पश्यतस्तत्पतेः सकन्दा उदपीपटत् । आनिनाय गृहम् । भस्मीचकार । किञ्चित् किलात्मीयमौषधं तैलं च चिक्षेप । आलपच्चेशम्, लगयेदं शिरसि, खालित्यं यास्यत्येव,' 'परं मर्कटो न चिन्तनीयः' इति शिक्षा दत्ता । औषधं लगितम् । खालित्यं सप्तदिनकेऽपि न गतम् । प्रभुः पृच्छति, 'भो वैद्य ! कोऽपि फलोदयो भैषज्ये नैव दृश्यते, किमेतत् ?' । वैद्यो भाषते, 'त्वया मर्कटश्चिन्तितो भविष्यति, संपूर्णे विधौ कार्यसिद्धिर्नासंपूर्णे' । स्वामी मौनेन स्थितः । अचिन्तयतापि हि चिन्तित एव मर्कटस्तेन । वैद्यस्तु चिर्भटीपालस्य पार्श्वे गत्वा जगाद, 'रे त्वयाऽहं कुट्टितः, मया ते सर्वस्वं गमितम्' । कच्छपतिः पादयोर्लग्नः । वैद्यो देशान्तरमगात् । विविधयुक्तिभिर्जग्रसे लोकः ॥

॥ इति धूर्तवाग्वैचित्रीकथा ॥ ७४ ॥

---

१ ख. °र्च्छपम° ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यत्तत् प्रजल्पतः कार्यसिद्धिर्भवति पुण्यतः । 'कडुआ-बडुआ-सोही' भाषणे श्रेष्ठिचन्द्रवत् ॥ १ ॥

पुष्पपुरे चन्द्रश्रेष्ठी । स प्रकृत्या वदान्यो महाजनप्रियः कारुणिको जैनमुनिसेवाहेवाकी । तत्रैव पुरेऽरिमर्दनो राजा प्रजानां पाता । एकदा तत्र पुरे द्वौ भ्रातरौ राक्षसौ कडुआ-बडुआभिधानौ, एका च तद्भगिनी सोहीनाम्नी उपतस्थिरे । संमिलिताश्च गृहे गृहे मानुषाण्यधिष्ठाय रोगमुत्पाद्य धातूनदन्ति । अथ म्रियते लोको वराकः । राजापि प्रजाकृच्छ्रेण पीडितः । अन्यदा सदसि राज्ञाऽऽदिष्टम्, 'यः कश्चिद् मे नगरक्षयकारणं सम्यग् मां ज्ञापयित्वा तत्प्रतीकारमाचरति, तस्य स्वकीयं भाण्डागारं मुत्कलं कारयामि' । तच्च नृपवचनं तत्रोपविष्टेन राजवल्लभेन श्रेष्ठिचन्द्रेण शुश्रुवे । आगात् श्रेष्ठी निजं धाम । श्रेष्ठिना च गतदिने तिलाः शिशूनां सुखभक्षिकार्थमानीताः सन्ति । तान् शिशवो भक्षयन्ति, भ्रमन्ति स्वैरम् । अत्रान्तरे श्रेष्ठिकुटुम्बभक्षणार्थमागता द्वारे कडुआ-बडुआ-सोहिआः । पुण्याधिष्ठिते तत्र सद्मनि प्रवेष्टुं न शक्नुवन्ति सहसा । विलोकयन्ति तु प्रवेशावकाशम् । इतश्च मध्यापवरकस्थः श्रेष्ठी बालकेनैकेन बभाषे, 'तात ! कडुकाः कर्कराकुलाश्चैते तिलाः कथं भक्ष्यन्ताम् ?' । ततः श्रेष्ठी सरोषं परुषमाह प्राकृतभाषामाश्रित्य, 'कडुआ-बडुआ-सोही खाहि' इति पुनः पुनरुच्चैःस्वरम् । एतच्च वचस्तैर्बहिःस्थैः श्रुतं, न तु बालवचनम् । बालो हि मन्दवाक्, वृद्धस्तु तारस्वरः । श्रुत्वा च पर्यालोचितं मिथः, 'अहो आश्चर्यम्, अदृश्यरूपतयाऽऽगतानां देवजातीयानामस्माकमागमनं[2] नाम च जानाति, ततोऽयं त्रिकालदर्शी कश्चिदनुमीयते, अन्यथा

२ क. ग. °गमं ना° ।

Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मन्त्रशक्त्यादिना निग्रहीष्यति' । एवं श्रेष्ठिपुण्योदयादात्मभयव्यथितास्ते सहसा समेत्य तस्य पादयोर्लग्ना रूपमदीदृशन्, उक्तं च, 'कथमस्मान् विगोपयसि, ते वयं कडुआ-बडुआ-सोहिनामानस्तव दासाः स्मः, मा मोच्चैर्भाषिष्ठाः' । एवं श्रुत्वा वार्तापारम्पर्यं ज्ञात्वा शठतया हसन्नगादीत्, 'न मुञ्चामि वो जीवमानान्' । पुनः पुनस्तेऽनुनयन्ति । ततः श्रेष्ठिनाऽभाषि, 'एकदा राज्ञे दर्शयिष्यामि वः, पश्चाद् मोक्ष्यामि, न हनिष्यामि, अभयं वः' । दक्षिणहस्तं दत्त्वा नीत्वा राज्ञः पार्श्वं भाषिताः । दर्शितं तद्रूपं राज्ञे । प्रेषिताः सर्वे । चमत्कृतो नृपः । तच्छक्त्या जातो मुत्कलोऽर्थकोशः । स्तौति स निर्भयीकृतस्तं लोकः । प्रससार विश्वे यशः शुभ्रम् ॥

॥ इति पुण्योत्कर्षाद् वाक्प्रभावोच्छेदे कथा ॥ ७५ ॥

---

कार्यतात्पर्यमज्ञात्वा ये वदन्ति विदां पुरः । ते हासपात्रं तेषां स्युर्यथा स भगिनीपतिः ॥ १ ॥

कलिवर्धनपुरे मलयकेतुर्नाम गृही निरक्षरशेखरः फल्गुभाषी । स चासन्ने वेलापुरे परिणीतः । कदाचित् पत्नीं ग्रहीतुं श्वशुरकुलमयासीत् । तत्र च स्नानविलेपनभोजनादिभिर्गौरवितः । तस्य च पञ्च शालकाः सन्ति गीतज्ञाः । भगिनी तु तेषां सविशेषं नादस्वरज्ञा । अतिक्रान्ते दिनद्वये तैः शालैर्मन्त्रितम्, 'अयं भगिनीपतिर्वर्णान् वेत्ति नवा'इति परीक्षामहे । श्वः पञ्चमरागमालपिष्यामः' । तच्च श्रुतं स्वस्रा । ततो ज्ञापितो भर्ता, 'श्वोऽमी पञ्चमरागेण गास्यन्ति, त्वं तमेव ब्रूयाः, सावधानो

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भवेः, अन्यथा हसिष्यसे'। ज्ञातं तत्तेन। द्वितीयदिने गातुं प्रक्रान्तं तैः पञ्चमरागेण। पृष्टश्च भगिनीपतिः 'कोऽयं रागः ?'। तेनोक्तं, 'पञ्चमः' इति। उत्थिता सभा। दूरे गत्वा तैः पुनः सूत्रितम्, 'मन्यामहे, ह्यस्तनीमस्मद्वार्तां श्रुत्वाऽस्मदीयया भगिन्या संज्ञापितः, एवमुपहासभीरुत्वात्; तस्माद् भाविनि दिने धान्यश्रिया रागेण गास्यते; न चेदमस्मद्भगिन्या श्रुतम्, अनुक्तं च तया प्रायो नासौ ज्ञास्यति, इति हासः सुलभ एव'। इति मन्त्रे जाते द्वितीये घस्रे मिलितायां पर्षदि समागतायां भगिन्यां धान्यश्रिया तैर्गातुमारेभे। भाषितो भगिनीपतिः, 'कथय, कोऽयं रागः ?'। तेनोक्तं, 'छट्ठो'। जहसुस्ते। जगदुश्च, 'छट्ठनामारागः क्वापि केनापि न श्रुतः'। ततः श्मश्रुमोटनपूर्वं भाषितं मूर्खराजेन, 'धिग् मूढाः !, भोः ! गतदिने पञ्चमश्चेत्, अद्य कथं न षष्ठः ?'। ततस्तत्पत्न्या लज्जमानया पुरो भूत्वा धान्यश्रीरागाद्यक्षरोपलक्षणार्थं स्थाली समुत्पाटिता। ततो जाल्मशक्रेण बभाषे, 'भोः ! पूर्वमविमृश्योक्तम्, नायं षष्ठो रागः, किन्तु 'तोलडो''। सर्वे हसन्ति, 'कुतस्त्वया तोलडरागो विविदे ?'। तेन प्रोचे, 'भवतामेव भगिनी वक्ति, पश्यत पश्यत, संकेतयन्ती दृश्यते'। दृष्टा तैः पाकस्थाली चालयन्ती भगिन्या। ज्ञाततद्भावैः सविशेषमुत्प्रासितः, 'अहो ! नादविद्यातुम्बुरुर्भगिनीपतिः ॥

॥ इति कुवक्तुर्हस्यत्वे कथा ॥ ७६ ॥

---

१ क. ग. वो। २ ख. °गप्रथमाक्ष°।



P.P. Ac. Gunratnasuri M.S.    Jun Gun Aaradhak Trust

रहस्यं नैव वक्तव्यं कस्यचिन्मतिशालिना । अनुक्ते स्यान्महास्नेहः पतिपत्न्योर्यथा तयोः ॥ १ ॥

काञ्चनपुरे सकलनामा श्रेष्ठी चिद्रूपः । तत्पत्नी सलक्षणानामा । तत्पुत्री निजरूपोपहसितसुरसुन्दरी सुरसुन्दरिका मदनमञ्जरी नाम । सा यौवनस्था परिणिन्ये श्रीपुरवास्तव्यवसन्तध्वजश्रेष्ठिसुतेन मकरध्वजेन । कदाचिदागता श्वशुरकुलात् पितुर्गृहम् । तत्र लुब्धा परपुरुषेषु नेच्छति पतिगृहगमनम् । अथान्यदा तदानयनाय तत्पतिः काञ्चनपुरमाजगाम । स्थितो दिनान् पञ्चषान् भोजनाच्छादनादिभिः सुखी । अनिच्छन्त्यपि सा प्रेषिता तेन समं मातरपितराभ्याम् । अतिक्रान्ते प्रयाणकत्रये समागतः कूपः । तत्र च्छोटिता वाहिनी । मुक्तौ चरणाय बलीवर्दौ । प्राप्तः श्रेष्ठी कूपान्तिकम् । अथ तेन रज्ज्वा बद्ध्वा क्षिप्ता करपत्रिका जलहरणार्थम् । अत्रान्तरे पर[2]पुरुषलुब्धत्वात् पुनः स्वगृहं यियासन्ती सा भर्तारं पृष्ठे स्थिता प्रेर्य कूपान्तरेऽपीपतत् । तरणनिपुणतया च तन्मध्यवर्त्तिनं निरुपद्रवं प्रदेशमाश्रित्य स्थितः । एवं पतिद्रोहं कृत्वा पादचारेण सा गता पितुर्गृहम् । पृष्टा च मातापितराभ्याम्, 'किमित्येकाकिन्येव त्वमायाता ?' । तयोक्तं, 'मत्पतिश्चौरैर्गृहीतः' । अतोऽहं पलाय्य महाकृच्छ्रेणागता स्वगृहम् । इतश्च सा वाहिनी सबलीवर्दा निःस्वामिकत्वाल्लुण्टाकैर्गृहीता । अतिक्रान्तेषु कियत्स्वपि यामेषु पथिकाः केऽपि पानीयानयनाय तं कूपमीयुः । तैः करुणारसपरैः समाकृष्य मुक्तो बहिर्मकरध्वजः । अथ सोऽपि श्रीपुरे स्वमन्दिरं गतः । पृष्टः पितृभ्याम्, 'वत्स ! किमेकाकी समेतोऽसि ?' । सोऽप्याह, 'मार्गे चौरोपद्रवाद् वाहिन्यादिकं

---

१ ख. °न्दरी सुरसुन्दरी ना° । २ क. ग. °रनरलु° ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गतम्, वधूर्वः पलाय्य क्वापि याता, न वेद्मि, अहं त्वेकाकी भवतां समीपं प्रापम्'। ततो वसति सुखं मकरध्वजः।

अथातिक्रान्ते वर्षद्वये पुनरपि तां भार्यामानेतुं गतो मकरध्वजः। नमस्कृतौ श्वश्रूश्वशुरौ। पृष्टः स ताभ्याम्, 'व्रजतोऽत्रान्तराले तदा तव किं संवृत्तम्?'। तेनाप्यभिदधे, 'तस्करोपद्रवो जातः'। अत्रावसरे मदनमञ्जर्या चिन्तितम्, 'भव्यमुत्तरं सूत्रितम्, मद्धृदयमनुप्रविश्येवायमूचिवान्, नास्त्यतः परो गम्भीरहृदयः, नाहं विगोपिता, अद्यप्रभृत्यहं दासीव सेवां करिष्यामि, मनसाऽप्यहितं न चिन्तयिष्यामि'। अथ सा पित्रोरनुज्ञया स्वेन पत्या सह गता श्वशुरगृहम्। परमेण प्रेम्णाऽऽराधयति सहचरम्,—तथाहि; भुक्ते भुङ्क्ते, शयिते शेते, अजागरिते पत्यौ शय्यां मुञ्चति, वाचं न खण्डयति, 'जीव' 'आदिश' इत्यादि वदति। क्रमेण जातान्यपत्यानि भूयांसि। प्रसृतं यशः। प्रससार कुलम्। मकरध्वजो निजहट्टे तिष्ठति।

अन्येद्युर्गोरूपाणि श्रेष्ठिनः क्षेत्रान्तः प्रविष्टानि विविधधान्यानि भक्षयन्ति। निवार्यमाणान्यपि तत्सुतैर्न निवर्तन्ते। ते निर्विण्णाः स्वपितरमूचिरे, 'तात! गोरूपस्वामिनां प्रत्येकमुपालम्भो दीयते, यथा प्रसङ्गो निवर्तते'। अथ श्रेष्ठी जगाद, 'हंहो वत्साः! उक्तादनुक्तं वरम्'। एवं बहुषु वादस्थानेषु तदेवाह। एकदा पुत्रैः पृष्टम्, 'तात! कोऽस्य वाक्यस्य भावार्थः, प्रसद्य ब्रूत? यदा यदा कोऽपि किञ्चिद् वादपदं वदति तदा तदा यूयं वदथ, 'उक्तादनुक्तं वरम्', ध्रुवमस्तीह निगूढं किञ्चिद् बीजम्'। ततस्तातः प्राह, 'वत्साः! उक्तादनुक्तं वरम्'। पुनस्ते प्राहुः, 'तात! पुनस्तदेव निगद्यते'। तातो न तन्मर्म कथयति। ततस्ते लङ्घयितुं प्रवृत्ताः। गतं दिनद्वयं, पुनर्बोधितास्ते, 'रे वत्साः! कथिते महान् वः परितापो भावी, मा पृच्छत'। पुन-





P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

र्विलग्नास्ते 'ब्रूत ब्रूत' इति। ततस्तातेन ते रहस्तां कथां कूपक्षेप-पुनःपत्नीरञ्जन-संतानवृद्ध्यादिकं ज्ञापिताः। ततो ज्ञातवृत्तान्ताः शीतीभूतहृदया बुभुजिरे। अतिक्रान्ता दिनाः केऽपि। तेषां पुत्राणां मध्यादेकेन माता विज्ञप्ता, 'मातः! किं कदाचित् त्वया तातः कूपे क्षिप्तोऽभूत्?' । अथ तयाऽनन्यगोचरतथाविधरहस्यभेदभिदेलिमप्रायहृदा भाषितोऽसौ पुत्रः, 'वत्स! केनेदं तवोक्तम्?'। सोऽप्यगम्भीरतया तां कथामाचख्यौ, यथा, 'एवमेवं पुत्राणामत्यादरात् तातेनोक्तम्' इति । ततः स्थिता सा मुषितेव, मृतेव, जटीभूतेव सुप्ता मध्ये गत्वा। अत्यन्तलज्जया विदीर्णं हृदयम्। गतो याम एकः । भोजनादिक्षणे यावद् विलोक्यते सा तावत् पक्वैर्वारुवद् विदीर्णहृदया मृता दृश्यते । तत्रागत्य स्वयमालोक्य श्रेष्ठी जज्ञौ, यथा, 'असौ मन्निवेदितरहस्यवशाद् मृता तपस्विनी, हा हतोऽस्मि जीवन्नपि, क्वेदं पुनः कलत्ररत्नं संपत्स्यते? क चेदं पातकं तीर्थे निस्तरीतव्यम्? कस्य वा गुरोः पुरो दुष्कृतमिदं प्रकाश्यम्? किमूर्ध्वं मुखं लात्वा क्वापि गच्छामि? किं कूपे पतामि,? किमसिना स्वं छिनद्मि? किं गिरिशिखरमारुह्यात्मानं पातयामि?' इति विमृशन् मुमूर्च्छ। शीतोपचारलब्धचैतन्यस्तारं तारं विलपितुं प्रवृत्तः। मिलिताः पुत्राः। निषेद्धुं यावदग्रे भवन्ति तावज्जगाद मकरध्वजः, 'रे मूर्खाः! युष्माकमेवेयं मातृहत्या, भवद्भिरत्याग्रहं कृत्वा रहस्यभेदं कारयद्भिः पापैः पातितोऽहमनर्थके, पातके स्वात्मा च बोलितः, जीवयतेमां यदि शक्तिरस्ति, सलज्जेयं वराकी, या मर्मभेदे कृते लज्जया म्रियते, निर्लज्जस्त्वहम्, योऽद्यापि अश्रूणि मुञ्चामि मायावी, न तु म्रिये' इत्यादि भाषमाणस्तीर्थं गतः। पुत्रास्तु मातुरौर्ध्वदेहिकादिकं कृत्वा शनैः शनैः शोकं तत्यजुः, धर्ममाचर्य स्वर्ययुः। इयं च सूत्रानुसारतः पति-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पत्योः स्नेहवृद्धिं यावत् कथयितुमर्हा, शेषं प्रसङ्गतो लिखितम् ॥

॥ इति रहस्याप्रकाशने दम्पतिस्नेहकथा ॥ ७७ ॥

---

केचित् फलन्त्यनुदिनं कार्यसारकपालवत् । वाङ्मात्रसारास्त्वपरे वावदूककपालवत् ॥ १ ॥

हारपुरे[1] नगरे कश्चिद् राजपुत्रो वसति द्यूतव्यसनी भक्षको निर्धनः । द्रविणे व्यसनबाहुल्यादपूर्यमाणे लकुटं स्कन्धे क्षिप्त्वा चचाल, 'यत्र तत्र धनमर्जयिष्यामि' इति धिया । क्रमादटवीमेकां पर्यटन्नुद्वसग्राममेकं गतः । तत्समीपे चिरादेवताप्रकोपेन मृतानां मनुष्याणां भूयसीः करोटीः पतिताः प्रेक्ष्य क्रीडया लकुटेन भङ्क्तुमारेभे । करोटीषु कियतीषु भग्नासु महर्द्धिकदेवताधिष्ठिता सुलक्षणैका करोटिरखण्डा यावत्किल तेन भङ्क्ष्यते तावदवादीत्, 'भो भोः ! मा मां भाङ्क्षीः, तुभ्यं पञ्च पञ्च शतानि दीनाराणां प्रतिदिनं दास्यामि' । एवं श्रुत्वाऽसौ जलधरधाराप्रहतकदम्बकुसुमस्थूलपुलककोरकितगात्रयष्टिस्तुष्टमनास्तां करोटिं जग्राह । 'सिद्धं साध्यम्' इति ब्रुवन् क्वचन सरसि जलेन प्रक्षाल्य वनकुसुमैः प्रपूज्य प्रणम्य वाससाऽऽवेष्ट्य हारपुरं प्रति पुनः संचचारासौ । तत्तद्भोगमनोरथप्रथमानमानसः प्राप्तस्तत्र पुरे । तस्मात् कपालात् प्रतिदिनं दीनाराणां पञ्चशतीं प्राप्नोति । ततो मकरध्वजसंजीविन्याः पत्रलेखायाः पणाङ्गनाया हरिणनेत्राया गृहेऽवात्सीत् । तत्र भुनक्ति विविधान् भोगान् । तत्कपालं

---

१ क. ग. °पुरन° ।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दिव्यकरण्डिकायां स्थापयित्वा वेश्याजनदृष्टिपरिहारेण सावधानो नित्यमर्चयति, 'अत्र मम देवतावसरे केनापि न स्प्रष्टव्यम्' इत्यादरेणादिशति च । गताः कियन्तोऽपि मासाः । एकदाऽक्कया पत्रलेखा भाष्यते स्म, 'वत्से ! नरेन्द्रसेवाक्रयविक्रय-धातुवादादिभिर्विनाप्यसौ धनमेवं[1] व्ययति, कुतोऽर्जयति ?, सविस्मयं मे हृदयम्, किमस्य चिन्तामणिस्तुष्टः ? किंवा देवता क्वापि प्रसन्ना ? इति पारम्पर्यं प्रश्नतो निर्णीय मां ज्ञापयेः' । सापि विकटभ्रकुटीभङ्गतरङ्गितनयनं प्रत्युवाच, 'तव किमनया[2] चिन्तया ? धनेन कार्यं न तु तत्प्राप्तिचर्चया' इति रोषादभिदधाना सा जगाम गजगामिनी । पुनःपुनस्तया प्रेर्यमाणा रहः कदाचिदेनं पप्रच्छ, 'कुतस्ते व्ययभरसहधनप्राप्तिर्विना प्रयत्नम् ?' इति । सोऽपि च विश्वासादकथ्यमपि तत् कथञ्चित् तथ्यमेवोक्तवान्, यथा; 'कपालमेकं दीनारपञ्चशतीं ददाति प्रतिप्रातः, तत्तु मेऽत्रैव देवतावसरकरण्डिकायामस्ति' । पत्रलेखापि तां वार्तामक्कामजिज्ञपत् । सापि जरन्मार्जारीव परद्रोहपण्डिता कपालमेकं यत्तत् कुतश्चिदानाय्य तत्र क्षिप्त्वा तत् तात्त्विकं कपालमादायान्यत्र गुप्तस्थाने मुमोच । द्वितीयदिने कपालाद् याच्यमानं धनं नाप्नोत्यसौ । स्थितो विलक्षो, दध्यौ च, 'वञ्चितोऽस्मि दुरात्मिकया,

"सप्ताप्येतानि वेश्यासु नरस्य हरते रतिः । प्रतिष्ठा सुकृतं वित्तं कुलं शीलं बलं यशः ॥ १ ॥

उपभुक्तखदिरबीटकरक्ताधरदन्तरङ्गभङ्गभयात् । पितरि मृतेऽपि हि वेश्या रोदिति हा ! तात ! तातेति ॥ २ ॥"'

---

१ क. ग. °मेवमर्जयति कु° । २ क. ग. °या धनचि° ।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पुनः सचिन्तस्तमेव ग्रामं मनसिकृत्य चचाल । प्राप्तश्च तत्र । ददर्श च तथैव ताः करोटीर्भङ्क्तुं प्रावृतत् । लब्धास्वादो हि तत्र सः । भग्नेषु केषुचित्कपालेषु बिभङ्क्षितेनैकेन प्रोचे, 'मा मां चूरय, दास्ये तवेष्टम्' । तेनापि तत् श्रुत्वा सत्यमसत्यं वा विवेक्तुं भणितम्, 'दीनारपञ्चशतीं देहि' । कपालेनाभिहितम्, 'गृहाण सहस्रं भो राजपुत्र !' । इतस्ततो गवेषयन् दीनारानपश्यन्नाह स, 'कुतस्ते ?' । कपालमाललाप, 'अहं वाक्सारेण दैवतेनाधिष्ठितं कुलक्षणं वाङ्मात्रसारं[1] कपालम्, यावत् 'कोऽपि किमपि याचति तद्द्विगुणं ददामि' इति वच्मि, 'न तु ददे' । 'अनेनापि कार्यं मम सेत्स्यति' इति निर्णीय राजपुत्रस्तदादाय हारपुरं जगाम । इष्टानां मित्राणां पार्श्वाद् दीनारसहस्राण्येकद्वान्युद्धारेण गृहीत्वा पुनस्तदेव पत्रलेखासद्मागात् । पूर्वस्थित्या देवतावसरकरण्डिकास्थं तन्नवं वाक्सारं कपालं सर्वपरिजनसमक्षमक्षामप्रतिक्रिययाऽनर्च, 'हस्तौ संयोज्य दीनारपञ्चशतीमयाचीत् । कपालेनोक्तम्, 'सहस्रं गृहाण' । पूर्वं तत्रैव स्वयं न्यस्तं दीनारसहस्रं हस्तलाघवेन ललौ । तद् दृष्ट्वा तत्रस्थाः स्त्रियः सर्वाश्चमच्चक्रुः, 'अहो ! पूर्वस्मादपि सविशेषप्रभावं कपालमेतत्, धन्योऽयमेतत्प्रभुः' । वृद्धया तं वृत्तान्तं ज्ञात्वा पुनरप्यूचे पत्रलेखा, 'वत्से ! अस्य दृशं वञ्चयित्वा नवीनं गृहाण, प्राक्तनमत्र करण्डिकायां मुञ्च' । पत्रलेखाप्यूचे, 'अवसरे करिष्यामि, मोत्सकीभूः' । एकदा राजपुत्रेऽन्तर्नगरं भ्रमणाय गते प्राच्यं तत्र मुक्त्वा नवीनं लात्वा कृतकृत्या तस्थौ लोभिनी सा । राजपुत्रस्तु यामद्वयं पुरि भ्रमित्वा पुनस्तद्गेहमागात्, यावद् गत्वा गवेषयति तावत् तदेवाग्रेतनं तत्रा-

[1] ख. °त्रशूरं ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

द्राक्षीत् । दृष्ट्वा च 'दिष्ट्या तदेवेदं दृश्यते, नवीनं तु गणिकया हृतम्, हृदय रे नृत्य नृत्य' ।

"[1]वेलामहल्लकल्लोलपिल्लियं जइवि गिरिनईपत्तं । अणुसरइ मग्गलग्गं पुणोवि रयणायरं रयणं ॥ १ ॥"

इति हर्षादचिन्तयत् । तां च रजनीं प्राग्वत् तया यौवनमत्तया मदिराक्ष्या सह स्रक्चन्दनाङ्गरागादिभोगाङ्गचङ्गाङ्गरङ्गदनङ्गाङ्गसुखमवात्सीत् । जाते प्रभाते तत् तात्त्विककपालं लात्वा तत्रैव नगरे मित्रस्यैकस्य वासमध्युवास । उदिते च जगच्चक्षुषि स्नाता सद्वस्त्रा सद्विलेपनाऽक्का तत्कपालं प्रपूज्य दीनारपञ्चशतीं द्विगुणप्राप्त्याशयाऽयाचीत् । तत्तु अवक्, 'गृहाण सहस्रम्' । वक्ति न तु किञ्चिद् दत्ते । कुट्टिन्याह, 'क्व तत् ?' । कपालमूचे, 'अहं वावदूकं कपालं, न तु द्रव्यसारम्' । कुट्टिनी पश्चात्तापेन देहे देहे । पुनः कदाचित् तं वीरं पुरि भ्रमन्तं दृष्ट्वा चाटुगर्भमाह्वयत् । असौ पुनराचख्यौ, 'ज्ञातं ते तत्त्वम्' । ततः कुट्टिन्यगादीत्, 'मया मायया जगज्जग्रसे, त्वं तु मत्तोऽप्यधिको, येनैवं वञ्चितास्मि' । ततो भटः प्रस्फुटमुज्जगार, 'किं न श्रुतं त्वया, '[2]रक्खसाणंपि रक्खसा चिट्ठंति' । विलक्षं हसित्वा गताऽक्का । वीरस्तु भोगान् भुक्त्वा विरक्तश्चिरात्

"मुञ्चन्ति विषयग्रामं स्वयमेव मनीषिणः । अमुञ्चन्तोऽपि मुच्यन्ते विषयैर्बालिशाः पुनः ॥ १ ॥"

इति ध्यायन् योगविधिना सिद्धिमारुरोह ॥

---

१ वेलामहाकल्लोलप्रेरितं यद्यपि गिरिणदीप्राप्तम् । अनुसरति मार्गलग्नं पुनरपि रत्नाकरं रत्नम् ॥ १ ॥

२ राक्षसानामपि राक्षसास्तिष्ठन्ति ।

Pu. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

॥ इति कपालद्वयकथा ॥ ७८ ॥

बिभेति स कथं कृच्छ्राद् यः स्यादास्वादलम्पटः । खादिष्यति करम्बं यो विडम्बं स सहिष्यति ॥ १ ॥

चमरपुरे[1] भुवनपालः श्रेष्ठी । तस्य बहुमनोरथैर्जातः सुतः बङ्गालदेवः । अङ्कादङ्कं संचरन् ववृधेऽसौ । क्षिप्तो लेखशालायां भूयिष्ठं वाङ्मयमध्यगीष्ट । पण्डितेन प्रत्यर्पितः पितुः । 'व्युत्पत्तेः परमामवस्थां मयाऽधिरोपितः' इति भणित्वा परीक्षितः समस्या-बिन्दुच्युतकादिप्रश्नेषु । तुष्टः श्रेष्ठी भूरिणा भूरिणा सत्कृत्य पण्डितं व्यसाक्षीत् । अथैकान्ते निवेश्य श्रेष्ठी सुतमवादीत्, 'वत्स ! स खलु सर्वज्ञो यो व्यवहारज्ञः, ततः कत्यपि व्यवहारपदानि मन्मुखेन श्रोतुमर्हसि' । स्थितः सावधानो योजिताञ्जलिः शुश्रूषुस्तनूजः । अथाह श्रेष्ठिश्रेष्ठः, 'वत्स ! बहुभिरपि मूर्खैस्तत्त्वनिर्णयो नास्ति' । अत्रार्थे

तपस्विनः कथा ।

सा चेयम्; 'क्वापि पुरे मठोऽस्ति । तत्र त्रयस्तापसा ऐयरुः । स्थिताश्चिरकालम् । एकदा यामिन्यामेक उत्थितो गगनं गरलगवलश्यामजलदान्तर्द्योतमानविद्युत्पुञ्जं दृष्ट्वा शेषौ द्वावपि सतीर्थ्यावाहूयादीदृशत्, यथा, 'पश्यत भोः ! स्वर्गे प्रदीपनं

[1] ख. चर्मपु° ।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

लग्नम्, तत एव ज्वालाधूमयोगः' । द्वितीयेनोक्तम्, 'सूर्योऽत्रास्ते, स च शीतभीतः श्यामवस्त्रकन्थामितस्ततः कारं कारं पश्यति, 'अद्यापि विभातं किंवा न विभातम्' ' । तृतीयस्त्वाह, 'अहमेवं मन्ये, 'दैत्योत्पातविधुरे देवलोके महेन्द्रोऽग्निकर्मप्रधानं शान्तिकं कारयन् वर्तते' ' । एवंविधं विचारयन्तस्तत्त्वमजानन्तस्ते कञ्चित् पण्डितमप्राक्षुस्तदेव, यथा, 'किमेतत् ?' । सोऽप्याह, 'विद्युन्मालाशाली जलदोऽयम्' । इत्येका कथा ।' 'किञ्च अतिपाण्डित्येनापि वत्स ! परिभूयन्तेऽव्यवहारज्ञाः । तत्र

## पठितमूर्खकथा ।

तथाहि, लेखशालिकामात्रपरिचयी क्वापि पुरे कोऽपि पण्डितपाशः । स च देवपूजार्थं वाटीं पुष्पपत्रार्थी गच्छंस्तलारक्षेण बभाषे, 'क्व भोः ! यासि ?' । सोऽप्याह, 'परस्त्रीग्रहणाय यामि' । तेन हि 'पत्रीशब्दो रूढः, किमनेन ?, ततो विशेषशब्दं प्रयुञ्जे' इत्याशयादूचे । रुष्टस्तलारक्षः । छिन्ना नाशा । ततो लोके रूढम्, 'अतिसंस्कृतेन विनष्टम्' इति ।

तथा, परपृच्छां विना स्वबुद्ध्यैव जडः कार्याणि कुर्वंस्तापसशिष्यवत् पापकीर्त्योर्भाजनं भवेत्' । बङ्गालदेवः साह, 'तात ! कोऽसौ तापसशिष्यः ?' । भुवनपालः प्राह;—

---

१ ख. शीतीभूतः ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

'वत्स ! पूर्वं शृङ्गारपुरे तापस एकः कुब्जकः पृष्ठे निःसृतकुढको नताङ्गस्तिष्ठति । तस्य विनेय एको वैधेयः । स एकदा नगराद् बहिर्गतः सन् गङ्केटिकायष्टिं गोपालैर्वह्निना ताप्यमानां ददर्श । पप्रच्छ च, 'किमेतद् भवद्भिः क्रियते ?' । तैरुक्तम्, 'वक्रां यष्टिं वह्नितापेन सरलीकुर्वन्तः स्मः' । इदं श्रुत्वा मठमायातः । दध्यौ च यथा, 'गुरोरिदं पृष्ठं वह्नितापेन सरलयिष्यामि, यष्टिवत्' । इति ध्यात्वाऽग्निमानीय संदीप्य गुरोर्गलेपादिकया सग्रहीकृतस्य तावत् पृष्ठमतीतपद् यावद् गुरुः पूत्कारं पूत्कारं मृतः । जातः शिष्योऽपि पापयशसोः पात्रमिति ॥

'वत्स ! विषमाणि कार्याणि भीरुणा मा समारभत । ते हि भयेन विह्वलत्वाद् बुद्धेर्भ्रश्यन्ति, चिर्भटपुरुषवत् । तथाहि; क्वापि पुरे गृहस्थ एको निशि शयितोऽस्ति गेहे खट्वायाम् । निशीथे चागत एकस्तस्करस्तद्गृहे । तेन 'जागर्ति शेते वाऽयम्' इति ज्ञातुं हस्तस्थेन दृढेन चिर्भटेनाजघ्नेऽसौ । भग्नं चिर्भटम् । प्रसृतं जलं तदङ्गे बीजानि च । जागरितोऽसौ सहसा महाभयभ्रान्तः पत्नीमाह, 'रे पत्नि ! जागृहि जागृहि, चौरेणाहं कृपाणेनाहतः, न केवलं रुधिरं निःसृतम्, कीटका अपि पेतुः' । स हि रसस्य रुधिरत्वं बीजानां च कीटकत्वं परिकल्प्येदं जजल्प । गतश्चौरः 'किमस्य रङ्कस्य हृतेन धनेन ?' इति[2] ।'

पुनः श्रेष्ठ्याह, 'कुलदीपक ! यस्य सद्यस्कमुत्तरमुत्पद्यते स देवानपि वशंवदीकुरुते, किं पुनर्नरान्, वैष्णवीनारीवत्' । पुत्रः पृच्छति, 'का सा ?' । ततो ब्रूते, 'वत्स ! आकर्णय;—

---

१ क. ग. तपस्व्येकः । २ ख. °ति रङ्कवणिक्कथा ॥ ८१ पु° ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कर्णिकारपुरे क्वचिद् महाप्रसादे साधिष्ठानोऽस्ति मुकुन्ददेवः । तत्र विचित्रपूजापरो लोकः । वर्षारात्रे च बह्व्यो रमण्यो मासोपवासं कुर्वन्ति । तासु पुनः शुद्धव्रता भूयस्यः । एका तु जीविकामात्रप्रिया पाखण्डिका रात्रौ चूरमकं[1] चर्वति । एकदा तथा दृष्ट्वा जातकुतूहलेन हलधरबान्धवेनोक्तम्, 'भद्रे ! मायाविनी त्वम्, यज्जिह्वया मासोपवासं प्रकाशयसि, रात्रौ तु यथेष्टं मिष्टान्नानि भक्षयसि' । ततोऽसौ प्रत्युवाच, 'देव ! यादृशः स्वामी, सेवकैरपि तादृशैर्भवितव्यम्' । गोविन्दो जगाद, 'कथमहं मायावी ?' । वैष्णवी स्त्री जजल्प, 'त्वं वर्षारात्रे 'अहं शये' इति प्रकाशयसि, निशि तु लोकस्य चरितानि द्रष्टुं जागर्षि; 'अन्यत् क्रियतेऽन्यदुच्यते' एतदेव मायावित्वम् । ततो मृषावादिनः सेविन्यहमपि मृषावादिनी युक्तमेवाऽऽसे' । इदं श्रुत्वा हरिस्तुष्टः । तस्यै च मनोवाञ्छितां विभूतिमदत्त' इति ।

'देवतानां प्रभूणां गुरूणां च पुरः पुत्रक ! मितं सारं च ब्रूयात्, कलेश्वरीसेवकवत् । तथाहि; कश्चिदन्धो नेत्रार्थी कलेश्वरीं तपोजपध्यानपुष्पपूजादिभिराराध । तुष्टा साऽसौ प्रत्यक्षीभूय जगाद, 'वत्स ! प्रसन्नाऽस्मि, याचस्व यथेच्छमेक-वाक्येन' । ततः स प्राज्ञोऽवदत्, 'देवि ! यदि प्रसन्नाऽसि, तदाऽतो मां तथा कुरु, यथाऽहं सुवर्णरत्नस्थालैर्निजपुत्रपौत्रान् भुञ्जानान् पश्यामि' । एतावता धनाढ्यता–चिरजीविता–सलोचनता–संतानादि सर्वं याचितम् । तुष्टा देवी तत्तथैव रचयाञ्चकुषी ।'

---

१ ख. चौरिमकं ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

‘वत्सक ! मा स्मैतानि वाक्यानि मे विसार्षीः, व्यवहारपथे सम्यक् प्रवर्तेथाः’ इति पितुर्वचनं श्रुत्वा तत्त्वं ज्ञात्वा बङ्गालदेवः कुटुम्बभारं धरन्नास्ते । पिता मृतः । जातो बङ्गालदेवः कुटुम्बदेव[1]ः । पालयति त्रिवर्गम् । न वक्ति परुषं वचः । तस्य च द्वे पत्न्यौ चण्डा-प्रचण्डानाम्न्यौ । ते पुनरन्योन्यं कलहायमाने स्तः । भज्यतेऽसौ तयोः कलिकोलाहलेन । तत्र च नगरे एका नदी नित्योदका वर्तते । तस्याश्चार्वाग्भागे एकः पाटकः, द्वितीयस्तु पराग्भागे । तेन च चण्डार्वाग्भागे स्थापिता, प्रचण्डा तु पराग्भागपाटके आसिता । एकैकं दिनं द्वयोरपि सदनयोर्भोजनविलेपनादिभिः सुखं वसति । कस्मिन्नप्यवसरे प्रचण्डाया गृहे द्वे दिने अवात्सीत् । तृतीयदिने चण्डायाः सद्म मनसिकृत्य प्रचण्डाया गृहादचालीत् । यावत् तद्गृहद्वारमागात् तावत् सा किमपि ढुण्ढणकादि खण्डयन्त्यासीत् । तं च दृष्ट्वा वारकोल्लङ्घनक्रुद्धा मुशलमभिमन्त्र्य मन्त्रज्ञा संमुखमक्षिपत् । स च मुशलः सर्परूपीभूय बङ्गालदेवस्याभिमुखं प्रससर्प । तस्माद् भीतो नष्टश्चलितो गेहाय प्रचण्डायाः । पृष्ठे सर्पः, पुरस्तादयम् । यावदायातां नदीमुल्लङ्घ्य गतः श्रेष्ठी । सर्पस्तु पश्चादुत्प्लुत्यापरा(? प आ) पतत्येव । तं महोरगं पिधातुं स स्वां पटीं विपुलामुपरि न्यधात् । तयाच्छादितोऽसौ सर्पो यावन्मूढः क्षणं तिष्ठति तावद् वणिग् [3]नंष्ट्वा प्रचण्डायाः समीपमुपागमत् । तदा च सोद्वर्तनिकामुत्तारयन्त्यासीत् । तया पृष्टम्, ‘कथं नाथ ! त्वं श्वासपूरितास्यनासापुटो विश्लथवस्त्रः खिन्नस्त्वरितपादमायातोऽसि ?’ इति । अथायमाचचक्षे, यथा; ‘त्वद्भवनाच्चण्डायाः सविधं गतोऽहम् । ततः सा समयभेदरुष्टा

१ ख. स्वामी । २ ख. स्थापिता । ३ क. ग. तं दृष्ट्वा ।

संग्रहः । ॥ ७० ॥

Pu. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मत्संमुखं मुशलमुद्गूर्णवती । मुशलश्च सर्परूपेण मामनुधावन्नागच्छन्नास्ते । देहि खटकीकपाटौ । क्षिप मामपवरकमध्ये' । एवं वदत एवास्याहिः प्राप्तः । प्रचण्डया करस्थोद्वर्तनीवर्तयः संमुखाः क्षिप्ताः । नकुलशतानि भूत्वा तं सर्पं खण्डशः कारं कारं जघ्नुः । गतः सर्पोपद्रवः । तां रात्रिं प्रचण्डासदनेऽनैषीत् । ब्राह्मे मुहूर्ते त्वचिन्तयत्, 'इमे पत्न्यौ द्वे अपि दुष्टे मन्त्रज्ञे दृष्टप्रभावे । यदि क्वापि कार्ये क्रुद्धा मामेव हन्याताम्, तदा को निषेद्धा ?

"दुष्टा भार्या शठं मित्रं भृत्याश्चोत्तरदायकाः । ससर्पे च गृहे वासो मृत्युरेव न संशयः ॥ १ ॥"

तस्मादूर्ध्वं मुखं गृहीत्वा क्वापि गच्छामि' । इति परामृश्य सारद्रव्यं लात्वा प्रातश्चलितो देशान्तराय कार्पटिकवेषः । क्रमेण ग्राममेकं प्राप्तः । तत्र भ्रमन् व्यवहारिकगृहं गतः । तेनाभ्युत्थाय महदासने निवेश्य वासोभ्यामभ्यर्च्याऽभाष्यत, यथा; 'भद्र ! ममेयं भगिनी विद्युल्लतानाम्नी, त्वमेतां परिणयस्व' । सोऽप्याचख्यौ, यथा; 'यूयं महान्तो व्यवहारिणः, अहं त्वज्ञातकुलशीलः कार्पटिकः, कथं मह्यं दीयते कन्यारत्नम् ?' । ततो व्यवहार्याचष्टे स, 'नैमित्तिकेनैकेन समादिष्टमभूद्, यथा; 'ईदृग्रूपो यः कार्पटिकवेष एत्यमुकदिनेऽमुकवेलायां च, स त्वया भगिन्याः पाणिग्रहणं कारणीयः' । इति तद्वचनं श्रुत्वा तुष्टो बङ्गालदेवस्तां विशाललोचनामुपायत । तया सह प्रेमपाशनियन्त्रितश्चिरं तस्थौ । पूर्वपत्नीद्वयं चित्तादपि विस्मृतम् ।

एकदा वर्षासु निशायां गर्जति स्मरनरपतिगजानीककल्पे जलदवृन्दे, पतन्तीषु विरहिणीहृदयशरधोरणीषु जलधाराश्रेणीषु

१ क. ग. गृहे । २ क. ग. °ति सा° ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वासभवने विद्युल्लतया सह पर्यङ्कोपविष्टः प्रबोधितदीपोद्द्योतनाशिततिमिरः प्रत्यासन्ने निकेतने चन्द्रशालायां दत्तदीपां स्त्रीमेकां तारं तारं रुदतीं दृष्ट्वा वङ्कालदेवः पत्नीं पप्रच्छ, यथा; 'भद्रे! किमेषा भद्रमुखी विलपति?'। ततो विद्युल्लता दशनांशुद्योतितदीपदीप्तिः समाचष्टे, 'स्वामिन्! प्रोषितभर्तृकेयम्; अस्या हि पतिः शिशिरे विदेशं प्राप्तो वर्षासमारम्भे समागमं प्रत्यज्ञासीत्; अन्तराले गतो ग्रीष्मः, प्राप्ता वर्षाः, तथापि नायासीत्, इत्येषा हृल्लेखोल्लिख्यमानहृदया रोरुद्यते'। एतां तत्कथां श्रुत्वा श्रेष्ठी दध्यौ, यथा; 'हा धिक्, ते मे प्रियतमे मां विना कथं वर्षासमयमतिवाहयिष्यतः? चलप्रकृतिरहम्, निःस्नेहोऽहम्, अधमोऽहम्, यः सहसा ते परित्यज्यैकाकी देशान्तरमागतः, तत्रापि संपन्नस्वार्थस्तत्प्रेमाणं व्यस्मार्षम्; यदपि तयोर्हिंस्रत्वं मया विमृष्टं मन्त्रशक्तिदर्शनात्, तदप्यनुचितम्; न हि वल्लभमेव काचित् कदाचिद् हन्यात्; न हि तीक्ष्णदंष्ट्रोऽप्यहिः स्वयं स्वमङ्गं दशेत्; तस्माद् यदि तत्र यामि तदा मे श्लाघ्यं जीवितम्, धन्या सृष्टिः, अन्यथा तु किं मया दुरात्मना वृथापुरुषेण?'। इति चिन्तयत एवास्य मुखं मम्लौ, सिष्वेद गात्रम्, प्रसस्रुः श्वासाः, जग्लौ रतिः। एवंविधं च दृष्ट्वा तं पप्रच्छे बालया, 'आर्यपुत्र! किं सचिन्त इव दृश्यसे?'। ततोऽसौ तथ्यमेवाकथयत्, 'मृद्वङ्गि! एवमेवं मे पत्न्यौ स्तः, ते स्मृत्वा स्वदेशं जिगमिषामि, उत्कण्ठा कालविलम्बं न सहते'। इति तद्वचने श्रुते विद्युल्लता सान्तस्तापमचिन्तयत्, यथा; 'अस्य प्रागपि पत्नीद्वयमास्ते अहं तृतीया, इयन्ति दिनान्येव मान्याऽऽसिषं यदितरागोचरं रागमनुभवन्त्यस्मि,

१ ख. तरल।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

संप्रति तु यावत् पश्यामि तावत् सपत्नीसत्तापङ्कमलिनोऽयं रसः । तत्रापि मां त्यक्त्वा तत्र जिगमिषुरयम्, तस्माद् बोध्यते, यदि पुनर्न[1] गच्छति; बलाद् गमिष्यति चेत्, तदा ज्ञास्यति मे पराक्रमम्' । इति गाढं मनसिकृत्योवाच, 'प्रियतम ! त्वां विना क्षणमपि जीवितुं नोत्सहे, किमिति निष्ठुरतामवलम्ब्य त्वया देशान्तरं गम्यते ?

"[2]गंगासंगेण विणावि जलनिही होइ जलनिहिच्चेव । गंगा पुण तेण विणा भण कत्थ खणंपि वीसमउ ? ॥ १ ॥"

[3]किं क्रियते ?

"ते[4] केवि कमलिणीए हवंति संतावदीहरा दिअहा । मित्तोवि जेसु सह जीविएण[5] अमयंपि संहरइ ॥ १ ॥"

अथाह बङ्गालदेवः, 'प्रणयिनि ! तत्र गत्वा कतिपयदिनानि स्थित्वा पुनस्त्वामेवाभ्युपैष्यामि' ।

"पुष्पोत्तरेषु तरुषु भ्रमरो भ्रमेण भ्रान्ति करोति कुरुतामपरापरेषु ।
जानातु मालति ! कलां कथमन्यथासौ लोकोत्तरस्य तव सौरभवैभवस्य ॥ १ ॥"

इत्यादि । ततोऽस्यात्याग्रहं ज्ञात्वा तूष्णीं स्थिता सा । प्रातश्चलिते भर्तरि दधिमिश्रकरम्बकं हिमहिमं पाथेयपदे[6] सादरं

---

१ क. ग. °नर्नेच्छ° । २ गङ्गासङ्गेन विनापि जलनिधिर्भवति जलनिधिरेव । गङ्गा पुनस्तेन विना भण क्व क्षणमपि विश्राम्यतु ? ॥ १ ॥ ३ ख. एवं कि° । ४ ते केऽपि कमलिन्या भवन्ति संतापदीर्घा दिवसाः । मित्रोऽपि येषु सह जीवितेनामृतमपि संहरति ॥ १ ॥ ५ क. ग. जीवणेण । ६ ख. °थेयं पथसोद° ।

Pu. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ददौ । तं करम्बकं गृहीत्वा[1]ऽयमचालीत् पादाभ्यां चरन् । गते सार्धयाममात्रेऽह्नि स्फारसरोजले लब्धे भोक्ष्यते यावता, तावता तादृशेऽप्यजने सहसा क्षुतं श्रुतम् । अतोऽभुक्त्वैव पुरोऽव्राजीत् । पुनर्भोजनावसरे क्षुतम् । पुनरपि भोजनारम्भे क्षुतम् । एवं तृतीये क्षुते नासौ करम्बं बुभुजे । गृहीतकरम्बस्य पथि व्रजतोऽस्य मिलित एको जटाधारी । तेन सह गोष्ठी-प्रसक्तेः कश्चिदध्वानं गत्वा प्राप्ते जलाशये तं करम्बकं जटाधारिणे सकलं ददौ, न तु स्वयमंशतोऽपि बुभुजे । जटाधार्यपि स्वैरं भुञ्जानस्तद्रसे परिणते बोत्कटो जातः । विद्युल्लताभवनं प्रति प्रस्थितः[2] । बङ्गालदेवोऽपि कुतूहलभयशोकाकुलस्तमनु-प्रस्थितः । यावद् गतः पशुर्विद्युल्लतागृहम् । श्रेष्ठी तु गृहाद् बहिरस्थात् । पशुं मध्ये प्रविष्टं विद्युल्लता वस्त्रलकुटेन कुट्टयति । पशुरपि बूबूत्करोति । 'यास्यसि रे ?' इति मुहुर्मुहुः साऽभिधत्ते । मिलितो लोकः । पृष्टं च तेन, 'किमेतत् ?' । साप्याह, यथा; 'प्राक्पत्नीस्मरणात् तत्र गच्छन्नसौ भर्ता मया तत्तदौषधमिश्रेण करम्बेन पशूकृत्य पराहन्यते' । ततो लोकेन कृपालुना प्रोक्तम्, 'कुर्वेनं वराकं स्वरूपस्थम्' । तयाप्यौषधान्तराणि समाघ्रापितः । पशुर्जातो भरडकः । पृष्टो लोकेन, 'जटिन् ! किमेतत् ?' । भरडकोऽपि पूर्वावस्थां स्मृत्वाऽऽख्यत्, "[3]जो खाइ करंबउ कर विसासु, सो सहइ विडंबउ नत्थि दोसु," । तेनापि स्वा कथा सप्रपञ्चमकथि । लोकः साह 'तर्हि स क्व, योऽस्याः पतिः ?' । एवं पृच्छायां बङ्गालदेवोऽप्यागतः । सोऽपि सर्वेषां शृण्वतां बभाण, 'यदस्य जातं जटिनः, तद् ममाभविष्यत्, यदि क्षुतशकुनं प्रमाणीकृत्य करम्बभोजनं न ॥ ७२ ॥

---

१ क.-म. लात्वा । २ ख. चलितः । ३ यः खादति करम्बकं कृत्वा विश्वासं स सहते विडम्बनां नास्ति दोषः ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

न्यषेत्सम्’। इति प्रस्तावनां कृत्वा सविस्तरां स्वां कथामुवाद। उदित्वा च तैरेव पादैर्मुनिपार्श्वं गतः।

“दुःखार्तः सेवते कामान् सेवितास्ते च दुःखदाः। यदि ते न प्रियं दुःखं प्रसङ्गस्तेषु न क्षमः॥ १॥”

इति तदुक्तमुपदेशं श्रुत्वा साम्यमादृत्य तपस्तप्त्वा घोरं कर्म क्षिप्त्वा स्वः प्राप॥

॥ इति खादिनां दुःखावाप्तौ कथा॥ ७९॥

---

**वाक्पारुष्यं महादोषः सत्सु शेषगुणेष्वपि। एकेन कुवाग्दोषेण त्यक्तो म्लेच्छेन कर्मकृत्॥ १॥**

क्वापि पुरे एकेन म्लेच्छेन म्लेच्छात् कर्मकरो गृहीतः। तेन च विक्रेत्रा प्रथमं कथितम्, यथा; ‘भद्रोऽसौ कर्मकरोऽतस्करो लेख्यकवेदी शक्तः पक्षपाती; किं बहुना? सर्वगुणः, केवलममङ्गलभाषित्वमस्य दोषः’। क्रेत्रा भणितम्, ‘अस्त्वसौ दोषः, शेषा गुणाः सन्ति चेत्’। इत्युक्त्वा नीतो भृत्यस्तेन स्वगृहम्। कृतः सर्वेश्वरः। अन्येद्युः स्वाम्यादेशात् स्कन्धावारं यियासुस्तं भृत्यं प्रोवाच,–यथा, ‘अस्य हम्मीराख्यपुत्रस्य, एषां मानुषाणाम्, अस्य खरस्य, एतस्य कर्बराख्यस्य शुनः सारासारा कार्या’। इति वदन् गतः स्वामी। पालयति तत्कुटुम्बं सम्यक् शुचिः कर्मकरः। गताः केऽपि मासाः। स्वामिकार्ये सिद्धे स्वगृहं प्रत्यचलदसौ। प्राप्तश्च तन्नगरपद्रम्। ज्ञापितं मध्ये स्वागमनम्। प्रथममश्वारूढः कर्मकरः प्राप्तः। ननाम च स्वामिनम्। ततः ‘अशिवभाष्ययम्’ इति तत्प्रथमस्वामिवचः स्मृत्वाऽसौ प्रथमं कर्बरकस्य शुनः कुशलमपृच्छत्।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अथ बभाण कर्मकृत्, 'स्वामिन् ! मृतः कर्बरकः' । 'कथं मृतः ?' । 'गर्दभमांसाहारजीर्णत्वात्' । 'गर्दभः कथं मृतः ?' इति पृष्टे भृत्य आह, 'घोरानिष्पत्त्यै इष्टिकाभारोद्वहनाद् रुधिरविकारेण मृतः खरः' । 'घोरानिष्पत्तिः कथम् ?' । 'हम्मीरकाख्यत्वत्सुतमरणात्' । 'अस्यापि मरणं कुतोऽभूत् ?' । 'उज्जागरकोद्भवज्वररुजा' । 'उज्जागरकः कुतः ?' । 'अस्मत्स्वामिन्याश्चिरकालीनो राजयक्ष्मव्याधिरुद्बभूव, स च वैद्यैश्चिरं प्रतिकृतोऽपि नोपशशाम, ततो निःक्षीयमाणायां तस्यां सकलकुटुम्बमजागरीत्, तेन प्रसङ्गेन मातृभक्तत्वाद् हम्मीरकोऽस्मदादीनां वचनममानयन् बहून्यहोरात्राण्यजागः, ततो मन्दाग्नौ ज्वरोद्भवे मृतः' । 'किं मत्पत्न्यपि मृता ?' 'रे ! किमात्थ किमात्थ ?' । सोऽप्याह, 'मृतैव' । एतत्कर्बरककुशलमद्यापि लोके ख्यातम् । ततः सर्वकुटुम्बक्षयं श्रुत्वा वस्त्रस्फाटनत्रोटनादीनि करोति प्रभुः । भृत्योऽपि तथैव चेष्टते । अत्रान्तरे समेतं सशृङ्गारं संमुखं पुत्राद्यं सर्वं कुटुम्बम् । कृतोचिता प्रतिपत्तिः । समुज्जीवितो म्लेच्छः । भाषितश्चेटः, 'रे किमेतत् त्वयाऽसमञ्जसं बहुदुःखकारकं बभाषे ?' । अथाह दासः, 'स्वामिन् ! किं न स्मरसि, यथा; मम स्वामिना मां विक्रीणानेन तव पुरः प्रोक्तम्, 'अस्य वाग्दोष एव दोषः, शेषाः सर्वे गुणाः सन्ति' ? तदा तु तदादृत्याहं त्वयाऽऽनीतः, तदिदं साक्षात् पश्य इति । स्वाम्यपि गृहं गत्वा तं वाग्दुष्टं गृहाद् निरकासयत् ॥

॥ इति जिह्वासंवराभावदोषे म्लेच्छकथा ॥ ८० ॥



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

क्रियाः सर्वा कामदुघाः प्राक्पुण्यं बलवद् यदि । तथाहि पथ्या वैद्यस्य पथ्यासीत्सर्वसिद्धिदा ॥ १ ॥

कर्पूरपुरे कोऽपि विप्रो वैद्यकं करोति, त्रिफला-हिङ्गुलाष्टकहिङ्गुत्रयोविंशतिसढादिरास्नादिकतिपयटिप्पितयोगवित्, न तु रसवीर्यादिविदुरः । तस्यायमाचारः, यानि यान्यौषधानि यस्मिन् रोग उपयुज्यन्ते तेषां तेषां पृथक्स्थालीस्थापितानां मध्यात् पलमर्धपलं वा दत्ते । घुणाक्षरन्यायेन यो जीवति स भक्तिमाचरति । यस्तु मृतः स कर्मवशतो गत इति । मृतो विप्रः कालान्तरे । तस्य तु पुत्रो द्वादशवर्षदेश्यः पशुप्रायो बहुभोजी । तस्य माता तु जीवति । लोकः पूर्वरूढ्या प्रष्टुमायाति, औषधं याचते, स तु न किमपि वेत्ति । ततः पृच्छति मातरम् । माता तु स्थालीश्रेणीः प्रत्येकमालोकयामास, पथ्याचूर्णं च ददर्श, जगाद च वत्सम्, 'पुत्रक ! चूर्णमिदं पिता ते प्रायः सर्वलोकेभ्योऽर्पयामास, त्वमप्येतदेव प्रच्छकदर्शं दद्याः' । तद्वचनमात्रनिष्ठोऽसौ । यो यो यद्व्याधिपीडितः समेति तस्मै तस्मै तदेव दत्ते । तस्य च भाग्यात् प्रस्तुतरोगोपशान्तिः । ततश्च लोको ददाति । स्फायते चायं दिने दिने धनधान्यगवादिभिः पितुरधिकम् । एकदा ग्रामाध्यक्षस्य घोटिका[1] मन्दुरायाश्छुटित्वा गता । ग्रामण्यः पुत्रस्तं हरीतकीवैद्यं प्रष्टुमागतः । 'क्व सा घोटिका मया लभ्या ?' इति तं पप्रच्छ । सोऽपि हरीतकीचूर्णमयच्छत् । उवाच, 'भक्षयेदम्, लप्स्यसेऽर्वतीम्' । चलितोऽसौ वैद्यगृहात् । प्रचचाल रामतुबरपथ्याचूर्णाद् विरेकः । गतो ग्रामाद् बहिः सरः । तत्र जलपानाय स्वयमुपेयुषीमश्वामद्राक्षीत् । जहर्ष । तामारुरोह[2] । सद्य समेयाय ।

---

१ ख. तुरंगमी । २ क. ग. तां चटितः सद्य समागतः । प्रा॰ ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ग्रामे त्वाबालगोपालं यशस्ततान, यथा; 'अहो विप्रोऽयं ज्ञानी वैद्यश्च' । ततो दत्ते ग्रामैः पूर्ववदस्मै ।

इतश्च तद्ग्रामासन्नमानन्दपुरमास्ते । तत्र वीरचन्द्रो राजा । तस्य बहवः शुद्धान्तनार्यः । तत्रैका राज्ञी राज्ञो न वल्लभा । ततः सा सर्वान् कलाविदो वश्यादिकं पृच्छति । न तु केनापि किञ्चित् सिध्यति, तथापि पृच्छत्येव कार्यातुरत्वेन । तस्यास्तु दासी कर्पूरीनामा कार्यवशात् तं ग्राममाजग्मुषी । तस्य विप्रस्य यशः श्रुतम्, यथा; 'अयमेव सर्वज्ञः' । अथ सा तद्गृहं गत्वा तं विप्रं भृशं निमन्त्र्य तत्रानैषीत् । स्वामिवश्यार्थे औषधं च ययाचे । तेनाप्युक्तम्, 'इदं चूर्णं स्वामिन्यै देयम्' इत्युक्त्वा पथ्याचूर्णमार्पिपत् । तच्च स्वामिनी जघास । चलितश्च विरेकः । जातातीसारवशात् तूलतलनिलीनोदरी, कण्ठगत-प्राणप्राया च । ततो दास्या विज्ञप्तो राजा, 'देव ! अमुकनृपपुत्री अमुका महारोगात् प्राणसंदेहे वर्तते, एकदा तत्रायातु देवः' । इत्याहूतो गतः । तत्र राज्ञ्यपि निवृत्तविरेका सद्वस्त्रा पुरस्थाऽऽसीत् । तां च दिव्यरूपां दृष्ट्वा 'धिगस्मान् असार-ग्राहिणः सारद्वेषिणः, येनेदृग्रूपाप्यसावियत्कालं नालेपे, यत्र तत्र चिक्रीडे, अतः परमियमेव पट्टराज्ञी' इति दध्यौ । तत्कालं प्रभूतग्रामदेशनगरतुरंगकनकाभरणस्वामिनीं नमदनेकभोगिनीशिरःस्रवत्कुसुमराजिमकरन्दकर्दमितचलननलिनां मनोमदक-लीलाशालां चकार । गतः स्वसौधं वसुधाधिनाथः । राज्ञी च चमत्कृता तं विप्रमाकार्य हेमासनमुपवेश्य कनकपुष्पैः पूजयित्वा कृताञ्जलिर्जगौ, 'त्वद्दत्तेयं लक्ष्मीः, तवैता वयम्, विषमप्यमृतं भवदिच्छया भवत्येव' । इत्यभिधाय महती

१ ख. °दत्त ग्रा° । २ ग. °मः सर्वमस्मै । ३ ख. शुश्राव । ४ क. °शा तूलनि° ग. °शात्तलनि° । ५ क. ग. °रञ्जक° ।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विभूतिमदात् । ततो हरीतकीवैद्यो जातो लीलाविलासः, त्यागकर्णः, भोगपुरन्दरः ॥

॥ इति गुणगौणत्वे प्राक्पुण्यप्रौढौ च पथ्यावैद्यकथा ॥ ८१ ॥

---

प[1]रिषदि रसप्रियायां रसावतारार्थमन्तरकथौघम् । मलधारिगच्छनाथ[2]ः सूरिः श्रीराजशेखरः कृतवान् ॥ १ ॥

[3]द्विः पूर्वार्ध ( ? र्धं ) गीति ( ? तिः ) षष्टिर्मा ( ? मा ) त्रा ।

व्या ( ख्यासु ? ) मुनीन्द्राणां चातुर्विद्यावतारसारासु । पूजासुवर्णपुष्पस्रज इव ( नवरं ? ) भवन्त्वेताः ॥ २ ॥

सुगमं, 'नवरं' केवलम्, 'एताः' इति अन्तरकथा ( ? थाः ) प्रक्रमात(त्त)त्वात् ॥ अन्तरकथासंग्रहो नाम ॥

---

१ ख पुस्तके नास्तीयं गीतिः ग घ पर्षदि । २ ग घ °श्रः श्री° । ३ ख ग घ पुस्तकेष्वेतत्प्रभृति किञ्चिन्नास्ति ।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust